CC0. In Public Domain, Digitizagtion by eGangotri

52

काव्यदीपिका ।

[विश्वविद्यालयच्छात्राणां पाठोपयोगी सुगमः
क्षुद्रकायः अलङ्कारसन्दर्भः]

कान्तिचन्द्रविद्यारत्नभट्टाचार्य्येण सङ्कलिता ।

पण्डितकुलपतिना, बि, ए, उपाधिधारिणा
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण विरचितया
तदात्मजाभ्यां
पण्डित-श्रीमदाशुबोधविद्याभूषण-पण्डित-श्रीमन्नित्यबोध-
विद्यारत्नाभ्यां परिवर्त्तित-परिवर्द्धितया टीकया

तथा

बङ्गदेशीयभाषया लिखितेन संस्कृतसाहित्यशास्त्रस्य
संक्षिप्तेनेतिवृत्तेन सहजसिद्धाऽऽलोकेन च सह
संस्कृत्य ताभ्यामेव प्रकाशिता ।

षष्ठ-संस्करणम् ।

कलिकातामहानगर्य्यां
वाचस्पत्ययन्त्रे
मुद्रिता ।

ई १९३२ ।

[illegible] ।   [illegible] ग्रन्थ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।। श्रीसरस्वत्यै नमः ।।

।। ग्रन्थस्यास्याऽधिकारी रतिनाथ झा ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काव्यदीपिका।

[विश्वविद्यालयच्छात्राणां पाठोपयोगी सुगमः
क्षुद्रकायः अलङ्कारसन्दर्भः]

कान्तिचन्द्रविद्यारत्नभट्टाचार्य्येण सङ्कलिता।

पण्डितकुलपतिना, वि, ए, उपाधिधारिणा
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण विरचितया
तदात्मजाभ्यां
पण्डित-श्रीमदाशुबोधविद्याभूषण-पण्डित-श्रीमन्नित्यबोध-
विद्यारत्नाभ्यां परिवर्त्तित-परिवर्द्धितया टीकया
तथा
इंलण्डीयभाषया लिखितेन संस्कृतसाहित्यशास्त्रस्य
सङ्क्षिप्तेनेतिवृत्तेन अष्टसम्रिखाऽऽलोकेन च सह
संस्कृत्य ताभ्यामेव प्रकाशिता।

षष्ठ-संस्करणम्।

कलिकातामहानगर्य्यां
वाचस्पत्ययन्त्रे
मुद्रिता।

इं १९३२।

सर्वं स्वत्वं संरक्षितम्। मूल्यमानकद्वयाधिकैका मुद्रा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशक—{ पण्डित-श्री-आशुबोध-विद्याभूषण
तथा
पण्डित-श्री-नित्यबोध-विद्यारत्न ।

प्राप्तिस्थान—{ २न०, रमानाथ मजुमदार ष्ट्रीट्, आम्हार्ष्ट-
ष्ट्रीट्-पोष्ट-अफिस । कलिकाता ।

प्रिण्टर—वि, वि, मुखर्जी ।
२ न०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

SANSKRIT POETRY.

"Poetry," says *Hazlitt*, "is the language of the imagination and the passions. It relates to whatever gives immediate pleasure or pain to the human mind." Its existence may therefore be co-eval with the primary institution of society, and even with the first creation of man. His earliest efforts would indeed, consist of unconnected and separate pieces without any systematic arrangement. First of all, the marvellous and gigantic power of the elements, and the splendid appearance of the heavenly bodies,—the visible symbols of the invisible and infinite, would strike his mind. The exploits and prowess of the *favoured few*, shining pre-eminently over their fellow-brethren, and dazzling their eyes by a charming brilliancy, would not fail to produce their effect. Hence would naturally spring two sorts of poetry, the first consisting of hymns addressed to and singing the glory and power of the visible deities, and through them extolling the mysterious potency of the Omnipotent; and the second comprehending short ballads and songs, celebrating the exploits and adventures of some favourite hero. It would be long before systematic and continued pieces would be originated. System is the work of time, the production of mature judgment and consummate genius.

The Greeks had no hymns and ballads before the immortal father of their poesy touched his harp. His mighty and grasping genius could hardly remain content with a few poor scraps and scattered patches, which had satisfied his predecessors. He at once laid

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

and established his claim over the vast empire of poetry, and gave it a poetical organization of his own.

The Romans, under the Republic, had no high aspirations in this department of literature. They felt not the delicate charms of poetry,—the sweet frenzy of fancy. They were emphatically the children of Mars, and bore too manly a spirit to stoop before the feminine Muses. They boasted of their stern discipline and rigid martial spirit, as the characteristic of a sovereign people, and hated the softer arts as belonging to the subject races and the effeminate barbarians. Poetry, in consequence, languished in their age, and never grew with vigour and luxuriance. It was not till the Augustan era, that this elegant art flourished in Rome. It is a delicate plant that grows only in the congenial warmth of imagination; it cannot bear the blighting heat of stern utility and rigid discipline.

The Hindus have been pre-eminently famous for the originality and antiquity of their poetry. Their chief defect lies in the almost absolute want of any historical records properly so called. Whatever information can be gleaned of their past history is through the gorgeous and delusive colouring of poetry, or through their intercourse with other nations. It was not till the invasion of *Alexander*, that any knowledge of them could be had from foreign sources. We must then look to the country itself to gain any information of the times anterior to the Greek-invasion, and, in the absence, in general, of external evidence, we must place our chief reliance on the internal testimony to be extracted from the living monuments of our ancestors —the works they have left us as an inexhaustible and priceless patrimony,—the everlasting memorials of their divine genius. The vast field yet remains un-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

explored or only partially explored, presenting, indeed at the first sight, a desolate and dark appearance, but containing rich mines of gold in the interior; and although the indefatigable zeal and indomitable perseverance of some masterminds in Europe have, to some extent, smoothed the way, the deep recesses of Hindu history lie yet in the darkness. A Niebuhr of Indian history is yet to be born.

I do not presume at all to throw any light on Hindu history. It is beyond my capacity and acquirements. I will only attempt, in the following pages, to trace the changes, Sanskrit Poetry underwent, from its rude structure in the Vedas to the highest refinements it attained to, and its decline in later days.

The hymns of the Rig-Veda, the only portion of the sacred Scriptures which can be classed with poetry, are principally addressed to *Indra*, 'the deity of the visible firmament,' 'the God of lightning and rain, and *Agni* 'the God of fire';—they are the oldest monuments of Hindu genius, and the earliest specimens of their poetry. The poetry, however, of the hymns, is not so simple as could be expected in so early a period of Society. "The poetry of the "Rig-Veda is remarkably deficient in that simplicity and natural pathos or sublimity which we usually look for in the songs of an early period of civilization." *

Next in succession comes the *Ramayana* of *Valmiki*, the earliest tnd the greatest epic in Srnskrit. *Valmiki* is said to be the Adi-kavi or primeval poet, and the inventor of *Sloka*, (Sanskrit verse) so called from the occasion of its birth, the *compassion* which filled the heart of the sage at the sight of a pair of cranes, one of which had been cruelly pierced by the arrow of a

* Ed. B. Cowell. Elphinstone's History of India.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

fowler. The simplicity of the style, the sweet and natural pathos pervading throughout and the *prolixity* (if I may so use the term) in the structure, are quite in keeping with its early date. *

The *Maha-bharata* of *Veda Vyasa* contains passages full of pathos and grandeur. The descriptions in the *Sabha-Parva* and the pathetic delineations in the *Stri-Parva* are genuine touches of poetry. But although the style is, in general, characterized by simplicity, and we meet with occasional prolixity in the structure, we have not here invariably the smooth and flowing strain of the *Ramayana*, nor always its simple, natural yet vivid style. The work of *Valmiki* is like a garden of nature, where she shines in simple and naked beauty, and sports wild at her pleasure ; while in the *Maha-bharata* we have, now and then, a sprinkling of artificial tinge,—a touch of later refinements ; and the style bears evident proofs of an advanced stage in the language.

But it was in the hands of *Kalidasa* and *Bhababhuti*, that Sanskrit poetry attained to its highest refinements, consistent with purity, and without the extravagant colouring imparted to it by later writers ; but as we are acquainted with *Bhababhuti* as a dramatic writer, and as I shall speak of Sanskrit drama separately, I postpone noticing his poetry, till I come to treat of the Hindu theatre.

Kalidasa is known to the world both as an epic and a dramatic poet. His style, is pure, chaste, and simple ; it has not in the least, the laxity of the sacred

* The Upanishads and the Puranas, including the Bhagavata, though they, now and then, glow with poetic sentiments, cannot properly be classed with poetry. I am not in a position to fix their dates in the progress of Sanskrit literature.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

poems, and though characterized by brevity, perspicuity runs through every vein of his poetry. His descriptions are always true to nature, his delineation of characters faithful to the minutest point; his similies are everywhere appropriate, natural and beautiful. Nature yielded to him as a gentle bride, and ever remained faithful. The description of the ocean, of the forest scenery and the hermitage of the sages therein, in the 13th Canto of the *Raghuvansham*, when *Rama* returned home from Lanka;—the parting scene of *Lakshmana* in the 14th, leaving *Sita*, the queen of *Rama*, alone and helpless in the wilderness, a prey to the howling beasts, and crying aloud like a frightened *Kurari*;—the sudden and wonderful appearance, at midnight, of the goddess of *Ayodhya*, before *Kusha* sleeping in his apartment with doors all barred and closed, and her description of deserted *Ayodhya*, graphically contrasted with her former glory and beauty;—the most faithful delineation of the acts of the maidens of *Bidarva*, eager to feast their eyes with the sight of *Aja* in the 7th Canto of *Raghuvansham* and of those of *Oshadhiprastha*, when *Siva* advanced through that capital in marriage procession, in the 7th Canto of *Kumara*; the discourse of *Siva* in the disguise of an ascetic. and *Parvati* submitting herself to hard austerities to gain his favour;—and the vivid descriptions in the *Meghaduta*, are among the master-pieces in the Language.

Another rare quality characterizes his poetry. He could delineate, within the shortest compass imaginable, subjects which had occupied volumes in the hands of others, and yet would not leave out a single prominent fact in his descriptions. His epithets are always appropriate, and full of meaning, and he seldom uses particles merely to fill up the verse.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

The style of the *Kiratarjuniyam* of *Bharavi* is classical and elaborate. It has not the simplicity of the *Raghuvansham*, nor its natural structure. The peculiar characteristic of *Bharavi's* writings is the great condensation of matter. Almost every line of his poetry may form the subject of an essay. The great work of *Bharavi* marks a new epoch in Sanskrit poetry.

In him, for the first time, for once at least—viz. in Canto XV—the genuine touches of true and simple poetry are replaced by ostentatious display of learning and ingenuity ; and the false taste is carried farther by his imitators and successors in poetry.

They possessed great powers of description, but they knew not where and when to stop. Their descriptions and discourses are sometimes too long to attract the attention of the readers. Some of them carry their refinements too far, and to an extravagance quite beyond the region of true poetry.

The *Bhatti-kavyam* is a work of great merit, as an epic poem, and possesses great grammatical interest besides. The description of Autumn, opening the Second Book of his work, is an excellent piece of poetry, and clearly proves that the author possessed great natural powers. and a high poetical genius, but unfortunately, his object was to teach *grammar* through poetry and he was therefore often forced to sacrifice the latter at the stern and rigid altar of the former.

The *Shishupala-badham* of *Magha* is an imitation of *Kiratarjuniyam* of *Bharavi*. His descriptions are often too long and tedious. That of *Krishna*'s passage from *Dwaraka* to *Indra-prastha* takes up the space of ten long books. But the imitation surpasses the original in evincing greater variety, learning and skill in the discourses and descriptions. The conference of *Uddhava*,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Krishna and *Balarama* in the 2nd Book, and the quaint reproaches of *Shishupala* in the 15th, show great artistic skill in the author and are excellent in their own way.

But it was *Sri-Harsha*, who, in his *Naishadha-Charitam*, carried refinements to their utmost extravagance so as to make them blemishes. His genius was too sharp to keep the tender graces of Poetry unhurt. There was no law to his imagination—it knew no bounds. His horses, too ambitious to rest satisfied with the whole space of earth for their range, must dry the ocean with the dust of their hoofs to have a wider scope for their course. The moon had the great misfortune to part with a portion of the brightness of her orb for the formation of the face of *Damayanti* by the great creator, and hence the dark spots in her disc. Such unnatural exaggerations abound in the great work of *Sri-Harsha*. But his descriptions, arguments and discourses shew marks of a very sharp intellect, great genius, consummate skill and most profound learning.

The *Raghava-Pandaviyam* of *Kaviraja*, a farther refinement upon the false taste of the great masters, is a work of little merit, contains less poetry, and is noted only for its verbal ingenuity, all its slokas bearing a double sense throughout the poem.

The Sanskrit poetry gradually degenerated into mere verbal quibbles and pompous bombastic trash. *

The '*Sugared*' pastoral songs of our 'Honey-tongued' *Jayadeva* are exceptions, and they are the the only pieces

* These had its original in slokas like Kumar I. 35. Continual improvements upon respective masters led to these miserable conceits.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

of the kind in Sanskrit poetry. They flow in soft and liquid strain. They are, indeed, as the poet boasts, sweeter than nectar, softer than the softest feminine graces, and more musical than the harmonious tune of the *Vina*.

I purposely omitted to mention the name of the *Nalodaya* ascribed to *Kalidasa*. I need hardly remark, that as a poetical work, it is of little merit, contains mere verbal ingenuity, and is not at all worthy of the name of the greatest of Sanskrit bards. It is perhaps the work of a *Kalidasa*, who lived long after his celebrated namesake.

Sanskrit poetry is very poor in prose productions. I shall barely mention the names of the only three which can be classed with poetry. These are the *Dasha-Kumara-Charitam* of *Sri Dandin*, the *Kadamvari* of *Vana Bhatta* and the *Vasavadatta* of *Subandhu*.

The dramatic literature of a country is important and interesting not only from a literary and philological point of view, but also as it throws light on the manners and customs of the people, on the state of religion and philosophy of the time, and in short, on the general history of the nation. "The objects," says Prof. *Wilson*, "for which an ancient dialect may be studied are its philology and its literature, or the arts and sciences, the notion and manners, the history and belief of the people by whom it was spoken. Particular branches of composition may be preferably cultivated for the due understanding of each of these subjects, but there is no one species which will be found to embrace so many purposes as the dramatic. The dialogue varies from simple to elaborate, from the conversation of ordinary life to the highest refinements of poetical taste. The illustrations are drawn from

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

every known product of art, as well as every observable phenomenon of nature. The manners and feeling of the people are delineated living and breathing before us, and history and religion furnish the most important and interesting topics to the bard. Wherever, therefore, there exists a dramatic literature, it must be pre-eminently entitled to the attention of the philosopher as well as the philologist, of the man of general literary taste as well as the professional scholar."

The drama of the Hindus is essentially their own; it is original—borrowed from no other nation ancient or modern. It belongs to that class of dramatic literature which modern European scholars have termed *Romantic*, in opposition to what has been styled *Classical*. *Schlegel* remarks,—"The only specimen of their plays hitherto known to us, is the delightful *Shakuntala*, which, notwithstanding the foreign colouring of its native climate, bears in its general structure such a striking resemblance to our own romantic drama, that we might be inclined to suspect, we owe this resemblance to the predilection for *Shakespeare*, entertained by the English translator Sir *W. Jones*, if his fidelity were not attested by other learned orientalists."

The number of Sanskrit dramas, now extant, is indeed very small, when compared with the theatre of other nations. But this is probably owing to the infrequency of their representations, and to the general neglect of this department of literature by the learned. "They seem to have been acted only on solemn and public occasions." * Numbers doubtless are lost, and only those of peculiar merit have come down to us; ane "that the Hindu theatre is *only* partially represented by the surviving specimens, is proved by the fact, that one of the earliest of their plays, the *Vikra-*

* Wilson's Hindu Theatre.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

morvashi of *Kalidasa*, refers to the sage *Bharata* as having analysed the dramatic art. The long lost *poetics* of the Hindu Aristotle in 34 chapters have been recently discovered and printed. Many plays must have been composed before a critic could have written so copiously on the theory." *

A peculiarity of the Hindu drama is the mixing of Prakrita dialects in the speeches of the inferior *dramatis personæ.* This shews. that Sanskrit ceased to be the spoken language of the country before the rise of dramatic literature. I doubt, whether Sanskrit was ever the spoken dialect of the people of all India. India is not a country, but a continent ; and to expect a common dialect throughout this vast extent would be almost extravagant. As the descendants of the Aryas spread on all sides, their dialects, gradually and of necessity, changed, differing from the mother tongue and from each other. Hence sprang the various dialects in the different countries of India. They are all, however, the daughters of the same mother (Sanskrit), and bear a near family-relation to each other. Sanskrit, however, continued to be the language of learned and the higher classes, and like Latin in Europe during the middle ages, formed the medium for the communication of great minds in every department of learning.

Sanskrit dramatists are not shackled by the rigid and artificial rules of the Greeks and the French, nor are they allowed extravagance of the Chinese play-writers. They have little regard for the unities of time and place. As for the unity of action I do not clearly understand what is meant by it. "In the highest and proper signi-

* E. B. Cowell. Also compare the various sub-divisions of the drama in treatises on rhetoric. Of course these divisions must have been based upon observation of real treatise.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

fication" says *Schlegel,* "Action is an activity dependent on the will of man. Its unity will consist in the direction towards a single end, and to its completeness belongs all that lies between the first determination and the execution of the deed." This idea of action does not apply to Hindu drama. To quote again the words of *Schlegel,* "What comes to pass through the principal characters, and proceeds with them, has frequently no more connection with a voluntary determination than a ship's striking on a rock in a storm." "If by unity of action" says Prof. *Wilson,* "be meant singleness of incident, they (Hindu dramatists) exhibit an equal disdain for such a restriction."

Another characteristic of our drama is, that we have no tragedies technically so called; that is, no dramatic composition ending tragically. Hindu dramas must, invariably and of necessity, have a happy end. The hero may encounter dreadful and serious calamities, he may suffer excruciating pangs of separation, he may wander from forest to forest, his head deranged, his mind distracted in mad quest of his love; but he must be crowned with success in the end. The poet *Bhababhuti* had the boldness to alter the very source of pathos of the story of *Ramayana*—the disappearance of *Sita*—in his *Uttara-Rama-Charitam.* The tragical end of the hero is shocking to the Hindu idea,—shocking to their tender feelings.

Though thus we have no tragedy at all, which forms an important branch of dramatic composition of many nations, ancient and modern, variety is not wanting in this department of Sanskrit literature. There are ten kinds of *Rupakas* properly so termed, and eighteen sorts of *Uparupakas,* the minor or inferior *Rupakas.* We have also moral plays as the *Prabodha-Chandrodaya* which are, however, included in one or other of the

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

former divisions. They are of the same nature with the Moralities of the old English stage—only more developed.

I have mentioned before, the numerical paucity of the Hindu dramas. To each of the two greatest masters of the art, *Kalidasa* and *Bhavabhuti*, are ascribed only three pieces. We have, indeed, no *Antiphanes* whose fertile genius could produce three hundred and sixty-five comedies, nor a giant *Lope de Vega*, the incredible number of whose dramatic compositions astounds humanity, and the lightning flash of whose genius could extend to a thousand lines, while walking in his garden. I am quite in the dark about the merit of these wonderful productions, but of this I am sure, that Sanskrit drama loses little by the smallness of the number of works. Its quality fully compensates its quantity. Moreover, the unique combination in *Kalidasa* of the epic genius with the dramatic—each unsurpassed if not unequalled by any other poet of any other nation, has no parallel, as far as I am aware, in the development of the poetry of any other language.

Many of the earliest Sanskrit dramas are certainly lost. The oldest specimen extant of the Hindu theatre is the *Mrichhakatika* attributed to the royal poet *Shudraka* whom tradition places in the first century before Christ. That the work is of considerable antiquity, is proved by internal evidence, and by the structure of the style which is characterized by the simplicity of an early age, and has not the elaborate polish of later times.

Next we come to *Kalidasa*, the prince of Sanskrit bards, to whose immortal genius are ascribed three dramatic pieces. 1st,—The *Abhijnana-Shakuntalam* the greatest, sweetest and finest drama in the language. 2nd.—The *Vikramorvashi*, which excels in poetic and visionary

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

charm, reminding us of the fairy scenes of *Shakespeare* in his *Midsummer Night's Dream.* 3rd.—The *Malavikagnimitra.* That the first two are the genuine productions of the same hand, there is no reason to doubt. "The subject of each is taken from heroic mythology, and a royal demigod and a nymph of more than human mould are the hero and heroine of either ; there is the same vivacity of description and tenderness of feeling in both ; the like delicate beauty in the thoughts and extreme elegance in the style." * The *Malavikagnimitra* is a work of inferior merit. There is doubt whether it is the production of the *favoured child* of *Saraswati.* "The internal evidence" says Prof. *Wilson,* "is adverse to the drama's being the work of the author of *Shakuntala* and *Vikramorvashi.* There is neither the same melody in the verse, nor fancy in the thoughts."

Bhavabhuti is second only to *Kalidasa* in this department of poetry. To him also are attributed three dramas,—the *Uttara-Rama-Charitam,* the *Malati-Madhava,* and the *Mahavira-charita.* The peculiar merit of his poetry is the sublimity of descriptions, and minute analysis of the affections—qualities rarely met with in the productions of other Sanskrit bards. His style is classical, and though elaborate, is not deformed by extravagant refinements. His descriptions of mountain scenery are highly picturesque and truly grand. His glowing delineation of the sites of the *Dandakaranya,*—here shining in tender green,—there looking dismal with their vast and dreary extent,—and resounding in places with the rushing of the waterfalls ; and his descriptions of the transparent rills moving gently along, with their banks shaded with groves of canes, are indeed sublime and romantic. The pathetic strain,

* Wilson's Hindu Theatre.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

—describing the painful situation of *Ayodhya's* and *Sita's* lord, and depicting in breathing terms his tender feelings, roused by the sight of the familiar scenes, where he had lived for years with his beloved queen, whom his own cruel hands have banished from his kingdom, a victim to the howling forest, and whom he never hoped to see any more, can—

"Create a soul,
Under the ribs of death ;"

and move the senseless rocks.

The *Mudra-Rakshasa* of *Vishakhadatta* is a drama of a quite different description from the works of *Kalidasa* and *Bhavabhuti.* It is entirely of a political character, and interesting in the display of Machiavelian artifices throughout the work. The plot is well-conducted. The poet is much inferior to the two great masters of the art in fancy, imagery and brilliancy of thought. "The style though wanting in beauty is always vigourous and occasionally splendid". *

To *Sri-Harsha* are ascribed the *Ratnavali* and the *Nagananda.* Though the former is decidedly superior to the latter, there is little doubt, that they are the productions of the same hand. Whether they are, really, the works of the Royal Bard, or presented to his Highness by *Dhavaka* (who got plenty of money in return) as is alleged by the author of the *Kavya-prakasha*, is immaterial. This, however, is certain that they were written in the reign of the above named Kashmerian prince, and thus we have a certain clue to their date.

The style in both, and especially in the *Ratnavali*, is very smooth, elegant, and exceedingly beautiful. The *Prakrita* of the *Ratnavali,* in particular, is eminently elegant, and appears to equal advantage in no other

* Wilson's Hindu Theatre.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

drama. The poetry of the *Ratnavali* is, indeed, inferior to that of the works of *Kalidasa* and *Bhavabhuti*, both in fancy and in elevation of thoughts ; but I cannot go, so far as Prof. *Wilson*, to assert, "That there is in it no poetic spirit, no gleam of inspiration, scarce even enough to suggest a conceit in the ideas." "The *Ratnavali*," he proceeds, and not without reason, as it seems to me, "may be taken as one of the connecting links between the old and new school, as a not unpleasing production of that middle region through which Hindu poetry passed from elevation to extravagance."

The *Venisamhara* of *Bhattanarayana* is a drama of ordinary merit. The style, though spirited, is harsh. There is enough of passion, but very little of fancy. The peculiar excellence of the piece is the nice distinction of characters. Those of *Duryodhana*, *Arjuna*, *Karna* and *Ashwatthama* and above all, that of *Bhimasena*, are faithfully delineated and minutely distinguished. Yet even in this, our author failed, and miserably failed, in depicting the hero himself. *Yudhishthira* cannot but be the hero of the play. But he acts no prominent part in it ; we do not find him at all on the stage till the commencement of the last act and even there, he acts the part of a credulous fool, quite incompatible with the character of the hero of a *Nataka*.

The dramatic works of subsequent writers abound more or less in extravagant refinements. A few only deserve notice. The *Chandakaushika* of *Arya-Kshemishwara* may be noted for its pathetic strain, elegant style, and the dramatic interest in the hero. The *Anargha-Raghava* of *Murari* is celebrated far its elaborate style, has little dramatic merit, contains few poetic thoughts, and is full of hyperbolical extravagance and flat common-place. The *Mriganka-lekha* by *Vishwanatha*, has nothing original. Almost every inci-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

dent and every thought in it, is borrowed from his predecessors. The *Dhurta-nartaka*, the *Hasyarnava* and the *Kautuka-sarvaswa* are comic pieces or farces, being satirical attacks, the first upon the *Shaiva* ascetics, the second upon the licentious Brahmans assuming the character of religious mendicants, and the third upon princes who addict themselves to sensuality and fail to patronize learning.

Even the present century is not altogether barren of Dramatic compositions. But the productions cause only incredible labour in their birth, and are either born lifeless, or suffer a miserable life to the great uneasiness of their parents.

I shall conclude with a few remarks on the *Hanumana-nataka* or the *Maha* or great *Nataka* as it is emphatically called. It is evidently the work of several hands, the different fragments put together, arranged and formed into an entire whole (most probably) by *Damodara Mishra*, at the command of *Bhoja*. The poem contains passages of genuine poetry ; but it has no consistence with the principles of drama. There is no mention of entrance or exit, and the poet himself is the speaker in several places.

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सूचीपत्रम् ।

प्रथमशिखायाम्—

विषयाः ।	पृ०	पं०
मङ्गलाऽऽचरणम् ...	१	४
काव्यप्रयोजनम् ...	१	७
काव्यलक्षणम् ...	२	११

द्वितीयशिखायाम्—

विषयाः ।	पृ०	पं०
वाक्यस्वरूपम् ...	४	१०
पदस्वरूपम् ...	५	५
शब्दविभागः ...	५	१०
अर्थविभागः ...	५	१२
वाचकादीनां स्वरूपम् ...	५	१५
अभिधाकथनम् ...	६	२
लक्षणास्वरूपम् ...	७	४
लक्षणाविभागः ...	८	५
उपादानलक्षणा ...	८	१०
लक्षणलक्षणा ...	८	१७
व्यञ्जनास्वरूपम् ...	९	६
व्यञ्जनाविभागः ...	९	१२
शाब्दी व्यञ्जना ...	९	१७
अभिधामूला व्यञ्जना ...	१०	२
लक्षणामूला व्यञ्जना ...	१२	११
आर्थी व्यञ्जना ...	१३	६

तृतीयशिखायाम्—

विषयाः ।	पृ०	पं०
काव्यभेदाः ...	१४	६
ध्वनिः ...	१४	८
ध्वनिभेदौ ...	१५	४
लक्षणामूलध्वनिः (अविवक्षितवाच्यः)	१५	८
अभिधामूलध्वनिः (विवक्षितान्यपरवाच्यः)	१५	८
अविवक्षितवाच्यभेदौ ...	१५	१७
तत्र अर्थान्तरसङ्क्रमितवाच्यः	१५	२०
„ अत्यन्ततिरस्कृतवाच्यः	१६	८
विवक्षितान्यपरवाच्यः	१६	१५
तद्विभागः ...	१७	४
तत्र असंलक्ष्यक्रमव्यङ्ग्यः	१७	६
अथ रसनिरूपणम् ...	१७	१२
रसभेदाः ...	१८	९
स्थायिभावाः ...	२३	५
व्यभिचारिभावाः ...	२३	८
शान्तरसः ...	२४	२
वत्सलरसः ...	२४	११
संलक्ष्यक्रमव्यङ्ग्यः ...	२५	६
गुणीभूतव्यङ्ग्यम् ...	२५	१२
चित्रकाव्यम् ...	२६	९
तद्भेदौ ...	२६	१६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुर्थशिखायाम्—

विषयाः।	पृ०	पं०
दृश्यश्रव्यभेदेन काव्यविभागः	२८	५
दृश्यकाव्यलक्षणम् ...	२८	८
अभिनयस्वरूपं तद्भेदाश्च	२८	१३
नाटकलक्षणम् ...	२९	९
नायकलक्षणम् (टिप्पन्याम्)	२९	१६
तत्र—धीरोदात्तलक्षणम् „	३०	८
„ धीरोद्धतलक्षणम् „	३०	१४
„ धीरललितलक्षणम् „	३०	१८
„ धीरप्रशान्तलक्षणम् „	३१	७
प्रकरणलक्षणम् „	३१	१०
प्रहसनलक्षणम् „	३२	५
नाटिकालक्षणम् „	३२	९
अङ्कलक्षणम् ...	३३	२
त्रोटकलक्षणम् (टिप्पन्याम्)	३३	१२
नाटकीयपूर्वकृत्यम् ...	३४	४
पूर्वरङ्गलक्षणम् ...	३४	९
नान्दीस्वरूपम् ...	३४	१२
बीजलक्षणम् (टिप्पन्याम्)	३४	१५
प्रस्तावनास्वरूपम् ...	३५	५
प्रस्तावनाभेदाः ...	३५	१२
उद्घात्यकलक्षणम् ...	३६	३
कथोद्घातलक्षणम् ...	३६	१४
प्रयोगातिशयलक्षणम्	३७	२
प्रवृत्तकलक्षणम् ...	३८	२
अवलगितलक्षणम् ...	३८	११
पताकास्थानकप्रयोगस्थलम्	३९	४
पताकास्थानकलक्षणम्	३९	८

विषयाः।	पृ०	पं०
अर्थोपक्षेपकाः ...	४१	२
विष्कम्भकलक्षणम् ...	४१	६
प्रवेशकलक्षणम् ...	४२	२
अङ्कावतारलक्षणम् ...	४२	८
सन्धिलक्षणम् ...	४२	१३
तद्भेदाः ...	४३	२
मुखलक्षणम् (टिप्पन्याम्)	४३	४
प्रतिमुखलक्षणम् „	४३	८
गर्भलक्षणम् „	४३	१२
नाट्योक्तयः ...	४४	२
विमर्षलक्षणम् (टिप्पन्याम्)	४४	७
निर्वहणलक्षणम् „	४४	११
श्रव्यकाव्यलक्षणं तद्भेदाश्च ...	४७	६
पद्यमहाकाव्यलक्षणम्	४७	१३
खण्डकाव्यलक्षणम् ...	४९	२
गद्यलक्षणम् ...	४९	५
चम्पूलक्षणम् ...	४९	८

पञ्चमशिखायाम्—

दोषस्वरूपं तद्भेदाश्च ...	५०	३
पदभागगतदोषाः ...	५०	१०
पदवाक्यगतदोषाः ...	५१	५
वाक्यभागगतदोषाः ...	६०	२
अर्थदोषाः ...	६५	९
कविसमयख्यातानि (टिप्पन्याम्)	७०	४
रसदोषाः ...	७१	७
दोषाणामदोषगुणत्वे ...	७४	६
अनुकरणस्य अदोषता ...	७४	९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षष्ठशिखायाम्—

विषयाः।	पृ०	प०
गुणस्वरूपम् ...	७४	१५
गुणविभागः ...	७५	४
माधुर्य्यलक्षणम् ...	७५	६
रसविशेषे द्रुतेरातिशय्यम्	७५	९
माधुर्य्यव्यक्तौ हेतवः ...	७५	१२
ओजःस्वरूपं तद्व्यञ्जकवर्णादीनि च	७६	२
प्रसादस्वरूपं तद्व्यञ्जकवर्णाश्च	७७	६
माधुर्य्यादीनां शब्दगुणत्वम्	७८	१

सप्तमशिखायाम्—

विषयाः।	पृ०	प०
रीतिस्वरूपं तद्भेदाश्च ...	७८	६
रीतिलक्षणम् ...	७८	१०
वैदर्भीस्वरूपम् ...	७९	२
गौडीस्वरूपम् ...	७९	७

अष्टमशिखायाम्—

विषयाः।	पृ०	प०
अलङ्कारस्वरूपम् ...	७९	१४
अलङ्कारविभागः ...	७९	१७
शब्दालङ्काराः ...	८०	२
अनुप्रासः ...	८०	४
यमकम् ...	८०	१४
श्लेषः (शाब्दः) ...	८१	१२
अथ अर्थालङ्काराः ...	८३	२
स्वभावोक्तिः ...	८३	७
उपमा ...	८४	५
मालोपमा ...	८६	२
रूपकम् ...	८६	८
उत्प्रेक्षा ...	८७	६
निगीर्णलक्षणम् ...	८७	१२
उत्प्रेक्षाबोधकशब्दाः ...	८८	१०
अतिशयोक्तिः ...	८८	१४
अन्यरूपा अतिशयोक्तिः ...	९०	५
व्यतिरेकः ...	९२	४
प्रतिवस्तूपमा ...	९३	५
निदर्शना ...	९४	१४
दृष्टान्तः ...	९५	११
अर्थान्तरन्यासः ...	९६	६
तुल्ययोगिता ...	९८	६
दीपकम् ...	९९	१४
अन्यरूपं दीपकम् ...	१००	८
सन्देहः ...	१०१	४
भ्रान्तिमान् ...	१०२	२
अपह्नुतिः ...	१०३	१४
समासोक्तिः ...	१०४	११
अप्रस्तुतप्रशंसा ...	१०६	५
व्याजस्तुतिः ...	१०७	८
प्रतीपम् ...	१०९	६
श्लेषः (आर्थः) ...	११०	८
सहोक्तिः ...	१११	६
काव्यलिङ्गम् ...	११२	२
विभावना ...	११३	५
विशेषोक्तिः ...	११४	२
विरोधः ...	११५	२
विषमम् ...	११६	५
असङ्गतिः ...	११८	२
कारणमाला ...	११८	७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयाः ।		पृ०	पं०
सारः	...	११९	६
एकावली	...	११९	१२
अर्थापत्तिः	...	१२०	१४

—

अष्टमशिखाऽऽलोके—

(अर्थालङ्कारप्रदर्शनम्)

चरणम्	...	१२२	३
परिकरः	...	१२३	२
अधिकम्	...	१२४	७
विशेषः	...	१२६	२

विषयाः ।		पृ०	पं०
परिवृत्तिः	...	१२७	१०
पर्यायः	...	१२९	६
परिसङ्ख्या	...	१३२	७
तद्गुणः	...	१३५	७
उदात्तम्	...	१३६	२
सूक्ष्मम्	...	१३७	६
भाविकम्	...	१३८	२
विनोक्तिः	...	१३८	१०
पर्यायोक्तम्	...	१३९	२
व्याजोक्तिः	...	१३९	१०
वक्रोक्तिः	...	१४०	६
आक्षेपः	...	१४१	५

भ्रमनिसरनम् ।

२य पृष्ठे दशमैकादशपङ्क्त्योरन्तरे "काव्यलक्षणम्" इति सूच्यंशः पतितः ।

६४ पृष्ठे प्रथमद्वितीयपङ्क्त्योरन्तरे "अभिधाकथनम्" इति सूच्यंशः पतितः ।

६४ पृष्ठे पञ्चमषष्ठपङ्क्तिस्थयोर्मूलटिप्पन्योरन्तरे रेखा पतिता ।

७४ पृष्ठे अष्टमनवमपङ्क्त्योरन्तरे "अनुकरणस्य अदोषता" इति सूच्यंशः पतितः ।

७५ पृष्ठे "रचनायां माधुर्य्यलक्षणम्" इत्यत्र "माधुर्य्यव्यक्तौ हेतवः" इति पाठः भाव्यः ।

७८ पृष्ठे प्रथमपङ्क्तेरुपरि "माधुर्य्यादीनां शब्दगुणत्वम्" इति सूच्यंशः पतितः ।

७८ पृष्ठे नवमदशमपङ्क्त्योरन्तरे "रीतिलक्षणम्" इति सूच्यंशः पतितः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काव्यदीपिका ।

प्रथमशिखा ।

मङ्गलाचरणम् ।—

मातरं हृदये ध्यात्वा विशदाम्बुजवासिनीम् ।
बालानां सुखबोधाय क्रियते काव्यदीपिका ॥ (१)

काव्यप्रयोजनम् ।—

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये*।

---

* काव्यादनर्थनिवारणञ्च भवतीत्याहुः ; तथा च, मयूरभट्टः सूर्य्यशतकं विरचय्य महारोगान्निर्मुक्त इति प्रवादः ।

प्रणम्य परमात्मानं श्रीजीवानन्दशर्मणा ।
व्याख्यया समलङ्कृत्य तन्यते काव्यदीपिका ॥

(१) इह खलु ग्रन्थकृत् ग्रन्थपरिसमाप्तेः निर्विघ्नताऽर्थं, शिष्टाऽऽचारप्रतिपालनार्थं, ग्रन्थाऽऽदौ अवश्यकर्त्तव्यत्वार्थञ्च देवताप्रणामरूपं मङ्गलमाचरति, मातरमिति ।—विशदाम्बुजवासिनीं—विशदं—शुभ्रम्, अम्बुजं—पद्मं, तत्र वसति या सा तां, श्वेतपद्माधिरूढ़ां, मातरं—जननीं, सरस्वतीमित्यर्थः, हृदये—मनसि, ध्यात्वा—सञ्चिन्त्य, बालानां—सुकुमारमतीनां शिशूनां, सुखबोधाय—सुखेन—अनायासेन, बोधाय—बोधविशदीकरणाय, ज्ञानाय इति यावत्, काव्यदीपिका—काव्यस्य—कविनिबद्धस्य वाक्यस्य, दीपयति इति दीपिका—प्रकाशकत्वात् दीपस्वरूपः, क्रियते—विरच्यते, प्रणीयते इति यावत्, मयेति शेषः । प्रदीपो यथा ध्वान्तं विनाश्य सर्ववस्तु प्रकाशयति, तथा इयं दीपिकाऽपि सन्दिग्धार्थाऽऽदिरूपं गूढ़ार्थं प्रकाशयिष्यति, अतः प्रकाशकत्वसाधर्म्यात् इयं काव्यदीपिका इति बोद्धव्यम् ।

(२) काव्यमिति ।—काव्यं—कविकृतमलौकिकचमत्कारि वाक्यं, यशसे—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे"॥ (२)

[मम्मटः]

काव्यं हि पाठादिसमनन्तरमेव अनिर्वचनीयविलक्षणाऽऽनन्दाय, * कालिदासादीनामिव यशःसम्पत्तये, श्रीहर्षादेर्धावकादीनामिव धनाधिगमाय, लोकाऽऽचारादिपरिज्ञानाय, सुधामयेनोपदेशवचनेन रामादिवत् प्रवर्त्तितव्यं, न रावणादिवत् इति सत्पथप्रवर्त्तनाय, साधुविगर्हितवर्त्मानुवर्त्तनाय च, तत्तद्भाषासु व्युत्पत्तिलाभाय च यथायोगं कवेः पाठकानाञ्च भवतीति बहुफलतया काव्यस्य तल्लक्षणादिकमवश्यमवगन्तव्यं धीमताम्, इति प्रथमतः काव्यस्य लक्षणमाह,—

कथ्यते काव्यम्"इष्टार्थव्यवच्छिन्ना पदाऽऽवली॥" [दण्डी]

इष्टाः,—अलौकिकचमत्कारित्वेन सहृदयमनोरमाः, अर्थास्तैर्व्यवच्छिन्ना—विलक्षणीकृता, पदाऽऽवली—पदसमूहः, काव्यम्।

---

* इदमेव काव्यस्य प्रधानफलमिति कारिकाक्रममनादृत्य प्रथममुपन्यस्तम् ।

कीर्त्तये, ख्यातिलाभायेत्यर्थः, रचयितुः प्रयोक्तुश्चेति शेषः, अर्थकृते—धनाधिगमाय, व्यवहारविदे—व्यवहारः,—लौकिकाऽऽचारादिकं, तत्र या विद्—ज्ञानं तस्मै, रामादिवत् प्रवर्त्तितव्यं, न रावणादिवदित्यादिशिष्टाऽऽचारज्ञानाय, शिवेतरक्षतये—शिवं—मङ्गलम्, इतरयति—विपरीतं करोति इति शिवेतरम् ; यद्वा,—शिवात्—मङ्गलात्, इतरम्—अशिवम्, अमङ्गलमित्यर्थः, तस्य क्षतये—नाशाय, भगवन्नामकीर्त्तनादिनेति शेषः, सद्यः,—पाठस्य श्रवणस्य च समनन्तरमेव, परा—महती, निर्वृतिः,—आनन्दः तस्मै, तथा कान्तासम्मिततया—प्रियातुल्यत्वेन, उपदेशयुजे—उपदेशदानाय, यथा कान्ताया उपदेशो मधुरतया स्वदते, तथा मधुरभावेणोपदेशदानाय इति भावः, भवतीति शेषः ।

(२) इष्टा इति ।—सहृदयमनोरमाः,—सामाजिकमनःप्रह्लादका इत्यर्थः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"रिपुस्ते मृत:" "पुत्रस्ते जात:" इत्यादिवाक्येन जनितस्य आह्लादस्य न लोकोत्तरत्वमिति (३) न तत्र काव्यत्वप्रसक्ति:। तथा च लोकोत्तरचमत्कारितया सहृदयहृदयाऽऽकर्षि वाक्यं काव्यमिति फलितम्। तन्नाम वाक्यं काव्यं,—यत् खलु विलक्षणचमत्कारितया बलादिव वश्यमानीय सामाजिकजनमनांसि रञ्जयति। यथा।—

"मानुषीभ्य: कथं नु स्यादस्य रूपस्य सम्भव:?।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥" (४) [अभि० श०]

"उग्गिलदब्भकवला मई परिच्चत्तणच्चणा मोरी।
ओसरिअपांडुपत्ता मुंअंति अस्सुं विअ लदाओ *॥" (५)[अभि०श०

---

* उद्गीर्णदर्भकवला मृगी परित्यक्तनर्त्तना मयूरी।
अपसृतपाण्डुपत्रा मुञ्चन्ति अश्रु इव लता:॥ [इति सं]

विलक्षणीकृता—अलङ्कृता इत्यर्थ:। लोकोत्तरत्वम्—अलौकिकत्वं, लोकेषु सतो य: सुखानुभव: स लौकिक:, यश्च काव्यनाट्यपरिशीलनजनित:, स खलु अलौकिक:, तादृशालौकिकाऽऽनन्दजनकपदाऽऽवली काव्यमिति निष्कर्ष:।

(४) अप्सर:सम्भवत्वं समर्थयमान आह, मानुषीभ्य इति।—अस्य—शकुन्तलासम्बन्धिन, रूपस्य—सौन्दर्य्यस्य, मानुषीभ्य:,—मनुष्यजातिस्त्रीभ्य:, कथं नु—केन प्रकारेण वा, सम्भव.—समुद्भव:, स्यात्? नैव स्यादित्यर्थ:; तथा हि, प्रभातरलं—लावण्यपूरं, ज्योति:,—तेज:, वसुधातलात्—पृथिव्या:, न उदेति—नोत्पद्यते; अत इयं काऽपि देवकन्येति भाव:। पथ्यावक्त्रं वृत्तम्।

(५) उद्गीर्णेति।—मृगी—मृगवधू:, उद्गीर्णदर्भकवला—उद्गीर्णा:,—परित्यक्ता इत्यर्थ:, दर्भा:,—कुशा: एव, कवला:,—ग्रासा: यया तादृशी, (शकुन्तलाया: परिगृहयावाकाले तद्दर्शनदु:खादिति सर्वत्र योज्यम) परित्यक्ताऽऽहारा इत्यर्थ:, मयूरी परित्यक्तनर्त्तना—परित्यक्तं नर्त्तनं यया सा, नृत्यपराङ्मुखीत्यर्थ:; लता:,—व्रतत्य:, अचेतना अपीति भाव:, अपसृतानि—गलितानि, पाण्डूनि—परिणतानीति भाव:, पत्राणि—पर्णानि यासां तथाविधा: सत्य:, अश्रु—वाष्पं, मुञ्चन्ति—त्यजन्ति इव। [एतेन शकुन्तलाया वियोग: सर्वेषामपि असह्य आसीदिति सूचितम्]। गाथा वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"अयि कठोर! यशः किल ते प्रियं
किमयशो ननु घोरमतः परम्?।
किमभवद्विपिने हरिणीदृशः
कथय नाथ! कथं बत मन्यसे?" ॥ (६) [उत्तररामच०]

एतानि वाक्यानि पाठानन्तरमेव कमपि लोकोत्तरमानन्दं सहृदयानामातन्वन्तीति (७) तेषां काव्यत्वम्।

इति काव्यनिरूपणं नाम प्रथमशिखा।

द्वितीयशिखा।

वाक्यस्वरूपमाह,—

अन्वितैकार्थबोधे तु वाक्यं पदसमुच्चयः। (१)

---

(६) अयीति।—रामं प्रति वासन्त्या उक्तिः। अयि कठोर!—हे निष्ठुर! इत्यर्थः, ते—तव, यशः किल—यश एव, प्रजारञ्जनजं, न तु पोष्यवर्गपरिपालनादिजमिति भावः, प्रियं—प्रीतिकरं, मन्ये इति शेषः; अथमन्यथा प्रधानपोष्यां प्रियभार्यां निर्वासितवानिति भावः। ननु—अनुनये, अतः परम्—अस्मात् सीतानिर्वासनरूपात्कृत्यादित्यर्थः, घोरं—दारुणम्, अयशः,—अकीर्त्तिः, किम्? नातः परमयशोऽस्तीति भावः। नन्वयशसः कारणं किम्? इत्याह, किमिति।—नाथ!—हे प्रभो! विपिने—हिंस्रश्वापदसङ्कुले अरण्ये, हरिणीदृशः,—हरिण्या दृशौ—चक्षुषी इव दृशौ यस्याः तस्याः,भीतभीताया इति भावः, सीताया इति शेषः,किम् अभवत्—का दशा अभवत्, (तव विषये), कथं मन्यसे?—किं चिन्तयसि? त्वं चिन्तया किमवधारितवानित्यर्थः, (तत्) कथय—वद, बत—खेदे। आसन्नप्रसवाया असहायायाः सीताया निर्वासनेन तस्या मरणमेव निश्चित्य जगति सर्व एव त्वां निन्दिष्यन्तीति भावः। द्रुतविलम्बितं छन्दः।

(७) लोकोत्तरम्—अलौकिकम्। आतन्वन्ति—जनयन्ति।

इति प्रथमशिखा।

---

(१) अन्वितैकार्थबोधे इति।—अन्वितस्य—अन्वययुक्तस्य, परस्परसम्बद्धस्येत्यर्थः, एकस्य अर्थस्य बोधे सति तु, पदानां—सुप्तिङन्तरूपाणां, समुच्चयः,—समूहः, अनेक-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदानां प्रत्येकं सार्थकत्वेऽपि तेषामर्थो नान्वितः, वाक्यन्तु तदन्तर्गतपदार्थसमुदितमेकमर्थं बोधयति। यथा,—"जननी सुताऽऽननं सस्नेहमीक्षते"।

पदस्वरूपम्.—

"सुप्तिङन्तं पदं" प्राह पाणिनिर्मुनिसत्तमः।

सुबन्तः तिङन्तश्च शब्दः पदम्। यथा,—"रामः" "भवति" इत्यादि।

शब्दविभागः,—

शब्दः पुनस्त्रिविधः, यथाऽऽह मम्मटभट्टः,—

"स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।"(२)

अर्थविभागः.—

अर्थोऽपि शब्दप्रतिपाद्यस्त्रिविध एव,—वाच्यः, लक्ष्यः व्यङ्ग्यश्च।

"वाच्यादयस्तदर्थाः स्युः" मम्मटेन यथोदिताः। (३)

वाचकादीनां क्रमेण स्वरूपमाह,—

"साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः।" (४)

[मम्मटः]

साक्षात् सङ्केतितस्तु "अस्मात् शब्दादयमर्थो बोद्धव्यः" इति

सङ्ग्राहकपदाऽऽवलीत्यर्थः, वाक्यं, ज्ञेयमिति शेषः; तथा चान्तर्गतपदार्थसमुदितैकार्थबोधकं पदद्वयं वा पदसमुदायो वाक्यमिति फलितम्। तत्र पदद्वयं यथा,—राजा गच्छति। पदसमुदायस्य मूले एवोदाहरणं द्रष्टव्यम्।

(२) स्यादिति।—अत्र—अलङ्कारग्रन्थे, शब्दः त्रिधा स्यात्, वाचकः,—वक्ति अभिधया अर्थं प्रकाशयतीति वाचकः, लाक्षणिकः,—लक्षणया अर्थं प्रकाशयतीति लाक्षणिकः, व्यञ्जकः,—व्यञ्जनया अर्थं प्रकाशयतीति व्यञ्जकः।

(३) वाच्याऽऽदय इति।—वाच्याऽऽदयः,—वाच्यलक्ष्यव्यङ्ग्या इत्यर्थः, तदर्थाः,—तेषां वाचकलाक्षणिकव्यञ्जकानाम् अर्थाः; तत्र वाचकस्य शब्दस्यार्थः वाच्यः, लाक्षणिकस्य शब्दस्यार्थः लक्ष्यः, व्यञ्जकस्य शब्दस्यार्थः व्यङ्ग्यः।

(४) साक्षादिति।—साक्षात्—अव्यवधानेनेत्यर्थः, सङ्केतितं—स्वतो नियमितम्, अर्थं यः,—शब्दः, अभिधत्ते—प्रतिपादयति, स वाचकः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

शब्दस्य स्वाभाविक्या शक्त्या, * व्याकरणादिना वा नियन्त्रितः। इयमेव शक्तिः "अभिधा" इत्युच्यते। अनया बोध्योऽर्थः वाच्यः, स च साक्षात् बोध्यत्वेन प्रधानतया मुख्यार्थं इत्यपि अभिधीयते। यथा,—गोशब्दोऽभिधया गलकम्बलादिमज्जीवविशेषरूपं, पाचकशब्दश्च पाककर्तृरूपञ्चार्थं साक्षात् बोधयति। (५)

* शब्दस्य स्वाभाविकीं शक्तिं सर्वे नाऽऽद्रियन्ते, रूढ़सम्मतिरेव शब्दानामर्थवाचने हेतुरिति केचिदाचक्षते ; तथा च अभिधाऽपि तन्मते लक्षणाव्यञ्जने इव आरोपितैवेत्यलमतिगहनावगाहनेन।

---

(५) शब्दस्येति।—स्वाभाविक्या—स्वतःसिद्धयेत्यर्थः, शक्त्या—सामर्थ्येनेत्यर्थः ; शक्तिश्च तत्तद्भाषावादिभिर्नियमितेति बोध्यम्। व्याकरणादिनेति—[आदिपदेन उपमानादयो गृह्यन्ते, तदुक्तम्,—

"शक्तिग्रहं व्याकरणोपमान-कोषाऽऽप्तवाक्यात् व्यवहारतश्च।
सान्निध्यतः सिद्धपदस्य वृद्धा वाक्यस्य शेषात् विवृतेर्वदन्ति॥" इति]।

नियन्त्रितः,—नियमितः, निर्द्धारित इत्यर्थः। [तत्र व्याकरणात् यथा,—पाचक इत्यादि। उपमानात् यथा,—गोसदृशो गवय इत्यादि। कोषात् यथा,—"विनायको विघ्नराज-द्वैमातुरगणाधिपाः" इत्यादि। आप्तवाक्यात् यथा,—अयमश्वशब्दवाच्य इत्यादि। व्यवहारात् यथा,—वृद्धेन युवानमुद्दिश्य "गामानय" इत्युक्ते, तं गवानयनप्रवृत्तं दृष्ट्वा बालोऽस्य वाक्यस्य सास्नादिमत्पिण्डाऽऽनयनमर्थं प्रथममवधारयति, ततो "गां बधान, अश्वमानय" इत्युक्ते, तथा कुर्वाणं युवानमवलोक्य गोशब्दस्य सास्नादिमत्पिण्डरूपमर्थम्, आनयनशब्दस्य चाऽऽहरणरूपमर्थं पृथगवधारयतीत्यादि। सिद्धपदसान्निध्यात् यथा,—"प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति" इत्यादि। अत्र कमलोदरे मधुपानकर्तृत्वं भ्रमरस्यैवेति मधुकरशब्दो भ्रमरमेव बोधयतीति द्रष्टव्यम्। वाक्यस्य शेषात् यथा,—"यवमयश्चरुर्भवति" इति वाक्ये—"यवशब्दः किं वासन्तशस्यविशेषबोधकः ? उत यावनिकप्रसिद्धतदाख्यशस्यविशेषबोधकः ?" इति संशये तद्वाक्यशेषे—"वसन्ते सर्वशस्यानां जायते पत्रशातनम्। मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः॥" इति वाक्यशेषात् वासन्तयवमेव बोधयतीत्यादि। विवृतेः,—विवरणात्, यथा,—रामो दाशरथिरित्यादि]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लक्षणया अर्थबोधकः शब्दो लाक्षणिकः, तया बोध्योऽर्थः लक्ष्यः।

लक्षणास्वरूपमाह विश्वनाथः,—

"मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता॥" (६)

मुख्यार्थस्य अन्वयानुपपत्तिग्रहे तदर्थसम्बन्धी अन्योऽर्थः रूढिप्रयोजनयोरन्यतरस्मिन् हेतौ सम्भवति यया प्रतीयते, सा वृत्तिर्लक्षणा नाम। रूढिः,—प्रसिद्धिः; यथा,—"कलिङ्गः साहसिकः" इत्यत्र कलिङ्गशब्दो देशविशेषरूपे स्वाभिधेयेऽर्थेऽसम्भवन् तद्देशवासिनः पुरुषान् बोधयति। प्रसिद्धिश्च अत्र हेतुः। "गङ्गायां घोषः" इत्यत्र च गङ्गाशब्दः प्रवाहविशेषरूपं स्वाभिधेयमर्थं बोधयितुमसमर्थः सामीप्यसम्बन्धसम्बन्धिनं तटं बोधयति। हेतुश्चात्र शीतत्वपावनत्वातिशयबोधनरूपं प्रयोजनम्।

"उपकृतं बहु तत्र किमुच्यते? सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे! सुखितमास्स्व ततः शरदां शतम्॥" (७)

---

(६) मुख्यार्थेति।—मुख्यार्थस्य—अभिधेयार्थस्य, बाधे—अन्वयानुपपत्तिग्रहे, तद्युक्तः,—मुख्यार्थसम्बन्धवान्, अन्योऽर्थः, यया, शक्त्या इति शेषः, प्रतीयते—ज्ञायते, असौ अर्पिता—आरोपिता, अस्वाभाविकीत्यर्थः, शक्तिः, लक्ष्यते अनयेति व्युत्पत्त्या—लक्षणा नाम, सा च क्वचित् रूढेः,—प्रसिद्धेः, क्वचित् प्रयोजनाद्वा भवतीति द्विधा, रूढिहेतुका प्रयोजनहेतुका चेत्यर्थः। इदञ्च हेतुद्वयमन्तरेण यस्य कस्यचित् सम्बन्धस्य सद्भावे लक्षणा नाङ्गीक्रियते इति बोध्यम्।

(७) उपकृतमिति।—अपकारिणं प्रत्युक्तिरियम्। हे सखे! बहु उपकृतं, त्वयेति शेषः, तत्र, विषये इति शेषः, किमुच्यते? न किमपीत्यर्थः; भवता परं सुजनता—सौजन्यं, प्रथिता—प्रकटिता, ईदृशं, कर्मेति शेषः, सदैव विदधत्—अनुतिष्ठन्, ततः,—विधानादित्यर्थः, शरदां—वर्षाणां, शतम् [अत्यन्तसंयोगे द्वितीया] सुखितम् आस्स्व—सुखं तिष्ठेत्यर्थः। अपकारिणं प्रत्युपकाराऽऽद्यभिधानमसङ्गतं मा भूदिति विपरीतया लक्षणया अपकाराऽऽद्यर्थो लक्ष्यते, तदतिशयश्च प्रयोजनम्; तथा च, "अतीवापकृतम्" इत्यादिरर्थो बोध्यते। द्रुतविलम्बितं वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

इयं हि कश्चिदपकारिणं प्रत्युक्तिरिति मुख्यार्थस्यान्वयानुपपत्तेः वैपरीत्यसम्बन्धेन अपकारादिरूपमर्थं ज्ञापयति, अपकाराऽऽतिशयद्योतनञ्चात्र प्रयोजनम्।

लक्षणाविभागः,—

इत्येवं सा द्विविधा रूढ़िमूला प्रयोजनमूला च।
सेयं पुनर्द्विधा स्यादुपादानं लक्षणञ्चेति॥

उपादानलक्षणा, लक्षणलक्षणा चेति सा लक्षणा पुनर्द्विविधा।

उपादानलक्षणा,—

स्वसिद्धये पराऽऽक्षेपेऽसावुपादानलक्षणा। (८)

वाच्यार्थस्य अन्वयसिद्ध्यर्थं लक्ष्यार्थस्य बोधने वाच्यार्थस्यापि उपादानादियमुपादानलक्षणा। यथा,—"यष्टयः प्रविशन्ति" इत्यत्र यष्टीनां स्वतः प्रवेशक्रिययाऽन्वयासम्भवात् प्रवेशान्वयार्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते। अत्र च स्वार्थस्यापरित्यागात् इयम् "अजहत्स्वार्था" (९) इति च कथ्यते।

लक्षणलक्षणा,—

परार्थमात्रबोधे तु भवेल्लक्षणलक्षणा। (१०)

---

(८) स्वसिद्धये इति।—स्वस्य—मुख्यार्थस्य, सिद्धये—अन्वयबोधार्थं, परस्य—अपरार्थस्य, लक्ष्यार्थस्येत्यर्थः, आक्षेपे—उपस्थापने, बोधने सति इत्यर्थः, असौ—लक्षणा, उपादानं—ग्रहणं, मुख्यार्थस्येति भावः, तेन लक्षणा उपादानलक्षणा; तथा च, मुख्यार्थसमेतलक्ष्यार्थबोधिका लक्षणा उपादानलक्षणेति तात्पर्य्यम्।

(९) अजहत्स्वार्था—न—जहत्—त्यजन्, स्वार्थो यामिति अजहत्स्वार्था, वाच्यार्थापरित्यागिनीत्यर्थः।

(१०) परार्थेति।—परस्य—अन्यस्य, लक्ष्यस्येत्यर्थः, अर्थमात्रस्य (मात्रपदेन मुख्यार्थव्यवच्छेदः) बोधे सति तु, लक्षणेन—येन केनापि सम्बन्धरूपेण चिह्नेनेत्यर्थः, लक्षणा लक्षणलक्षणा, भवेत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वथा स्वार्थपरित्यागेनान्यार्थमात्रबोधने इयं लक्षणलक्षणा। अत एवासौ "जहत्स्वार्था"(११) इति च भण्यते। यथा पूर्वोदाहृते,—"उपकृतं बहु तत्र" इत्यादौ।

व्यञ्जनयाऽर्थबोधकः शब्दः व्यञ्जकः, तया बोध्योऽर्थो व्यङ्ग्यः।

व्यञ्जनास्वरूपमाह,—

"विरतास्वभिधाऽऽद्यासु * ययाऽर्थो बोध्यतेऽपरः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥"(१२)

[विश्वनाथः]

अभिधायां लक्षणायाञ्च स्वं स्वमर्थं बोधयित्वा विरतायां ययाऽपरोऽर्थो बोध्यते, सा वृत्तिर्व्यञ्जना नाम।

व्यञ्जनाविभागः,—

शब्दवदर्थोऽपि अर्थान्तरव्यञ्जकः, इति प्रथमतो द्विविधा व्यञ्जना,—शाब्दी आर्थी च।

शाब्दी व्यञ्जना,—

शाब्दी च द्विविधा,—अभिधामूला, लक्षणामूला च। यथाऽऽह विश्वनाथः,—

"अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा।"

---

* विश्वनाथादयः केचित् तात्पर्य्याऽऽख्यामतिरिक्तां वृत्तिं कथयन्ति, तत एव "अभिधाऽऽद्यासु" इति बहुवचनम्। वृत्तिमिमामन्ये न मन्यन्ते।

---

(११) जहत्स्वार्था—जहत्—त्यजन्, स्वार्थो यामिति, सर्वथा वाच्यार्थपरित्यागिनीत्यर्थः।

(१२) विरतास्विति।—अभिधाऽऽद्यासु—अभिधालक्षणातात्पर्य्याऽऽख्यासु वृत्तिषु, विरतासु—स्वं स्वमर्थं बोधयित्वा उपक्षीणासु सतीषु, यया—वृत्त्या, अपरोऽर्थः बोध्यते, सा शब्दस्य अर्थादिकस्य च वृत्तिः, व्यज्यते अनयेति व्युत्पत्त्या व्यञ्जना नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिधामूलां व्यञ्जनामाह विश्वनाथः,—

"अनेकार्थस्य शब्दस्य संयोगाऽऽद्यैर्नियन्त्रिते।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाऽऽश्रया॥"(१३)

संयोगाऽऽद्याश्च,—

"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥" * (१४)

यथा,—"सशङ्खचक्रो हरिः" इति शङ्खचक्रसंयोगेन हरिः,—विष्णुः। "फणहीनो नागः" इति फणवियोगेन नागः,—सर्पः। "रामलक्ष्मणौ" इति लक्ष्मणसाहचर्य्येण रामः,—दाशरथिः। "रामार्ज्जुनौ" इत्यत्र विरोधितया रामः,—भार्गवः, अर्ज्जुनः,—कार्त्तवीर्य्यः। अर्थः,—प्रयोजनम्; यथा,—"स्थाणुं भज भवच्छिदे" इति भवच्छेदरूपप्रयोजनसम्बन्धेन स्थाणुः,—शिवः, न तु शाखाविहीनो वृक्षः। प्रकरणं—प्रस्तावः, यथा,—"यथाऽऽज्ञापयति देवः" इति देवः,—भवान्, राजा वा। लिङ्गं—विशेषकं चिह्नम्; यथा,—"कपर्दी भीमः" इति कपर्देन विशेषकेण भीमः,—शिवः।

---

* अनेकार्थस्य शब्दस्य कस्यार्थस्य बोधो भवतीत्यनिश्चये, संयोगादयोऽर्थविशेषबोधने नियामका इत्यर्थः।

---

(१३) अनेकार्थस्येति।—अनेकार्थस्य—भिन्नार्थस्य, शब्दस्य, एकत्र—एकस्मिन्, अर्थे, संयोगाऽऽद्यैः नियन्त्रिते—निर्द्धारिते सति, अन्यस्य—अर्थस्य, धीहेतुः,—प्रतीतिकारणं, या व्यञ्जना, सा अभिधा आश्रयो यस्याः इति अभिधाऽऽश्रया—अभिधामूलेत्यर्थः।

(१४) संयोग इति।—संयोगः,—संसर्गः, विप्रयोगः,—विरहः, साहचर्य्यं—सङ्गः, विरोधिता—वैरम्। एते शब्दार्थस्य अनवच्छेदे—अनिर्द्धारणे, विशेषस्मृतिहेतवः,—विशेषार्थबोधकारणानीत्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्यस्य—प्रसिद्धार्थकस्य, शब्दस्य सन्निधिः,—समभिव्याहारः ; यथा,—"खलारविन्दश्रियम्" इत्यत्र खलारविन्दसन्निधानेन श्रीः,—शोभा। सामर्थ्यं—शक्तिः ; यथा,—"मधुना मत्तः कोकिलः" इति मधुः,—वसन्तः, तस्यैव कोकिलमादने सामर्थ्यात्। औचिती—युक्तता ; यथा,—"गौरेका तु मनस्विनः" इत्यत्र औचित्येन गौः,—वाक्। "भाति गगने चन्द्रः" इति गगनरूपेण देशेन चन्द्रः,—शशाङ्कः। "रात्रौ विभावसुः" इति विभावसुः,—वह्निः; दिवसे तु सूर्य्यः। व्यक्तिः,—स्त्रीपुंस्त्वाऽऽदिकम् ; यथा,—"मित्रं भाति" इति नपुंसकलिङ्गेन मित्रं—बन्धुः ; "मित्रो भाति" इति मित्रः,—सूर्य्यः। स्वराः,—उदात्ताऽऽदयो वेद एव प्रसिद्धाः।

इत्थं संयोगादिभिरेकस्मिन्नर्थे नियमिते—अर्थान्तरबोधनप्रतिरोधिन तत्त्वाचे एव व्यवस्थापिते, यया अर्थान्तरं बोध्यते, सा अभिधामूला व्यञ्जना। यथा,—

"कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिश्वासमिवोत्ससर्ज॥" (१५)

[कुमारस०]

(१५) कुबेरगुप्तामिति।—आकालिकवसन्ताऽऽविर्भाववर्णनमिदम्। उष्णरश्मौ—सूर्य्ये, समयं—कालं, विलङ्घ्य—अतिक्रम्य, अकाले इत्यर्थः, कुबेरगुप्तां—धनपतिरक्षितां, दिशम्—उत्तरां दिशमित्यर्थः, गन्तुं प्रवृत्ते—उद्यते सति, दक्षिणा दिक् मुखेन—प्रारम्भेण, व्यलीकनिश्वासमिव—दुःखजनितदीर्घनिश्वासमिव ("व्यलीकन्त्वप्रियानृते" इत्यमरः) गन्धवहं—वायुम्, उत्ससर्ज—तत्याज; दक्षिणो वायुर्वहति स्मेति भावः। अत्र प्रकरणेन उष्णरश्मिशब्देन सूर्य्यरूपे, कुबेरशब्देन धनपतिरूपे, दक्षिणाशब्देन तदाख्यदिग्रूपे, मुखशब्देन प्रारम्भरूपे अर्थे नियमिते, व्यञ्जनया उष्णरश्मौ—साहसिके पुरुषे, कुबेरेण—कुत्सितशरीरेण केनचित् पुरुषेण, गुप्तां—रक्षितां, कामिनीमिति शेषः, गन्तुं प्रवृत्ते सति, तदीया दक्षिणा—दाक्षिण्यवती, सुचरित्रेति भावः, कामिनो मुखेन—वदनेन, दुःखनिश्वासं त्यजतीति अयमर्थोऽभिहित इति द्रष्टव्यम्। वृत्तमुपजातिः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"आच्छादिताऽऽयतदिगन्तरमुच्चकैर्गा-
माक्रम्य संस्थितमुदग्रविशालशृङ्गम्।
मूर्ध्नि स्खलत्तुहिनदीधितिकोटिमेन-
मुद्वीक्ष्य को भुवि न विस्मयते नगेशम्?" ॥ (१६)

[शिशुपालवधम्]

प्रथमे—दक्षिणाशब्दस्य प्रकरणवशात् तदभिधानदिग्रूपेऽर्थे नियमिते, व्यञ्जनया दाक्षिण्यशीलनायिकारूपोऽर्थः, द्वितीये च —नगेशशब्दस्य प्रकरणेन रैवतकपर्वतरूपेऽर्थे नियमिते, व्यञ्जनया शिवरूपोऽर्थो बोध्यते।

लक्षणामूलां व्यञ्जनामाह विश्वनाथः,—

"लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।
यया प्रत्याय्यते सा स्यात् व्यञ्जना लक्षणाऽऽश्रया॥"
(१७)

उपास्यते—आश्रीयते, विधीयते इति यावत्; प्रत्याय्यते—

(१६) आच्छादितेति।—भुवि—पृथिव्यां, कः,—जनः, आच्छादितं—व्याप्तम्, आयतं—दीर्घं, दिगन्तरं—दिग्भागो येन तथोक्तम्, उच्चकैः,—उन्नतं, गां—पृथिवीम्, आक्रम्य—अवष्टभ्य, संस्थितं—वर्तमानम्, उदग्राणि—उन्नतानि, विशालानि—महान्ति, शृङ्गाणि यस्य तादृशं, मूर्ध्नि—शिरसि, शिखरे इत्यर्थः, स्खलन्—गलन्, तुहिनदीधितेः,—चन्द्रस्य, कोटिः,—रश्मिः यस्य तथाविधम्, अत्युन्नतत्वादिति भावः, एनं नगेशं—पर्वतराजं, रैवतकमिति यावत्, उद्वीक्ष्य न विस्मयते?—न चित्रीयते? सर्व एव विस्मयं गच्छन्तीत्यर्थः। अत्र प्रकरणेन गोशब्देन पृथिवीरूपे, शृङ्गशब्देन अग्रभागरूपे, मूर्द्धशब्देन शिखररूपे, नगेशशब्देन पर्वतरूपे अर्थे नि'मिते, व्यञ्जनया उदग्रविशालशृङ्गम्—उन्नतवृहद्विषाणं, गां—वृषम्, आक्रम्य—आरुह्य, संस्थितं मूर्ध्नि—शिरसि, विराजितचन्द्रकलं, नगेशं—गिरीशम्, उद्वीक्ष्य—दृष्ट्वा, को—जनः, न विस्मयते? इति व्यङ्ग्यार्थः प्रकटित इति बोध्यम्। वसन्ततिलकं वृत्तम्।

(१७) लक्षणेति।—यस्य—प्रयोजनस्य, कृते—बोधनिमित्तं, लक्षणा उपास्यते—अङ्गीक्रियते, तत्तु प्रयोजनं यया प्रत्याय्यते—बोध्यते, सा लक्षणाऽऽश्रया—लक्षणामूला, व्यञ्जना स्यात्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बोध्यते। यथा,—"गङ्गायां घोषः" इत्यत्र प्रवाहविशेषरूपार्थबोधनादभिधायां, तटरूपार्थबोधनाल्लक्षणायाञ्च विरतायां, यया शीतत्वपावनत्वातिशयरूपं प्रयोजनं बोध्यते, सा लक्षणामूला व्यञ्जना।

आर्थीं व्यञ्जनामाह,—

"वक्तृबोद्धव्यवाक्यानां काकोश्चेष्टाऽऽदिकस्य च।
वैशिष्ट्यादन्यमर्थं या बोधयेत् साऽर्थसम्भवा॥"(१८)

[विश्वनाथः]

सा अर्थसम्भवा—आर्थी, व्यञ्जनेति शेषः। यं पुरुषं बोधयितुं शब्द उच्चार्य्यते, स बोद्धव्यः; काकुः,—ध्वनेर्विकारः; वैशिष्ट्यात्—विशिष्टयोगात्।

यथा,—"गतोऽस्तमर्कः" इति वाक्येन आस्तिके द्विजातौ वक्तरि प्रतिपाद्ये वा "सन्ध्यावन्दनस्यायमवसरः" इति; गोपालबालके वक्तरि प्रतिपाद्ये वा "संक्षिप्यन्तां गावो गृहं प्रतिनिवर्त्तामहे" इत्यादिका अर्था वक्त्रादिवैशिष्ट्यात् प्रतीयन्ते। यथा वा,—

"तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरैः।
विराटस्याऽऽवासे स्थितमनुचिताऽऽरम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ?॥" (१९)

[वेणीसं०]

(१८) वक्तृबोद्धव्येति।—वक्ता च बोद्धव्यश्च वाक्यञ्च तेषां, काकोः,—ध्वनिविकारविशेषस्य, ("काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः" इत्यमरः), चेष्टाऽऽदिकस्य च वैशिष्ट्यात्—विशिष्टयोगात्, या अन्यमर्थं बोधयेत्, सा अर्थसम्भवा—आर्थी, व्यञ्जनेति शेषः।

(१९) तथाभूतामिति।—सहदेवं प्रति भीमस्योक्तिः। नृपसदसि—राजसभायां,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र "मयि न योग्यः खेदः, कुरुषु तु योग्यः" इति काका प्रकाश्यते।

इति शब्दार्थनिरूपणं नाम द्वितीयशिखा।

तृतीयशिखा।

ध्वन्यादिभेदेन काव्यस्य भेदत्रयमाह,—

काव्यं ध्वनिर्गुणीभूत-व्यङ्ग्यं चित्रमिति त्रिधा। (१)

ध्वनिं लक्षयति विश्वनाथः,—

"वाच्यातिशायिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम्।"

न तु एकान्ते, नाप्यन्येषां क्षुद्राणां समीपे, सजातीयानां, विशेषतः प्रधानानां समक्षे अपमानमतिदुःखकरमिति भावः; तथाभूताम् अनुभूतप्रकारां, केशाम्बरयोराकृष्टाम् ऋतुमतीमेकवस्त्रामिति भावः; पाञ्चालतनयां—पञ्चालानां जनपदानां राजा तस्य तनयां, द्रौपदीमित्यर्थः, [अनेन आभिजात्यसूचनेनापि दुःखकरत्वं द्योतितम्]; तथा वने, न तु ग्रामे इति भावः; वल्कलधरैः,—वृक्षत्वक्परिहितैः, व्याधैः,—किरातैः; अथवा,—व्याधोपजीविकाधारिभिः अस्माभिः, सार्द्धं—सह, सुचिरं—न त्वल्पकालम्, उषितं—स्थितं, तथा विराटस्य आवासे—सदने, अनुचितः य आरम्भः,—कर्म, सूपकारत्वाऽऽदिकमिति भावः, तत्र निभृतं—समासक्तम्; यद्वा,—गुप्तं, जनैरपरिज्ञातं यथा तथेत्यर्थः, स्थितं, भ्रातरमिति शेषः, दृष्ट्वा—प्रत्यक्षमुपलभ्य, न तु श्रुत्वा इत्याशयः, गुरुः,—आर्य्यः, युधिष्ठिर इति यावत्, खिन्ने—सदुःखिते, तत्तत्प्रभावक्लेशं दृष्ट्वा स्वयञ्चानुभूय क्षुभिते इति यावत्, मयि [अनेन एवं-क्लेशे युष्माकं खेदाभावेऽपि आत्मनोऽसहिष्णुत्वं द्योतितम्]; खेदं—क्षोभं, भजति; अद्यापि—इदानीमपि, कुरुषु—एवं क्लेशदायिषु अपि धार्त्तराष्ट्रादिषु, न, खेदं भजतीति शेषः। कुरवस्तादृशनिकार-कारिणोऽपि न राज्ञः खेदं जनयन्ति, निकारक्षुभितं मां दृष्ट्वा खेदं करोति राजा, इत्यहो! महच्चित्रमिति काका व्यज्यते इति बोध्यम्। शिखरिणी वृत्तम्।

इति द्वितीयशिखा।

—०—

(१) काव्यमिति।—ध्वन्यते अस्मिन्निति ध्वनिः। अन्यत् स्पष्टम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यस्मिन् काव्ये व्यङ्ग्यार्थो वाच्यार्थादधिकचमत्कारी, तन्नाम ध्वनिः, तच्च उत्तमं काव्यम् ।

ध्वनिभेदौ,—

"भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाऽभिधामूलौ ।
अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च॥"(२)

[विश्वनाथः]

लक्षणामूलाऽभिधामूलौ (अविवक्षितवाच्यविवक्षितान्यपरवाच्यौ) ।

लक्षणामूलः अभिधामूलश्चेति ध्वनेर्द्वौ भेदौ, तौ च क्रमेण अविवक्षितवाच्यः, विवक्षितान्यपरवाच्यश्चेति नामभ्यामपि व्यपदिश्येते । तत्र अविवक्षितं—बाधितस्वरूपं, वाच्यं यत्र स अविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः, लक्षणामूलत्वा-देवात्र वाच्यमविवक्षितम् ।

अविवक्षितवाच्यस्य भेदावाह,—

स च द्विविधः,—अर्थान्तरसङ्क्रमितवाच्यः, अत्यन्ततिरस्कृत-वाच्यश्च ।

यदाह विश्वनाथः,—

"अर्थान्तरं सङ्क्रमिते वाच्येऽत्यन्तं तिरस्कृते ।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति ॥"(३)

अर्थान्तरसङ्क्रमितवाच्यमाह,—

यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपे अर्थान्तरे

(२) भेदाविति।—ध्वनेरपि लक्षणाऽभिधामूलौ द्वौ भेदौ उदीरितौ—कथितौ ; तत्र लक्षणामूलो नाम अविवक्षितवाच्यः, अभिधामूलो विवक्षितान्यपरवाच्यः।

(३) अर्थान्तरमिति ।—अविवक्षितवाच्योऽपि—लक्षणामूलोऽपि, ध्वनिः, वाच्ये—मुख्ये अर्थे, अर्थान्तरम्—अर्थविशेषं, सङ्क्रमिते—प्रविष्टे, अथवा अत्यन्तं—सर्वथा, तिरस्कृते—अपह्नुते, तिरोहिते इत्यर्थः, न केनापि रूपेण अन्वयं प्रविष्टे सति इति यावत्, द्वैविध्यं—द्वौ भेदौ, ऋच्छति—प्राप्नोति ; तथा च, अर्थान्तरसङ्क्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्यश्च इति फलितम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिणमति, तत्र मुख्यार्थस्य स्वविशेषरूपेऽर्थान्तरे सङ्क्रमितत्वात् दर्थान्तरसङ्क्रमितवाच्यत्वम्। यथा,—

"त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्॥" (४)

अत्र वचनादि उपदेशादिरूपतया परिणमति, सर्व्वोच्चे आत्मीयभावाऽऽद्यतिशयस्च व्यङ्ग्यः।

अत्यन्ततिरस्कृतवाच्यमाह,—

यत्र पुनः स्वार्थं सर्वथा परित्यजन्नर्थान्तरं बोधयति, तत्र मुख्यार्थस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वम्। यथा,—"उपकृतं बहु तत्र" इत्यादौ (७ पृ०) पूर्वमुक्ते। अत्राऽऽद्ये,—मुख्यार्थस्यार्थान्तरे सङ्क्रमणं—प्रवेशः, न तु तिरोभावः; अत एवात्र अजहत्स्वार्था लक्षणा। द्वितीये,—स्वार्थस्यात्यन्तं तिरस्कृतत्वाज्जहत्स्वार्था।

विवक्षितान्यपरवाच्यमाह,—

"विवक्षितञ्चान्यपरं वाच्यं यत्रापरस्तु सः।" (५)

[मम्मटः]

यत्र वाच्यं विवक्षितं—प्रकाशितस्वरूपं सत्, अन्यपरं—व्यङ्ग्यनिष्ठं, सोऽपरः,—विवक्षितान्यपरवाच्यो ध्वनिः। अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः। यथा—प्रदीपो घटस्य।

(४) त्वामिति।—अस्मीति अव्ययम्—अहमित्यर्थः, त्वां वच्मि—ब्रवीमि, अत्र विदुषां—पण्डितानां, समवायः,—समूहः, तिष्ठति, तत्—तस्मात्, आत्मीयाम्—आत्मने हितां, मतिम् आस्थाय—आश्रित्य, अत्र स्थितिं विधेहि—कुरु। अत्र विच्मीति कथनेनैव वच्मीत्यस्य निरर्थकत्वे मुख्यार्थबाधात् लक्षणया वचनस्य उपदेशरूपतया परिणामः, इत्यतः वचनस्य व्यापकस्य उपदेशरूपविशेषार्थे सङ्क्रमणमिति अर्थान्तरसङ्क्रमितवाच्यत्वमिति बोध्यम्। पथ्यावक्त्रं वृत्तम्।

(५) विवक्षितमिति।—यत्र वाच्यं विवक्षितं, किन्तु अन्यपरं—व्यङ्ग्यार्थबोधप्रवणं, स अपरः,—विवक्षितान्यपरवाच्य इत्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्विभागः,—

स च द्विविधः,—असंलक्ष्यक्रमव्यङ्ग्यः, संलक्ष्यक्रमव्यङ्ग्यश्च।

यदाह स एव,—

"कोऽप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः।"(६)

असंलक्ष्यक्रमव्यङ्ग्यः,—

न संलक्ष्यः —सम्यगनुभूयमानः, क्रमः,—प्रतीतिक्रमो यस्य तादृशं व्यङ्ग्यं यस्मिन् सः असंलक्ष्यक्रमव्यङ्ग्यः ; स च रसभावादिः। अत्र व्यङ्ग्यप्रतीतेर्विभावादिप्रतीतिकारणकत्वात् (७) क्रमोऽवश्य-मस्त्येव, किन्तु उत्पलपत्रशतव्यतिभेदवल्लाघवान्न संलक्ष्यते।

अथ रसनिरूपणम्,—

अथ कोऽयं नाम रसः ? के च विभावादयः ? इत्याहुर्मम्मट-भट्टपादाः,—

"कारणान्यथ कार्य्याणि सहकारीणि यानि च।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥
विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥"

रत्यादेरित्यादिपदेन हासोत्साहादयो गृह्यन्ते। लौकिके उत्साहादीनां वक्ष्यमाणानां स्थायिभावानां यानि कारणानि—उत्पादकरूपाणि नायकप्रतिनायकादीनि, उद्दीपनरूपाणि—

---

(६) क इति।—अलक्ष्यः,—अननुभवनीयः, क्रमः,—पौर्वापर्य्यं यस्य तादृशं व्यङ्ग्यं यत्र सः अलक्ष्यक्रमव्यङ्ग्यः। लक्ष्यः क्रमो यस्य तादृशं व्यङ्ग्यं यत्र सः लक्ष्य-क्रमव्यङ्ग्य इति।

(७) स चेति।—स च व्यङ्ग्य इत्यर्थः। विभावादीति।—विभावादयः,—विभावानुभावव्यभिचारिणः, तेषां प्रतीतिः,—बोधः, कारणं यस्य तत्त्वात्; तदुक्तं नाट्यशास्त्रे षष्ठाध्यायस्य द्वात्रिंशच्छ्लोकानन्तरस्थे चूर्णके,—"विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिः" इति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नायकप्रतिनायकचेष्टाऽऽदीनि, यानि कार्य्याणि—विपच्चाभिमुखगमनादीनि, यानि च सहकारीणि—सहायभूतानि धृतिगर्वादीनि, तानि नाट्ये, काव्ये च चेन्निबध्येरन्, क्रमेण विभावाः, अनुभावाः, व्यभिचारिणश्च कथ्यन्ते। तैर्विभावादिभिर्व्यक्तः,—स्फुटीकृतः, विलक्षणप्रतीतिविषयीकृत इति यावत्, स्थायी भावः रसः कथितः। (८)

रसभेदाः,—

तद्विशेषानाह,—

"आदिमो हास्यकरुण-रौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ काव्ये रसाः स्मृताः॥"

[मम्मटः]

एषां क्रमेणोदाहरणानि।

आदिमस्य,—

"विवृण्वती शैलसुताऽपि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः।
साचीकृता चारुतरेण तस्थौ मुखेन पर्य्यस्तविलोचनेन॥" (९)

[कुमा०]

(८) कारणानीति।—कारणानि—हेतुभूतानि आलम्बनरूपाणि नायकप्रतिनायकादीनि, उद्दीपनरूपाणि—तच्चेष्टादीनि; विभाव्यन्ते—काव्यनाट्यनिवेशितत्वेन विलक्षणत्वेन भाव्यन्ते—प्रतीतिविषयीक्रियन्ते, सहृदयैरिति विभावाः, अनु—पश्चात्, भवन्तीति अनुभावाः,—विभावत्वं गतानां नायकादीनां धर्मविशेषा इति यावत्, विशेषेण आभिमुख्येन—परिपोषकत्वेनेति यावत्, चरन्तीति व्यभिचारिणः; तैः,—विभावाद्यैः,व्यक्तः,—स्फुटीकृतः,स्फुटतामापादितः इत्यर्थः, विलक्षणप्रतीतिविषयीकृतः,—अलौकिकत्वेन बोधित इत्यर्थः, तिष्ठतीति स्थायी—यावत् सन्दर्भं स्थित इत्यर्थः।

(९) विवृण्वती इति।—शैलसुता—पार्वती, अपि स्फुरन्ति—विकसन्ति,यानि बालकदम्बानि—अभिनवकदम्बपुष्पाणि, तेभ्यः ईषदूनानि तैः, कदम्बकुसुमसदृशैरित्यर्थः, सञ्जातरोमाञ्चैरिति भावः, अङ्गैः,—अवयवैः, भावं—रत्याख्यं, विवृण्वती—प्रकाशयन्ती, पर्य्यस्ते—परितः क्षिप्ते, हरादन्यस्मिन् चालिते इत्यर्थः, विलोचने—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हास्यस्य,—

"भिक्षो! मांसनिषेवणं प्रकुरुषे? किं तेन मद्यं विना?
मद्यञ्चापि तव प्रियम्? प्रियमहो! वाराङ्गनाभिः सह।
तासामर्थरुचिः कुतस्तव धनम्? द्यूतेन चौर्य्येण वा,
चौर्य्यद्यूतपरिग्रहोऽपि भवतः? नष्टस्य काऽन्या गतिः॥" (१०)

करुणस्य,—

"अदृष्टदुःखो धर्माऽऽत्मा सर्वभूतप्रियंवदः।
मयि जातो दशरथात् कथमुञ्छेन वर्त्तयेत्?॥
यस्य भृत्याश्च दासाश्च स्वादून्यन्नानि भुञ्जते।
कथं स भोक्ष्यते रामो वने मूलफलान्ययम्?॥" (११) [रामा०]

नेवे यस्य तादृशेन, अत एव चारुतरेण—अतिमनोहरेण, मुखेन, साचीकृता—वक्रीकृता, लज्जया परावृत्तमुखी सतीति भावः, तस्थौ—स्थिता। अत्र स्थायिभावरूपा रतिः शङ्कररूपविभावेन, पार्वत्याश्च अङ्गानां रोमाञ्चादयरूपानुभावेन, पर्य्यस्तविलोचनत्वादिना लज्जारूपव्यभिचारिभावेन परिपुष्टा आदिरसत्वमापद्यते इति बोध्यम्। उपजातिः वृत्तम्।

(१०) भिक्षो इति।—भिक्षुविषयिणीउक्तिप्रत्युक्ती। हे भिक्षो! मांसनिषेवणं—मांसभोजनं, प्रकुरुषे? इत्युक्तिः; मद्यं विना तेन—मांसेन, किम्? विना मद्यं मांसभोजनं वृथेत्यर्थः, इति प्रत्युक्तिः। मद्यञ्चापि तव प्रियम्?—प्रीतिकरम्? इत्युक्तिः; अहो! वाराङ्गनाभिः,—वेश्याभिः, सह प्रियं, मद्यमिति शेषः, केवलं मद्यं न मम प्रियं, वाराङ्गनाऽऽमोदसहितं मद्यं मम प्रियमित्यर्थः, इति प्रत्युक्तिः। तासां—वाराङ्गनानाम्, अर्थरुचिः,—धनलोभः, विना धनं ता न प्रसीदन्तीति भावः, तव धनं कुतः?—धनं नास्तीत्यर्थः, भिक्षुत्वादिति भावः, इत्युक्तिः। द्यूतेन चौर्य्येण वा, धनम् उपार्ज्यते मयेति शेषः, इति प्रत्युक्तिः। भवतः,—तव, चौर्य्यद्यूतपरिग्रहोऽपि?—चौर्य्यं द्यूतञ्च भवता क्रियते? इत्युक्तिः; नष्टस्य—दुर्वृत्तस्य, अन्या—अपरा, गतिः,—सरणिः, का?—नैवेत्यर्थः, इति प्रत्युक्तिः। अत्र तथाविधभिक्षुरालम्बनविभावः, तस्य च मांसनिषेवणादिकमनुभावः, तत्तत्कार्य्यप्रवृत्तिकीर्त्तनेनाऽऽचिप्ता चपलता व्यभिचारिभावः, एतैः परिपुष्टो हासः सहृदयानां हास्यरसत्वमापद्यते इति बोध्यम्। शार्दूलविक्रीड़ितं वृत्तम्।

(११) अदृष्टेति।—कौशल्याया उक्तिरियम्। न दृष्टं दुःखं येन सः अदृष्ट-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रौद्रस्य,—

"कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्य्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥" (१२) [वेणी०]

वीरस्य,—

"क्षुद्राः ! सन्त्रासमेते विजहित हरयः ! क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।

दुःखः,—कदाऽपि अप्राप्तदुःखः, धर्मात्मा—धार्मिकः, सर्वभूतप्रियंवदः,—सर्वजनवत्सल इति भावः, मयि—कौशल्यायामित्याशयः, दशरथात् जातः, राम इति शेषः, कथ—केन प्रकारेण, उञ्छेन—क्षेत्रपतितैककणान्वेषणेनेत्यर्थः, वर्त्तयेत् ?—वृत्तिं—जीविकां, कुर्यादित्यर्थः । यस्येति ।—यस्य भृत्याः,—परिजनाः, दासाः,—किङ्कराश्च, स्वादूनि—मधुराणि, अन्नानि भुञ्जते, सोऽयं रामः वने मूलफलानि कथं भोक्ष्यते ? अत्र राम आलम्बनविभावः, तस्य उञ्छवृत्त्या जीवनादिकमनुभावः, कौशल्याया विषादाऽऽवेगादिकञ्चाऽऽक्षिप्तं व्यभिचारिभावः, तैः परिपुष्टः सामाजिकानां शोकः करुणरसत्वमापद्यते इति बोध्यम् । पथ्यावक्त्रं वृत्तम् ।

(१२) कृतमिति ।—मृतकर्णनिरस्तद्रोणशिरश्छेदक्रुद्धस्य अश्वत्थाम्नः पाण्डवान् प्रति सम्बोध्योक्तिरियम् । यैः निर्मर्य्यादैः,—मर्य्यादा—धर्मव्यवस्था, तद्रहितैरित्यर्थः, सङ्ग्राममर्य्यादामतिक्रान्तैरिति भावः, (न्यस्तशस्त्रस्य हनने हि युद्धशास्त्रे मर्य्यादाऽतिक्रमः प्रसिद्धः); मनुजपशुभिः,—पशुरूपैर्मनुष्यैः, उदायुधैः,—उद्धृतशस्त्रैः, भवद्भिः इदं गुरुपातकं—महापातकम्, आचार्य्यहननरूपमिति भावः, कृतम्—अनुष्ठितम्, अनुमतं वा—अनुमोदितं वा, दृष्टं वा—प्रत्यक्षीकृतं वा, अयम् अहम्—अस्मिन् क्षणे एतत्स्थानवर्त्ती एव अहमित्यर्थः, नरकरिपुणा—कृष्णेन, सार्द्धं, सभीमकिरीटिनां—कृष्णभीमार्जुनसहितानामित्यर्थः, तेषां—भवतामित्यर्थः, असृङ्मेदोमांसैः,—रक्तवसामांसैः, दिशां—दिग्देवतानां, बलिं—पूजां, ("बलिः पूजोपहारयोः" इत्यमरः) करोमि, तान् नाशयामीति भावः । अत्रार्जुनादय आलम्बनविभावः, अधर्मेण पितृनिहन्तॄणां तर्जनाऽऽद्यनुभावः, अश्वत्थाम्नो गर्वामर्षादिकं व्यभिचारिभावः, एतैः परिपुष्टः कोपः स्थायिभावः सामाजिकानां रौद्ररसत्वमायातीति बोध्यम् । हरिणी वृत्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सौमित्रे! तिष्ठ, पात्रं त्वमसि न हि रुषां, नन्वहं मेघनादः
किञ्चित् भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि॥" (१३)
[महाना०]

भयानकस्य,—
"नष्टं वर्षवरैर्मनुष्यगणनाऽभावादपास्य त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः।
पर्य्यन्ताऽऽश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाऽऽशङ्किनः॥"(१४)
[रत्नावली]

---

(१३) क्षुद्रा इति।—हे क्षुद्राः!—जात्या पराक्रमाभावेन च नीचाः! हरयः!—कपयः! एते—दृश्यमानदूरवस्थाः, यूयम् इति शेषः, सन्त्रासं—भयं, विजहित—त्यजत, क्षुण्णौ—पीडितौ, विद्धौ इत्यर्थः, शक्रस्य—इन्द्रस्य, इभकुम्भौ—ऐरावतकुम्भौ यैः तथाभूताः, अमी सायकाः,—शराः, ममेति शेषः, [स्यन्ति नाशयन्ति प्राणान् ये ते सायकाः, षोऽन्तकर्मणि ण्वुल्। तालव्यादिपाठे तु—शाययन्ति—दीर्घनिद्रां प्रापयन्तीति व्याख्येयम्]। निष्पतन्तः,—मच्चापात् निर्गच्छन्तः, युष्मद्देहेषु—युष्मद्देहविषये, परम्—अत्यर्थं, लज्जां दधति—धारयन्ति ; न तु पाताऽऽभिमुख्यं पौरुषं वा। ["युष्मद्देहेषु निष्पतन्तः" इति तु नान्वयः ; निष्पतनपदस्य पूर्वदेशविभागकत्वेन देहरूपोत्तरदेशसंयोगार्थकत्वाभावात् ; निरुपसर्गपतनपदस्य तथाऽर्थत्वात्]। हे सौमित्रे!—लक्ष्मण! [एव मातृमम्बन्धकीर्तनम् अवीरत्वख्यापनाय] ; तिष्ठ. त्वं, रुषां—क्रोधानां, मदीयानामिति शेषः, पात्रं—भाजनं, न हि असि,—नैव भवसि, ननु—भोः! अहं मेघनादः,—मेघ इव नदतीति तथोक्तः, भ्रूभङ्गलीलया—कोपजनितभ्रूसङ्कोचमात्रेणैव, नियमितः,—बद्धः, जलधिः,—समुद्रः येन तादृशं, रामं किञ्चित् अन्वेषयामि—अनुसन्दधामि ; सोऽपि न सामस्त्येन मम अन्वेषणपात्रमिति भावः। [किञ्चिद्भ्रूभङ्गेति तु नान्वयः ; तदपेक्षया दर्शितान्वये एव गर्वाऽऽधिक्यात्। पुरा यदा महता प्रयासेनापि सेतुर्बन्द्धुं न शक्तः,तदा कुपितं रामं वीक्ष्यैव स्वयं समुद्रः समागत्य चरणनिपतितः कोपं सान्त्वयन्, स्वयमेवाऽऽत्मानं बन्धनाय दत्तवानिति कथाऽत्रानुसन्धेया]। अत्राऽऽलम्बनविभावो रामः, क्षुद्रेषूपेक्षापूर्वकं रामविषयककिञ्चिदन्वेषणरूपप्रतिस्पर्द्धनमनुभावः, ऐरावतगण्डस्थलभेदनस्मृतिः लज्जां दधातीति व्यङ्ग्यो गर्वश्च व्यभिचारिभावः, एतैः परिपुष्टः मेघनादोत्साहः सामाजिकानां वीररसत्वं लभते इति बोध्यम्। स्रग्धरा वृत्तम्।

(१४) नष्टमिति।—अश्वशालाया वसन्तकस्य वानरवेषेण निर्गमे वर्णनमिदम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बीभत्सस्य,—

"उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोथभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाऽऽद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।
अन्तःपर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥" (१५)

[मालतीमाधवम्]

वर्षवरैः,—क्लीबैः, मनुष्यगणनाऽभावात्—मनुष्येषु अगण्यत्वादित्यर्थः, त्रपां—लज्जाम्, अपास्य—त्यक्त्वा, त्रासात्—भयात्, [इदं परतोऽप्यन्वेति]; नष्टं—पलायितम्। अयं वामनः,—खर्वपुरुषः, कञ्चुकिनः,—"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः। सर्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते॥" इत्युक्तलक्षणस्य पुरुषस्य, यः कञ्चुकः,—वारबाणः, वर्म इति यावत्, ("कञ्चुको वारबाणोऽस्त्री" इत्यमरः) तस्य अन्तः,—अभ्यन्तरे, विशति—प्रविशति। पर्य्यन्ताऽऽश्रयिभिः,—नगरप्रान्तवासिभिः, किरातैः,—व्याधैः, निजस्य—स्वस्य, नाम्नः,—किरातेत्यस्य, किरं—प्रान्तदेशम्, अतन्ति—गच्छन्तीति व्युत्पत्तिलभ्यार्थस्येत्यर्थः, सदृशम्—उचितं कर्म, कृतम्; पर्य्यन्तेषु पलायितमिति भावः। कुब्जाः,—उन्नतपृष्ठाऽऽनतक्रोड़पुरुषविशेषाः, आत्मनः ईक्षणं—दर्शनं, वानरकर्तृकमिति भावः, तस्मात् आशङ्कन्ते इति तथोक्ताः सन्तः, नीचतया—सङ्कुचिततयैव, शनकैः,—मन्दं मन्दं, यान्ति—गच्छन्ति। अत्र वानरनिर्गम आलम्बनं विभावः, तत्कार्य्यमुल्लम्फनादिकमनुभावः, वर्षवरादीनां त्रासाऽऽवेगादिकं व्यभिचारिभावः, एतैः परिपुष्टा भीतिः सामाजिकानां भयानकरसत्वमायातीति बोध्यम्। शार्दूलविक्रीड़ितं वृत्तम्।

(१५) उत्कृत्येति।—प्रेतरङ्कः,—प्रेताधमः, प्रथमम्—आदौ, कृत्तिं—चर्म, उत्कृत्य उत्कृत्य—छित्त्वा छित्त्वा, अथ—अनन्तरं, पृथुभिः,—महद्भिः, उच्छोथैः,—स्फीतताभिः, भूयांसि—प्रभूतानि, अंसः,—स्कन्धः, स्फिक्—नितम्बः, पृष्ठपिण्डाऽऽदयश्च, [आदिना ऊर्वादेः परिग्रहः]; तेषु अंसादिषु, अवयवेषु—अङ्गेषु, सुलभानि—सुप्रापाणि, उग्रपूतीनि—उत्कटदुर्गन्धानि, मांसानि जग्ध्वा—भक्षयित्वा, अन्तः,—अभ्यन्तरे, शवस्येति शेषः, ["अन्तः" इत्यत्र "आर्त्तः" इति पाठान्तरे—पीड़ित इत्यर्थः]; पर्य्यस्ते—परितः,—समन्ततः, अस्ते—पातिते, प्रबलपिशाचान्तरद्वाराऽपहरणत्रासादिति भावः, नेत्रे येन तथोक्तः, तथा प्रकटिताः,—आविष्कृताः, प्रकाशिता इत्यर्थः, दशनाः,—दन्ताः येन तथाविधः सन्, अङ्कस्थात्—क्रोड़स्थात्, करङ्कात्—अस्थिशेषात्, शवात्, शिरोभागाद्वा,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्भुतस्य,—

"मानुषीभ्यः कथं नु स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥" (१६) [अभि० श०

एषां क्रमेण स्थायिभावानाह मम्मटः,—

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चैव स्थायिभावाः प्रकीर्त्तिताः॥"

व्यभिचारिभावान् कथयति स एव,—

"निर्वेदग्लानिशङ्काऽऽख्यास्तथाऽसूयामदश्रमाः।
आलस्यञ्चैव दैन्यञ्च चिन्ता मोहः स्मृतिर्धृतिः॥
व्रीड़ा चपलता हर्ष आवेगो जड़ता तथा।
गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च॥
सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः॥" *

---

* विपत्पातेन तत्त्वज्ञानादिना वा स्वावमानना निर्वेदः, परगुणादीनामसहिष्णुता असूया, मद्योपयोगेन चित्तविकाशो

("करङ्कोऽस्थिशेषे" "करङ्कः प्रेतशरीरम्" "करङ्को मस्तके" इति च कोषः) अस्थि-संस्थं—कङ्कालान्तर्गतं, तथा स्फुटगतमपि—अस्थिसन्धिस्थितमपि, क्रव्यम्—अपक्वमांसम्, अव्यग्रं—व्यग्रतारहितं यथा तथा, भोजनसमाप्तिभयात् शनैः शनैरिति भावः, अत्ति—भक्षयति। अत्र प्रेतरङ्क आलम्बनविभावः, तस्य तथाविधमांसभक्षणादि-चेष्टाऽऽदिकमनुभावः,तस्य च हर्षाऽऽदयो व्यभिचारिभावाः,एतैः परिपुष्टो जुगुप्साऽऽख्यः स्थायिभावः बीभत्सरसत्वं प्रतिपद्यते इति बोध्यम्। स्रग्धरा वृत्तम्।

(१६) मानुषीभ्य इति।—श्लोकोऽयं (२ पृष्ठे) पूर्वं व्याख्यातः। अत्र शकुन्तला आलम्बनविभावः, तस्याः तथाविधरूपविलासादिकमनुभावः, औत्सुक्याऽऽदयो व्यभिचारिणः, तैः परिपुष्टो विस्मयाऽऽख्यः स्थायिभावः सामाजिकानाम् अद्भुतरसत्वमापद्यते इति बोध्यम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नवमः शान्तरसः,—

"निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः॥"

[मम्मटः]

यथा,—

"अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित् पुण्येऽरण्ये शिव! शिव! शिवेति प्रलपतः॥" (१७)

[वैरा० शत०]

वत्सलरसः,—

"केचिच्चमत्कारितया वत्सलञ्च रसं विदुः॥"

[विश्वनाथः]

मदः, अभीष्टलाभादिना सम्पूर्णस्पृहता धृतिः, ग्रहाऽऽद्यावेशादिना मनःक्षेपः अपस्मारः, निद्रागतस्य विषयानुभवः सुप्तं, निन्दादिकर्त्तुर्वैरनिर्य्यातननिश्चयः अमर्षः, लज्जादिना हेतुना हर्षाऽऽद्याकारगोपनम् अवहित्थं, नीतिमार्गानुसरणादिनाऽर्थनिर्द्धारणं मतिः। अन्यत् स्पष्टम्।

---

(१७) अहाविति।—अहौ वा—सर्पे वा, हारे—मुक्तादिरचितकण्ठाऽऽभरणे वा, कुसुमशयने—पुष्पशय्यायां वा, दृषदि—पाषाणे वा, मणौ—हीरकादिरत्ने वा, लोष्टे—मृत्पिण्डे वा, बलवति रिपौ—शत्रौ वा, सुहृदि—मित्रे वा, तृणे वा, स्त्रैणे—स्त्रियां वा, [स्त्रीशब्दात् स्वार्थे णप्रत्ययः]। समदृशः,—समा—भुजग-मुक्ताकलापादिकयोर्विरुद्धयोरपि अविषमा, परित्याज्योपादेयत्वाभावेन निर्विशेषेति यावत्, दृक्—दर्शनं, ज्ञानमिति यावत्, यस्य तथोक्तस्येत्यर्थः, मम क्वचित्—कुत्रापि, पुण्ये—पवित्रे, अरण्ये—कानने, शिव शिव शिवेति प्रलपतः,—प्रलापं कुर्वतः सतः, दिवसा यान्तु—गच्छन्तु। अत्र अहिहारादेः मिथ्यात्वेन दर्शनमालम्बनविभावः, तत्र सर्वत्र समदर्शनमनुभावः, हर्षप्रबोधाऽऽदयो व्यभिचारिणः, एतैः परिपुष्टो निर्वेदः शान्तरसत्वमायातीति बोध्यम्। शिखरिणी वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा,—"यदाह धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः ॥" (१८) [रघु०]

संलक्ष्यक्रमव्यङ्ग्यमाह,—

"यत्र व्यङ्ग्यप्रतीतेस्तु क्रमः सम्यग्विभाव्यते ।
स संलक्ष्यक्रमव्यङ्ग्यस्तद्भेदा बहवः स्मृताः ॥"

यथा पूर्वोदाहृते (११ पृ०) "कुबेरगुप्ताम्" इत्यादिश्लोके दक्षिणाशब्देन दाक्षिण्यशीलनायिकारूपं वस्तु व्यज्यते । अयञ्च शब्दशक्त्युद्भवो वस्तुध्वनिः ।

गुणीभूतव्यङ्ग्यमाह,—

"अनुत्तमे गुणीभूत-व्यङ्ग्यं व्यङ्ग्ये तु वाच्यतः ।"

व्यङ्ग्ये—व्यङ्ग्यार्थे, वाच्यतः,—वाच्यार्थात्, अनुत्तमे—अनधिकचमत्कारिणि सति, गुणीभूतव्यङ्ग्यम् ; तच्च मध्यमं काव्यं कथ्यते । यथा,—

"अत्राऽऽसीत् फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढ़ं वक्षसि ताड़िते हनुमता द्रोणाद्रिरत्राऽऽहृतः ।

(१८) यदाहेति ।—सः अर्भकः,—शिशुः, रघुरित्यर्थः,—धात्र्या—उपमात्रा, प्रथमम् उदितं—प्रथमतः शिक्षितं, वचः यत् आह—ब्रवीति स्म, तदीयां—धात्रीसम्बन्धिनीम्, अङ्गुलिम् अवलम्ब्य—आश्रित्य, ययौ—गच्छति स्म, प्रणिपातशिक्षया—प्रणामशिक्षणेन, एवं गुरवः प्रणम्या इत्युपदेशिनेत्यर्थः, यश्च नम्रः,—नतशिरा इत्यर्थः, अभूत्, तेन—हेतुना, पितुः,—जनकस्य, दिलीपस्य इत्याशयः, मुदम्—आनन्दं, ततान—विस्तारयामास, जनयामासेत्यर्थः । अत्रार्भक आलम्बनविभावः, तस्य चेष्टाऽऽदिकमनुभावः, हर्षादयश्च व्यभिचारिणः, एतैः परिपुष्टः स्नेहाऽऽख्यः स्थायिभावः वत्सलरसत्वमापद्यते इति बोध्यम् । वंशस्थविलं वृत्तम् ।

(१९) अत्रेति ।—रावणकुलं निहत्य पुष्पकरथेन सपरिजनमयोध्यां प्रतिगच्छता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizaqtion by eGangotri

दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं लम्भित:
केनाप्यत्र मृगाक्षि ! राक्षसपते: कृत्ता च कण्ठाटवी ॥"(१९)

[बालरामायणं नाटकम्। १० अङ्क० २० श्लोक:]।

अत्र अनुनायकोपनायकप्रतिनायकेषु निर्दिष्टेषु चतुर्थपादे नायको राम एवार्थशक्त्या प्रतीयते, स च केनापीत्युपादानेन वाच्यायमानतयाऽगूढ़: कृत इति व्यङ्ग्यस्य चमत्कारित्वमपनीतम्।

चित्रकाव्यमाह,—

"व्यङ्ग्यार्थहीनं काव्यं यत् तत्तु चित्रमिति स्मृतम् ॥"

चित्रमिति—गुणालङ्कारयुक्तं, व्यङ्ग्यार्थहीनं—स्फुटप्रतीयमानव्यङ्ग्यार्थरहितम्; तच्च अधमं काव्यमुच्यते।

तस्य भेदावाह,—

"शब्दचित्रं वाच्यचित्रं द्विविधं तत् प्रकीर्त्तितम्।"

यत्र वाच्यार्थात् शब्दस्य प्राधान्येन चमत्कारित्वं, तत् शब्दचित्रम्। यथा,—

"कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक-
स्तम्बाऽऽडम्बरमूकमौकुलिकुल: क्रौञ्चावतोऽयं गिरि:।

रामेण सीतां प्रत्युक्तमिदम्। हे मृगाक्षि !—मृगनयने ! अत्र—अस्मिन् स्थाने, फणिपाशबन्धनविधि:,—नागपाशास्त्रबन्धनव्यापार:, आसीत्; अत्र भवद्देवरे—भवत्या देवरे—लक्ष्मणे, शक्त्या—तदाख्यास्त्रविशेषेण, वक्षसि [अवच्छेदे सप्तमी] गाढ़ं यथा तथा ताड़िते—प्रहृते सति, रावणेनेति शेष:, हनुमता द्रोणाद्रि:,—गन्धमादनगिरि:, आहृत:,—आनीत:, अत्र दिव्यै:,—अत्युत्कृष्टैरित्यर्थ:, लक्ष्मणशरै: इन्द्रजित् लोकान्तरं—परलोकं, लम्भित:,—प्रापित:, निहत: इत्यर्थ:; अत्र केनापि—अनेन राक्षसपते:,—रावणस्य, कण्ठाटवी—कण्ठवनं, कृत्ता—छिन्ना च। स्वमुखेन आत्मपौरुषोत्कीर्त्तनस्य अनौचित्यात् रामेणात्र मया इति नोक्त्वा केनापीति भङ्ग्या विन्यस्तमिति ध्येयम्। शार्दूलविक्रीड़ितं वृत्तम्।

(२०) कूजदिति।—कूजन्तीनां—रटन्तीनां, कुञ्जकुटीरेषु—लतादिवेष्टित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै-
रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः ॥" (२०) [उ० च०]

यत्र शब्दात् वाच्यार्थस्य प्राधान्येन चमत्कारित्वं, तद्वाच्यचित्रम्। यथा,—

"ते दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च ?।
नीचाः सदैव सविलासमलीकलग्ना
ये कालतां कुटिलतामिव न त्यजन्ति ॥" (२१)

इति काव्यप्रभेदनं नाम तृतीयशिखा।

स्थानरूपसुदृगृहेषु, कौशिकघटानां—पेचकसङ्घानां, ("महेन्द्रगुग्गुलूलूक-व्यालग्राहिषु कौशिकः" इत्यमरः) घुत्कारः,—शब्दविशेषः, तद्वन्तः ये कीचकाः,—वेणुविशेषाः, ("वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इत्यमरः) तेषां स्तम्बाऽऽडम्बरेषु—गुच्छविस्तारेषु, मूकानि—पेचकभयात् निःशब्दानि, मौकुलिकुलानि—काकसमूहाः यत्र तथाभूतः; कुञ्जस्थाः पेचकाः कूजन्ति, वंशगुच्छप्रतिहततत्प्रतिशब्दश्रवणेन वायसा भीताः सन्तः निःशब्दास्तिष्ठन्तीति समुदायार्थः; अयं—पुरोवर्त्ती इत्यर्थः, क्रौञ्चावतः,—क्रौञ्चाः,—पक्षिविशेषा अत्र सन्तीति क्रौञ्चावान्, स एव इति [प्रज्ञादित्वात् स्वार्थेऽण्] तदोक्तः नाम गिरिः, दृश्यते इति शेषः; एतस्मिन्—गिरौ, प्रचलताम्—इतस्ततः सञ्चरतां, प्रचलाकिनां—मयूराणां, ("प्रचलाकिसितापाङ्ग-शिखावलगतस्रताः" इति त्रिकाण्डशेषः) कूजितैः,—ध्वनिविशेषैः, उद्वेजिताः,—उद्वेगं प्रापिताः, कुम्भीनसाः,—क्रूरसर्पाः, ("कुम्भीनसः क्रूरसर्पे—" इति मेदिनी) पुराणानां चन्दनतरूणां स्कन्धेषु—काण्डाग्रभागेषु, शाखोद्गमस्थानेष्विति यावत्, उद्वेल्लन्ति—विलीयन्ते। शार्दूलविक्रीड़ितं वृत्तम्।

(२१) ते इति।—ते—सकलवशीकरणसमर्थाः इत्यर्थः, पक्ष्मलदृशां—पक्ष्मले—प्रशस्तनेत्रलोमशालिन्यौ, दृशौ—नेत्रे यासां तथाभूतानां, सुनयनानामित्यर्थः, नारीणामिति शेषः, अलकाः,—चूर्णकुन्तलाः, खलाः,—दुर्जनाश्च, दृष्टिमात्रपतिताः,—दृग्गोचरतां गता अपि, न पुनः मनसा भावितस्वरूपाः व्यवहारगोचरा वा, अत्र—संसारे, कस्य—जनस्य, क्षोभाय—मनोविकाराय, असुखत्वाय च, न? अपि तु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुर्थशिखा ।

अथ दृश्यश्रव्यभेदेन काव्यविभागः,—

एवं ध्वनिगुणीभूतव्यङ्ग्यचित्रत्वेन काव्यस्य भेदत्रयमुक्त्वा, पुनर्दृश्यश्रव्यत्वभेदेन भेदद्वयमाह.—

"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।"

[विश्वनाथः]

दृश्यकाव्यलक्षणम्.—

"दृश्यं तत्राभिनेयं तद्रूपाऽऽरोपात्तु रूपकम् ॥" (१)

[विश्वनाथः]

अभिनेयम्—अभिनययोग्यं, तच्च दृश्यं काव्यं, नटैः रामाऽऽदिस्वरूपाऽऽरोपाद्रूपकमिति च कथ्यते ।

अभिनयस्य स्वरूपं भेदाश्च कथ्यन्ते,—

"भवेदभिनयोऽवस्थाऽनुकारः स चतुर्विधः ।
आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा ॥",

सर्वस्यैव क्षोभाय, भवन्तीति शेषः ; ये—अलकाः, खलाश्च, नीचाः,—नताः, अधोगामिनः इत्यर्थः ; क्षुद्राश्च, अनुन्नाऽऽशया इत्यर्थः, तथा सदैव—सर्वदैव, सविलासं—विलाससहितं यथा तथा, अलीकलग्नाः,—भालस्थिताः, ("ललाटमलिकं गोधिः" इत्यमरः) मिथ्याप्रतारणाऽऽदिरताश्च सन्तः, कालतां—कृष्णवर्णतां, भयानकत्वेन यमस्वरूपताञ्च, कुटिलतामिव—कौटिल्यमिव, भङ्गिवत्त्वमिवेत्यर्थः ; खलत्वमिव च, न त्यजन्ति । स्वभाववक्राणां केशानामिव कुटिलाऽऽशयानां स्वभावाः दुस्त्यजा इति भावः । वसन्ततिलकं वृत्तम् ।

इति तृतीयशिखा ।

---

(१) दृश्यमिति ।—दृश्यं—दर्शनीयं, तत्र—तयोः, दृश्यश्रव्ययोर्मध्ये इत्यर्थः; अभिनेयम्—अभिनयार्हम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नटैरङ्गेन, वाचा, वस्त्रालङ्कारादिभिः, मानसभावैश्च राम-युधिष्ठिराऽऽदीनामवस्थाऽनुकरणमभिनयः ।

दृश्यकाव्यानि कानिचित् रूपकनाम्ना, अपराणि उप-रूपकनाम्ना कथ्यन्ते । तत्र रूपकाणि—नाटकप्रकरणप्रहसन-प्रभृतीनि दशविधानि, उपरूपकाणि च—नाटिकात्रोटका-ऽऽदीनि अष्टादशभेदानि । विशेषं विना सर्वेषामेव स्वरूपं नाटकलक्षणसमानम् ।

नाटकलक्षणमाह विश्वनाथः,—

"नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।
विलासर्द्ध्यादिगुणवत् युक्तं नानाविभूतिभिः ॥
सुखदुःखसमुद्भूति नानारसनिरन्तरम् ।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको*मतः ॥

नायकलक्षणमाह विश्वनाथः,—

* "त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता ॥"

(२) नाटकमिति ।—ख्यातं—प्रसिद्धं, महाभारतादिष्विति शेषः, वृत्तं—चरितं यस्य तादृशं, पञ्चभिः सन्धिभिः,—वक्ष्यमाणैः मुखाऽऽदिभिः, समन्वितं—युक्तं, विलासः,—"धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः" इत्युक्तलक्षणः नायकस्य गुणविशेषः. ऋद्धिः,—सम्पत, तदादयो गुणाः सन्त्यवेति तथोक्तं. नानाविभूतिभिः,—विविधैरैश्वर्य्यैः, युक्तं, सुखस्य दुःखस्य तयोः समुद्भूतिः,—सम्यगुत्पत्तिः यस्मिन् तथोक्तं, नानारसैः,—शृङ्गारादिभिः, निरन्तरम्—अविच्छिन्नं, नाटकं, स्यात् । तत्र—नाटके, पञ्चाऽऽदिकाः दशपराः,—पञ्चाऽऽरभ्य दशपर्य्यन्ताः, अङ्काः,—तदाख्याः परिच्छेदाः, परिकीर्त्तिताः,—उक्ताः ; पञ्चाङ्कं, षडङ्क,सप्ताङ्कम्, अष्टाङ्कं,नवाङ्कं.दशाङ्कञ्च भवतीत्यर्थः । प्रख्यातः,—प्रसिद्धः, वंशो यस्य तादृशः, राजा ऋषिरिवेति राजर्षिः,—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चत्वारः पञ्च वा मुख्याः कार्य्यव्यापृतपूरुषाः।
एक एव भवेदङ्गी" प्रथमो "वीर एव वा॥

दक्षः,—क्षिप्रकारी, शीलं—सद्वृत्तम्, एवमादिगुणसम्पन्नो नेता—नायको भवति। स च चतुर्विधः,—धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरप्रशान्तश्च।

तेषां क्रमेण लक्षणमाह स एव,—

धीरोदात्तलक्षणम्,—

"अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥"

अविकत्थनः,—अनात्मश्लाघाकरः, महासत्त्वः,—हर्षशोकाऽऽदिभिरनभिभूतस्वभावः, निगूढमानः,—विनयच्छन्नगर्वः, दृढव्रतः,—अङ्गीकृतनिर्वाहकः। यथा,—रामयुधिष्ठिरादिः।

धीरोद्धतलक्षणम्,—

"मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः॥"

माया—कपटाऽऽचारः, तत्परायणः। यथा,—भीमसेनादिः।

धीरललितलक्षणम्,—

"निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्।"

कलाः,—नृत्याऽऽदिकाः। यथा,—रत्नावल्यां वत्सराजः।

ऋषिवत् सदाचारपरायणः, धीरोदात्तः,—अविकत्थनत्वाऽऽदिगुणशालीत्यर्थः, प्रतापवान्—कोषदण्डजतेजःशालीत्यर्थः, ("स प्रभावः प्रतापश्च यत्तेजः कोषदण्डजम्" इत्यमरः) दिव्यः,—स्वर्गीयः, अथवा दिव्यादिव्यः,—दिव्यः सन् अदिव्यः, स्वर्गीयः सन्नपि लीलादिवशात् भूतलचारीत्यर्थः, गुणवान्—नायकसामान्यगुणशाली, नायकः मतः,—कथितः। चत्वारः पञ्च वा मुख्याः,—प्रधानानि, कार्य्येषु—तत्तदभिनयव्यापारेषु, व्यापृताः,—निरताः, पुरुषाः, भवन्तीति शेषः। प्रथमः,—आद्यः, शृङ्गारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गमन्ये रसाः सर्वे कार्य्यं निर्वहणेऽद्भुतम्* ॥" (२)

ख्यातं—रामायणमहाभारताऽऽदिप्रसिद्धं रामयुधिष्ठिराऽऽदिचरितं, सन्धयः,—वक्ष्यमाणाः, विलासाऽऽदयः,—नायकगुणाः, तैर्युक्तम्; सुखदुःखसमुद्भवत्वं रामयुधिष्ठिराऽऽदिवृत्तान्तेषु अभिव्यक्तम्; नानाविधैः रसैः निरन्तरम्—अविच्छिन्नम्;

धीरप्रशान्तलक्षणम्,—

"सामान्यगुणैर्भूयान् (क) द्विजादिको धीरप्रशान्तः स्यात्।"

यथा,—मालतीमाधवे माधवः।

* प्रकरणादिषु विशेषाः कथ्यन्ते विश्वनाथेन,—

"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्॥
सापायधर्मकामार्थ-परो धीरप्रशान्तकः॥" (ख)
"नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्॥" (ग)

यथा,—मृच्छकटिकमालतीमाधवादि।

इत्यर्थः, वा वीरः, एक एव—उभयोरन्यतर एव, अङ्गी—प्रधानरसः, भवेत्, अन्ये सर्वे रसाः अङ्गं—तत्परिपोषका इति यावत्, भवेयुरिति शेषः, निर्वहणे—चरमे सन्धौ, उपसंहारे इत्यर्थः, अद्भुतम्—आश्चर्य्यं, कार्य्यम्।

(क) सामान्यगुणैरिति।—सामान्यगुणैः,—नायकसामान्यगुणैः, "त्यागी कृती", इत्यत्रोक्तैस्त्यागादिभिः गुणैरित्यर्थः, भूयान्—प्रचुरः, सामान्यनायकगुणशालीत्यर्थः।

(ख) भवेदिति।—प्रकरणे—तदाख्ये रूपके, कविना कल्पितं—रचितं, न तु प्रसिद्धमित्यर्थः, लौकिकं—स्वतःसम्भवीत्यर्थः, वृत्तं—चरितं, भवेत्। आदिमः,—शृङ्गारः, अङ्गी—प्रधानं, रसः भवेदिति शेषः, विप्रः,अमात्यः, अथवा वणिक् नायकः, स च सापायधर्मकामार्थपरः,—विनश्वरधर्मकामार्थसाधननिरतः, न तु निरपायमोक्षसाधनपर इति भावः,तथा धीरप्रशान्तकः,—धीरप्रशान्त एव [इति स्वार्थे कन्प्रत्ययः]।

(ग) नायिकेति।—क्वापि—प्रकरणे, नायिका कुलजा—कुलीना, क्वापि वेश्या, क्वचित् द्वयं—कुलीना वेश्या चेत्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजर्षय:,—दुष्मन्ताऽऽदय:, दिव्य:,—श्रीकृष्णाऽऽदि:, दिव्यादिव्य:,—यो दिव्योऽप्यात्मनि नराभिमानी। यथा,—श्रीरामचन्द्र:। निर्वहणे—पञ्चमे सन्धौ।

प्रहसनलक्षणम्,—

"भवेत् प्रहसने वृत्तं निन्द्यानां कविकल्पितम्।
अङ्गी हास्यरसो नात्र विष्कम्भकप्रवेशकौ॥" (घ)

यथा,—वसन्ततिलक-हास्यार्णव-कौतुकसर्वस्वाऽऽदि।

नाटिकालक्षणम्,—

"नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृप:॥
स्यादन्त:पुरसम्बन्धा सङ्गीतव्यापृताऽथवा।
नवानुरागा कन्याऽत्र नायिका नृपवंशजा॥
सम्प्रवर्त्तेत नेताऽस्यां देव्यास्त्रासेन शङ्कित:।
देवी पुनर्भवेत् ज्येष्ठा प्रगल्भा नृपवंशजा॥
पदे पदे मानवती तद्वश: सङ्गमो द्वयो:।
वृत्ति: स्यात् कैशिकी स्वल्प-विमर्षा: सन्धय: पुन:॥" (ङ)

विमर्ष:,—चतुर्थ: सन्धि:। यथा,—रत्नावल्यादि:।

(घ) भवेदिति।—प्रहसने—तदाख्ये रूपके, कविना कल्पितं—रचितं, निन्द्यानां—निन्दनीयानां, वृत्तं—चरितं, भवेत्। अत्र—प्रहसने, हास्यरस: अङ्गी—प्रधानं, तथा विष्कम्भकप्रवेशकौ—वक्ष्यमाणलक्षणौ अर्थोपक्षेपकौ, न, स्त इति शेष:।

(ङ) नाटिकेति।—क्लृप्तं—रचितं, वृत्तं यस्या: तथोक्ता, न तु पुराणाऽऽदिषु प्रसिद्धवृत्तेति भाव:; स्त्रीप्राया—नारीबहुला, तथा चतुरङ्किका—अङ्कचतुष्टयशालिनी, स्यात्। प्रख्यात:,—प्रसिद्ध:, धीरललित:,—"निश्चिन्तो मृदुरनिशम्" इति लक्षणोक्त:, अन्त:पुरसम्बन्धा—अन्त:पुरसम्बन्धवती, अन्त:पुरस्थितेत्यर्थ:, कन्या—कुमारी, नेता—नायक:, देव्या:,—कृताभिषेकाया: महिष्या:, प्रधानराज्ञ्या: इत्यर्थ:, ("देवी कृताभिषेकायाम्" इत्यमर:), त्रासेन—भयेन, शङ्कित: सन्, अस्यां—नायिकाया, सम्प्रवर्त्तेत—समासजेत्, आसक्तो भवेदित्यर्थ:। द्वयो:,—नायिकानायकयो:, सङ्गम:, तद्वश:,—तदधीन:; कैशिकी वृत्ति:,—"या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसङ्कुला प्रचुरनृत्यगीता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्कलक्षणमाह,—

"प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः।
नानाविधानसंयुक्तो बीजसंहृतिमान् न च॥
युक्तो न बहुभिः कार्य्यैर्नातिप्रचुरपद्यवान्।
आवश्यकानां कार्य्याणामविरोधात् विनिर्मितः॥
नानेकदिननिर्वर्त्त्य-कथया सम्प्रयोजितः।
आसन्ननायकः पात्रैर्युतस्त्रिचतुरैस्तथा॥
बधयुद्धविवाहाद्यैर्वर्जितो नातिविस्तरः।
देवीपरिजनाऽऽदीनां प्रत्यक्षचरितैर्युतः॥
अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः॥"(२)

त्रोटकलक्षणम्,—

"सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम्।
त्रोटकं नाम तत् प्राहुः प्रत्यङ्कं सविदूषकम्॥"

यथा,—विक्रमोर्वशी।

(२) प्रत्यक्षेति।—प्रत्यक्षं—प्रत्यक्षवदाभासमानं, नेतुः,—नायकस्य, चरितं यत्र तथाविधः, रसेन तथा भावेन च—देवाऽऽदिविषयकरत्यादिना, तदुक्तं दर्पणे—"सञ्चारिणः प्रधानानि देवाऽऽदिविषया रतिः। उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते॥" इति; समुज्ज्वलः,—सम्पोषित इति भावः, नानाविधानैः,—विविधानुष्ठानैः, नानाविधव्यापारैरित्यर्थः, संयुक्तः,—सहितः, अलङ्कृत इति यावत्, बीजस्य—मूलीभूतकारणविशेषस्य, संहृतिः,—संहारः, विलोप इत्यर्थः, सा अस्यास्तीति तथाभूतः, न, बीजसद्भावसहित इत्यर्थः; बहुभिः,—अतिविस्तृतैरित्यर्थः, कार्य्यैः,—व्यापारैः, न युक्तः, नातिप्रचुरपद्यवान्—नातिबहुलपद्यसमन्वित इत्यर्थः, आवश्यकानाम्—अवश्य-

गीता। कामोपभोगप्रचुरोपचारा सा कौशिकी चारुविलाससमेता॥" इत्युक्तलक्षणा। स्वल्पः,—न्यूनः, विमर्षः,—तदाख्यसन्धिभेदः येषु तादृशाः, प्रायेण विमर्षाऽऽख्यसन्धिहीना इत्यर्थः, अत्र भवन्तीति शेषः।

Dr. Urmila Sharma Collection, Varanasi

भावाः,—देवाऽऽदिविषयकरत्यादयः, बीजस्य * संहृतिः,—सङ्कोचः।

नाटकीयपूर्वकृत्यम्,—

"तत्र पूर्वं पूर्वरङ्गः सभापूजा ततः परम्।
कथनं कविसंज्ञाऽऽदेर्नाटकस्याप्यथाऽऽमुखम्॥"

तत्र—नाटके, सभापूजा—विनीतवचनाऽऽदिना सभ्यानाम् आभिमुख्यसम्पादनम्, आमुखं—प्रस्तावना।

पूर्वरङ्गस्य लक्षणमाह,—

"यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते॥" (४)

अथ नान्दीनामाङ्गस्य स्वरूपमाह भरतः,—

"देवद्विजनृपाऽऽदीनामाशीर्वादपरायणा।
नन्दन्ति देवता यस्मात्तस्मान्नान्दीति संज्ञिता॥" (५)

बीजलक्षणम्,—

* "स्वल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति।
फलावसानं यच्चैवं बीजं तदिह कीर्त्तितम्॥" [भरतः]

कर्त्तव्यानां, कार्य्याणां—सामयिककार्य्याणामित्यर्थः, अविरोधात्—अबाधात्, विनिर्मितः,—रचितः; अनेकदिननिर्वर्त्त्यकथया—बहुदिनसमाप्यकथया, न सम्प्रयोजितः,—न कल्पितः, तथा आसन्नः,—सम्बद्धः, नायको यत्र तादृशः, त्रिचतुरैः,—त्रिभिश्चतुर्भिर्वा, पात्रैः,—नटैः, युतः, वधयुद्धविवाहाऽऽदिरहितः, देवीपरिजनाऽऽदीनां प्रत्यक्षचरितैः,—प्रत्यक्षवदाभासमानैश्चरितैः, युतः, अन्ते—परिच्छेदशेषे, निष्क्रान्तानि—बहिर्गतानि, निखिलानि—समस्तानि, पात्राणि—अभिनेतारः यत्र तथोक्तः, अङ्क इति कीर्त्तितः,—कथितः।

(४) यदिति।—कुशीलवाः,—नटाः, रङ्गविघ्नोपशान्तये—नाट्यव्याघातनिवारणाय, नाट्यवस्तुनः,—अभिनयव्यापारस्य, पूर्वं यत्—देवताध्यानादिकं, प्रकुर्वन्ति, स पूर्वरङ्गः उच्यते; रङ्गात् पूर्वं क्रियमाणत्वादस्य पूर्वरङ्गसंज्ञेति बोध्यम्।

(५) देवेति।—देवद्विजनृपादीनाम् आशीर्वादः,—शुभशंसनं, परम् अय-

CC0. In Public Domain, Digitizagtion by eGangotri

सूत्रधारः * नान्दीं प्रयोज्य काव्यार्थसूचकैर्मधुरैर्वचनैः रङ्गस्थान् सभ्यान् प्रसाद्य रूपकस्य कवेश्च आख्यां, कवेः गोत्राऽऽद्यपि कीर्त्तयेत् । ततः प्रस्तावना । तल्लक्षणमाह भरतः,—

प्रस्तावनास्वरूपम्,—

"नटी विदूषको वाऽपि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताऽऽक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा ॥" (६)

नटीति स्त्रीत्वमविवक्षितं, प्रस्तुतस्य आक्षेपिभिः,—उद्बोधकैः । तद्भेदाः कथितास्तेनैव,—

प्रस्तावनाभेदाः,—

"उद्घात्यकं कथोद्घातः प्रयोगातिशयस्तथा ।
प्रवृत्तकावलगिते आमुखाङ्गानि पञ्च वै ॥" †

---

* सूत्रम्—अभिनयानुष्ठानं, धारयति यः सः । इदानीं सूत्रधार एव काव्यस्थापनाऽऽदिकं सर्वमेव स्थापककार्य्यं प्रयोजयतीति व्यवहारः, स्थापकाभिधानं नटान्तरं न दृश्यते ।

† दर्पणे—उद्घात्यकमिति पुंलिङ्गान्तं, प्रवृत्तकेत्यस्य स्थाने प्रवर्त्तकेति च दृश्यते ।

नम्—आश्रयी यस्यास्तादृशी, या वाक् नटैः कीर्त्त्यते इति शेषः, तथा यस्मात् देवताः नन्दन्ति—तुष्यन्ति, तस्मात् सा नन्दयतीति व्युत्पत्त्या नान्दीति संज्ञिता—कीर्त्तिता ।

(६) नटीति ।—नटी, विदूषकः वा, पारिपार्श्विकः,—सूत्रधारसदृशः प्रधाननटविशेषः, सूत्रधारस्य पार्श्वचर इत्यर्थः, एव वा, सूत्रधारेण—प्रधाननटेन, सहिताः,—सङ्गताः सन्तः, चित्रैः,—मनोहरैः, स्वकार्य्यात् उत्थैः,—उद्भूतैः, प्रस्तुताऽऽक्षेपिभिः,—प्रकृतार्थसूचिभिः, वाक्यैः मिथः,—परस्परं, यत्र इत्यव्ययं—यदित्यर्थः, संलापं कुर्वते—समालपन्तीत्यर्थः, तत्तु—तदेव, आमुखं विज्ञेयं, सा नाम्ना प्रस्तावनाऽपि, विज्ञेयेति शेषः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एषां क्रमेण लक्षणमाह स एव,—

उद्घात्यकलक्षणम्,—

"पदानि त्वगतार्थानि तदर्थगतये नराः।
योजयन्ति पदैरन्यैस्तदुद्घात्यकमुच्यते॥" (७)

अगतः,—अबोधित इति यावत्, अर्थः,—इष्टो यैस्तानि, तस्य—इष्टस्य, अर्थस्य गतये—बोधनाय। यथा मुद्राराक्षसे,—

"सूत्र। क्रूरग्रहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम्।
अभिभवितुमिच्छति बलात्—।
* * *
अनन्तरं [नेपथ्ये]। आः! क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति बलात्?"

अत्र अन्यार्थवन्त्यपि पदानि इष्टार्थबोधनविरहात् पदान्तरैर्योजयित्वा पात्रप्रवेशः।

कथोद्घातलक्षणम्,—

"सूत्रधारस्य वाक्यं वा यत्र वाक्यार्थमेव वा।
गृहीत्वा प्रविशेत् पात्रं कथोद्घातः स उच्यते॥"

वाक्यमादाय रत्नावल्याम्। (८) वाक्यार्थं गृहीत्वा वेण्याम्। (९)

(७) पदानीति।—नराः,—नटा इत्यर्थः, अगतार्थानि—अबोधिताभिप्रेतार्थानि, पदानि, तदर्थगतये—तस्य—अर्थस्य, अभिप्रेतस्येति शेषः, गतये—बोधाय, अन्यैः पदैः सह योजयन्ति—सङ्गमयन्ति, इति यदिति शेषः, तत् उद्घात्यकमुच्यते।

(८) वाक्यमादाय रत्नावल्यां यथा—"द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्। आनीय झटिति घटयति विधिरभिमतमभिमुखीभूय॥" इति सूत्रधारेण पठिते,—"एवमेतत्, कः सन्देहः? द्वीपादन्यस्मादपि" इत्यादि पठित्वा यौगन्धरायणस्य प्रवेशः इति दर्पणः।

(९) वाक्यार्थं गृहीत्वा वेण्यां यथा,—"निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन। रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रयोगातिशयलक्षणम्,—

"यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते।
तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा॥" (१०)

यथा उत्तररामचरिते,—

"सूत्र। तत् किमनेन?—एहि, राजद्वारमेव स्वजातिसमयेनोपतिष्ठावः" इति स्तुतिप्रयोगोद्यते सूत्रधारे, नटेन,—

"स्नेहात् सभाजयितुमेत्य दिनान्यमूनि
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान्।
देव्यास्ततो विमनसः परिसान्त्वनाय
धर्माऽऽसनाद्विशति वासगृहं नरेन्द्रः॥" (११)

इति रामस्यान्तःपुरप्रवेशरूपं स्तुतिप्रयोगमतिशयानं प्रयोगान्तरं प्रयुञ्जानेन सीतारामयोः प्रवेशः प्रयोजितः।

कुरुराजसुताः सभृत्याः॥" इति सूत्रधारेण पठितस्य वाक्यस्यार्थं गृहीत्वा नेपथ्ये साधिक्षेपम्—"आः पाप! दुरात्मन्! वृथा मङ्गलपाठक!······स्वस्था भवन्तु मयि जीवति धार्त्तराष्ट्राः?" ततः सूत्रधारो निष्क्रान्तः। अथ भीमसेनस्य प्रवेशः।

(१०) यदीति।—यदि एकस्मिन् प्रयोगे—प्रसङ्गे, अन्यः प्रयोगः,—प्रसङ्गः, प्रयुज्यते—उत्थाप्यते, तेन—द्वितीयप्रयोगेण, चेत्—यदि, पात्रस्य—नटस्य, प्रवेशः, भवति इति शेषः, तदा (असौ) प्रयोगातिशयः, स्यादिति शेषः।

(११) स्नेहादिति।—जनकः,—विदेहराजः, स्नेहात्—वात्सल्यात्, न तु गौरवादित्यर्थः, सभाजयितुं—सम्भाषणाऽऽदिना जामातॄन् रामभरताऽऽदीन् प्रीणयितुम्, एत्य—अयोध्यायां राजभवनमागत्येत्यर्थः, अमूनि—एतानि, दिनानि उत्सवेन—आनन्दव्यापारेण, नीत्वा—यापयित्वा, अद्य विदेहान्—तदाख्यजनपदान्, स्वराज्यमित्यर्थः, गतः,—प्रस्थितः, ततः,—तस्मात्, पितृगमनात् इत्यर्थः, विमनसः,—उत्कण्ठितायाः, देव्याः,—सीतायाः, परिसान्त्वनाय—विनोदनाय, नरेन्द्रः,—रामः, धर्माऽऽसनात्—विचाराऽऽसनात्, सौर्यसिंहाऽऽसनादित्यर्थः, वासगृहं—शयनाऽऽगारं, विशति—प्रविशति; राजकार्य्यमपि परित्यज्य देव्याः परिसान्त्वनार्थं स्वयमेव याति। वसन्ततिलकं वृत्तम्।

का—४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रवृत्तकलक्षणम्,—

"कालं प्रवृत्तमाश्रित्य सूत्रभृत् यत्र वर्णयेत् ।
तदाश्रयश्च पात्रस्य प्रवेशस्तत् प्रवृत्तकम् ॥" (१२)

सूत्रभृत्—सूत्रधारः। यथा,—

"आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः शरत्समय एष विशुद्धकान्तिः ।
उत्खाय गाढ़तमसं घनकालमुग्रं
रामो दशाऽऽस्यमिव सम्भृतबन्धुजीवः ॥" (१३)

ततो रामस्य प्रवेशः ।

अवलगितलक्षणम्,—

"यत्रान्यस्मिन् समावेश्य कार्य्यमन्यत् प्रसाध्यते ।
परानुरोधात् तज्ज्ञेयं नाम्नाऽवलगितं बुधैः ॥"(१४)

---

(१२) कालमिति।—प्रवृत्तम्—उपस्थितं, कालं—समयं, वसन्ताऽऽदिकमिति यावत्, आश्रित्य सूत्रभृत्—सूत्रधारः, यत्र—यदित्यर्थः, वर्णयेत्, तत्—तत्कालिकं, वस्तु इति शेषः, आश्रयः,—अवलम्बनं यस्य तादृशः. तदवलम्बीत्यर्थः. यः पात्रस्य प्रवेशः. तत् प्रवृत्तकम् ।

(१३) आसादितेति।—आसादितः,—प्राप्तः, प्रकटः,—मेघाद्यावरणराहित्यात् सुव्यक्तः, अत एव निर्मलः,—समुज्ज्वलः, चन्द्रस्य हासः,—विकाशो येन तथोक्तः ; अन्यत्र—आसादितः,—गृहीतः, रावणवधादिति भावः, प्रकटः,—कोषमुक्त इति यावत्, निर्मलः,—सुशाणित इति यावत्, चन्द्रहासः,—असिः येन तथोक्तः ; विशुद्धा—मेघाद्यावरणराहित्यात् स्वच्छा, कान्तिः,—नक्षत्राऽऽदिज्योतिः यस्य तादृशः ; अन्यत्र—विशुद्धा—निर्दोषा, कान्तिः,—शोभा यस्य तादृशः, सम्भृताः,—सम्यक् पोषिताः, विकसिता इत्यर्थः, बन्धुजीवाः,—तदाख्यपुष्पविशेषाः येन तथोक्तः ; अन्यत्र—सम्भृताः,—रक्षिताः, बन्धूनां—समरसुहृदां सुग्रीवाऽऽदीनां, जीवाः,—जीवनानि, राक्षसेभ्य इति भावः, येन तथोक्तः ; एष शरत्समयः रामः दशाऽऽस्यमिव—रावणमिव, गाढ़तमसं—निविड़ान्धकाराऽऽच्छन्नम् ; अन्यत्र—प्रबलतमोगुणाऽऽक्रान्तम ; उग्रं—भयाऽऽवहं, घनकालं—वर्षाकालम् ; अन्यत्र—अतिकृष्णवर्णम् ; उत्खाय—उन्मूल्य, प्राप्तः,—उपस्थितः। अत्र शरद्वर्णनमाश्रित्य पात्रस्य रामस्य प्रवेशः। वसन्ततिलकं वृत्तम्।

(१४) यत्रेति।—यत्र परानुरोधात्—परस्य वस्तुनः अनुरोधात्, अन्यस्मिन्—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समाविश्य—साहृश्यमुद्भाव्य। यथा,—अभिज्ञानशकुन्तले (१५) प्रस्तावनाऽन्ते रूपकस्य प्रकृतेतिवृत्तमारभेत।

पताकास्थानकप्रयोगस्थलम्,—

"पताकास्थानकं योज्यं सुविचार्य्येह वस्तुनि।"

इह—रूपके, वस्तुनि——इतिवृत्ते।

तल्लक्षणमुक्तं भरतेन,—

पताकास्थानकलक्षणम्,—

"यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लीनोऽन्यः प्रयुज्यते।
आगन्तुकेन भावेन पताकास्थानकन्तु तत्॥"

यत्र एकस्मिन् विषये चिन्तिते तत्संसक्तः अपरोऽर्थः अतर्कितेन भावेन बोध्यते, तत् पताकास्थानकम्। यथा उत्तरचरिते,—

"रामः। कथं प्रियवचना वत्सि प्रसुप्तेव!! [निर्वर्ण्य सस्नेहम्]—

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयोः
असावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयः? यदि परमसह्यस्तु विरहः॥ (१६)

यस्मिन्, तद्वस्तुनीत्यर्थः, समाविश्य—साहृश्यमुद्भाव्य, अन्यत् कार्य्यं प्रसाध्यते—सम्पाद्यते, बुधैः,—विद्वद्भिः, तत् नाम्ना पताकागितं ज्ञेयम्।

(१५) अभिज्ञानशकुन्तले यथा,—"तवास्मि गीतरागेण हारिणा प्रसभं हृतः। एष राजेव दुष्मन्तः शारङ्गेणातिरंहसा॥" अत्र दुष्मन्तरूपपात्रप्रवेशानुरोधेन तस्मिन्नेव साहृश्यमुद्भाव्य आत्मनो गीतेन हृतत्वरूपं कार्य्यं निष्पाद्यते इति बोध्यम्।

(१६) इयमिति।—(अत्र "मम" इति अध्याहार्य्येण पदेन सर्वत्र अन्वयः कार्य्यः) इयं—सीता, गेहे—गृहे, लक्ष्मीः,—श्रीः, इयं नयनयोः,—नेत्रयोः, अमृतवर्त्तिः,—अमृताञ्जनतूलिकेत्यर्थः, नितरां नेत्राऽऽनन्दिनीति यावत्, अस्याः,—सीतायाः, असौ—अनुभूयमानः, स्पर्शः, वपुषि—शरीरे, बहुलः,—प्रचुरः, चन्दनरसः, सम-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतिहारी [प्रविश्य]। देव ! उवत्थिदो। (१७)

रामः। अयि ! कः ?

प्रती। आसण्णपरिचारओ देवस्स दुम्मुहो।" (१८)

अत्र दुर्मुखोपस्थितिरूपार्थे चिन्तिते, सीताविरहरूपार्थः सूचितः।

यथा वा वेण्याम्,—

"पर्य्याप्तमेव करभोरु ! ममोरुयुग्मम्" इति दुर्य्योधनेन कथिते, [प्रविश्य सम्भ्रान्तः कञ्चुकी]। "देव ! भग्नं भग्नम्" इत्यनेन वायुना रथकेतनभङ्गरूपार्थे चिन्तिते, भीमेन दुर्य्योधनोरुभङ्गरूपार्थः सूचितः। (१९)

धिकचन्दनरसस्पर्शवत् सुशीतलः अस्याः शरीरस्पर्श इति भावः ; कण्ठे, अर्पित इति शेषः ; अयं बाहुः,—भुजः, अस्या इति शेषः, शिशिरमसृणः,—शिशिरश्चासौ मसृणश्चेति तथाविधः, शीतलकोमल इत्यर्थः, मौक्तिकसरः,—मुक्ताहारः, तद्वदानन्दकर इत्यर्थः ; अस्याः,—सीतायाः, किं—वस्तु, न प्रेयः ?—प्रियतरमित्यर्थः, स्यादिति शेषः, अपि तु सर्वमेव प्रेय इत्यर्थः ; तु—किन्तु, यदि विरहः,—वियोगः, अस्या इति शेषः, परम—अत्यर्थम्, असह्यः,—दुःसहः, न स्यादिति शेषः ; विरह एवास्या दुःसह इत्यर्थः। ["यदि परमसह्यस्तु विरहः" इत्यत्र "यदि पुनरसह्यो न विरहः" इति पाठे,—यदि पुनः,—यदि तु, विरहः असह्यः न, स्यादिति शेषः]। शिखरिणी वृत्तम्।

(१७) देवेति।—["देव ! उपस्थितः" इति सं], विरह इति शेषः। अत्र "उवत्थिदो" इत्यनेन दुर्मुखोपस्थितिरूपेऽर्थे चिन्तिते "विरहः" इत्यनन्तरमेव तदुक्तेः अतर्कितभावेन भाविसीताविरहरूपस्यार्थस्य सूचनात् पताकास्थानकं बोध्यम्।

(१८) आसण्णपरिचारओ इति।—["आसन्नपरिचारकः देवस्य दुर्मुखः" इति सं]। परिचरति—सेवते इति परिचारकः, आसन्नः,—सदा सन्निहितः, स चासौ परिचारकश्चेति तथोक्तः।

(१९) उदाहरणान्तरं दर्शयति, यथा वेति।—अत्र "ममोरुयुग्मम्" इति दुर्य्योधनोक्त्यनन्तरमेव कञ्चुकिना प्रविश्य "भग्नं भग्नम्" इति रथकेतनभङ्गरूपे अन्यस्मिन्नर्थे प्रयुक्ते अतर्कितभावेन दुर्य्योधनोरुभग्नरूपान्यार्थसूचनात् पताकास्थानकं बोध्यम्। एवमेव मुद्राराक्षसे यथा,—"चाणक्यः।—अपि नाम दुरात्मा राक्षसः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अर्थोपक्षेपकाः,—

यत्तु युद्धवधाऽऽदिकमन्यच्चानुचितमङ्केष्वदर्शनीयं, तत् सर्वमर्थोपक्षेपकैः (२०) विष्कम्भकाऽऽदिभिः सूचयेत। आदिपदेन प्रवेशकाङ्कावताराऽऽदयो गृह्यन्ते।

विष्कम्भकस्य लक्षणमाह धनञ्जयः,—

"वृत्तवर्त्तिष्यमाणानां कथाऽंशानां निदर्शकः।
सङ्क्षिप्तार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः*॥"(२१)

वृत्तवर्त्तिष्यमाणानाम्—अतीतानां भाविनाञ्च, निदर्शकः,—सूचकः, मध्येन मध्यमाभ्यां वा पात्राभ्यां प्रयोजितः। यथा,—रत्नावल्यां प्रथमाङ्कादौ, अभिज्ञानशकुन्तले च चतुर्थाङ्कादौ।

* "मध्यपात्रप्रयोजितः" इत्यत्र "आदावङ्कस्य दर्शितः" इति दर्पणे पाठः।

गृह्येत? सिद्धा।—अज्ज गहीदो"। अन्यच्च—"राक्षसः।—तदपि नाम दुरात्मा चाणक्यवटुः—। दौवारिकः।—[उपसृत्य]। जेदु जेदु"। पुनश्च—"राक्षसः।—अभिसन्धातुं शक्यः स्यात्। दौवारिकः।—अमच्चो" इत्यादिना अव्यक्तार्थस्य राक्षसवशीकरणरूपस्य चाणक्यविजयस्य च प्रस्तुतस्य सूचनात् पताकास्थानम्; एवं सुधीभिः ऊह्यम्। धनिकमते तु—इदं गण्डनामकं प्रस्तावनाऽङ्गं वेदितव्यम्; प्रथमाङ्के चाणक्यवाक्यानन्तरं प्रस्तुतस्य राक्षसवशीकरणरूपस्य सम्बद्धतया "गहीदो" इत्यस्य, तथा चतुर्थेऽङ्के राक्षसवाक्यानन्तरं प्रस्तुतस्य चाणक्यविजयरूपस्य सम्बद्धतया "जेदु जेदु" इत्यस्य च सहसाऽभिधानात्। यदुक्तं,—"गण्डः प्रस्तुतसम्बन्धि भिन्नार्थं सहसोदितम्" इति।

(२०) अर्थोपक्षेपकैः,—अर्थसूचकैरित्यर्थः, भाविविषयसूचकैरिति यावत्।

(२१) वृत्तेति।—वृत्तानाम्—अतीतानां, वर्त्तिष्यमाणानां—भविष्यतां, कथाऽंशानां—कथाविभागानां, निदर्शकः,—सूचकः, सङ्क्षिप्तः,—सङ्क्षेपेणोक्तः, अर्थः,—प्रयोजनं यस्मिन् तथोक्तः, मध्येन—मध्यविधेन, न प्रधानेन न नीचेनेति भावः, मध्यमाभ्यां वा पात्राभ्यां—नटाभ्यां, प्रयोजितः,—अभिनीतः, विषय इति शेषः, विष्कम्भः, उच्यते इति शेषः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रवेशकलक्षणम्,—

"प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा॥" (२२)

[विश्वनाथः]

अनुदात्तोक्त्या—प्राकृतवचनेन, अङ्कद्वयान्तरिति प्रथमाङ्केऽस्य प्रतिषेधः। यथा,—वेण्यां तृतीयाङ्कादौ।

अङ्कावतारलक्षणम्,—

"अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः।
यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः॥" (२३)

यथा,—अभिज्ञानशकुन्तले पञ्चमाङ्कान्ते पात्रैः सूचितः षष्ठाङ्कः तदङ्कस्य अङ्गविशेष इवावतीर्णः।

नाटकलक्षणोक्तसन्धिलक्षणमुक्तं दशरूपके,—

"अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति।" (२४)

एकेन प्रयोजनेनान्वितानां कथांऽशानामवान्तरैकप्रयोजनसम्बन्धः सन्धिः।

---

(२२) प्रवेशक इति।—अनुदात्तोक्त्या—प्राकृतवचनेन, अङ्कद्वयान्तः,—अङ्कयोरुभयोर्मध्ये इत्यर्थः, नीचपात्रेण प्रयोजितः,—अभिनीतः, कथाविभाग इति शेषः, प्रवेशकः विज्ञेयः, शेषं—वृत्तवर्त्तिष्यमाणकथांऽशनिदर्शकत्वाऽऽदिकं, विष्कम्भके यथा—विष्कम्भकवत्, अत्र योज्यमिति शेषः।

(२३) अङ्कान्ते इति।—अङ्कस्य—परिच्छेदस्य, अन्ते—अवसाने, पात्रैः,—नटैः, सूचितः,—प्रकटितः, तदङ्कस्य—तस्य अङ्कस्य, अविभागतः,—विभागो विच्छेदः, स न भवतीति अविभागः तस्मात्, अविभक्तभावेनेत्यर्थः, यत्रेत्यव्ययं—य इत्यर्थः, अङ्कः, अवतरति—उत्तिष्ठति, एषः अङ्कावतार इति स्मृतः।

(२४) अन्तरेति।—एकान्वये—एकप्रयोजने सति, अन्तरा—मध्ये, एकेन—अपरेणेत्यर्थः, अर्थेन—प्रयोजनेन, सम्बन्धः,—संयोगः, सन्धिः, उच्यते इति शेषः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदुद्देशनाह विश्वनाथः,—

"मुखं प्रतिमुखं गर्भो विमर्ष उपसंहृतिः * ।"

मुखलक्षणम्,—

* "यत्र बीजसमुत्पत्तिस्तन्मुखं परिकीर्त्तितम् ।" (च) [विश्वनाथः]

यथा,—अभिज्ञानशकुन्तले प्रथमाङ्के दुष्मन्तशकुन्तलयोः परस्परानुरागरूपस्य बीजस्य उत्पत्तिः ।

प्रतिमुखलक्षणम्,—

"लक्ष्यालक्ष्य इवोद्भेदस्तस्य प्रतिमुखं भवेत् ।" (छ) [दशरूपकम्]

तस्य—बीजस्य। यथा,—तत्रैव द्वितीयेऽङ्के दुष्मन्तानुरागस्य नातिपरिस्फुटप्रकाशः ।

गर्भलक्षणम्,—

"फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन ।
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहुः ॥" (ज) [विश्वनाथः]

यथा,—तत्रैव तृतीयेऽङ्के उभयानुरागस्य सम्यक् प्रकाशः, मुहुरन्वेषणं, शकुन्तलाप्रस्थानाऽऽदिना ह्रासश्च ।

(च) यत्रेति।—यत्र—सन्धौ, बीजस्य—"स्वल्पमात्रं समुद्दिष्टं बहुधा यत् विसर्पति। फलावसानं यच्चैवं बीजं तदिह कीर्त्तितम् ॥" इत्युक्तलक्षणस्य, समुत्पत्तिः,—समुद्भवः, तत् मुखं—तदाख्यसन्धिरित्यर्थः, परिकीर्त्तितम्। यथा—अभिज्ञान-शकुन्तले मृगयारूपप्रयोजनसम्बद्धस्य राज्ञः वनमार्गे शकुन्तलारूपदर्शनेन तदनुराग-रूपप्रयोजनान्तरसम्बन्धः।

(छ) लक्ष्यालक्ष्य इति।—तस्य—मुखस्य सन्धेः, लक्ष्यालक्ष्य इव—कियताऽंशेन लक्ष्यः,—अनुमेयः, कियता वा अलक्ष्यः,—अननुमेय इत्यर्थः, उद्भेदः,—उदयः, प्रकाश इति यावत्, प्रतिमुखं भवेत्।

(ज) फलेति।—फलस्य—प्रतिपिपादयिषितस्य वस्तुनः, यः प्रधानोपायः तस्य, किञ्चन—अथञ्चनेत्यर्थः, प्रागुद्भिन्नस्य—पूर्वमुद्भूतस्य, मुखसन्धेरिति शेषः, यत्र—य इत्यर्थः, मुहुः,—पुनः पुनः, ह्रासान्वेषणवान् समुद्भेदः,—सम्यक् स्फुरणं, स गर्भः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ नाट्योक्तय:,—

"सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम्।
रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम् *॥
त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम्।
अन्योऽन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम्†॥

विमर्षलक्षणम्,—

"यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिक:।
शापाद्यै: सान्तरायश्च स विमर्ष इति स्मृत:॥" (झ) [दर्पण:]

यथा,—तत्रैव चतुर्थेऽङ्के उत्कर्षं प्राप्तोऽनुरागो दुर्वाससः शापेन विघ्नित:।

निर्वहणलक्षणम्,—

"बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्॥" (ञ) [दशरूपकम्]

यथा,—तत्रैव सप्तमाङ्के शकुन्तलादुष्मन्तयोर्मिलनरूपतया सर्वकार्य्याणामवसानम्। उपसंहृतिरेव नामान्तरं निर्वहणम्।

* परावृत्य अन्यस्य रहस्यकथनमपवारितम्।

† यस्य न श्राव्यं, तस्यान्तरे ऊर्द्ध्वसर्वाङ्गुलं वक्रानामिकं त्रिपताकलक्षणं करं कृत्वाऽन्येन सह यन्मन्त्र्यते तज्जनान्तिकम्।

(२५) सर्वश्राव्यमिति।—सर्वेषां श्राव्यं—श्रवणार्हं, प्रकाशं स्यात्। अश्राव्यं स्वगतं मतम्। अन्यस्य परावृत्य—विमुखीभावेन अवस्थाय, यत् रहस्यं—गोप्यं, कथ्यते, तत् अपवारितम्। तिस्र: पताका:,—पताकावत् ऊर्द्धोत्थापिता अङ्गुलय इत्यर्थ:, यस्य तादृशेन, करेण—करस्थाङ्गुलित्रयेणेत्यर्थ:, अन्यान् अपवार्य्य—आच्छाद्य.

(झ) यत्रेति।—यत्र मुख्यस्य—प्रधानस्य, फलस्य उपाय: गर्भत:,—गर्भसन्धे:, अधिक:,—अतिरिक्त:, उद्भिन्न:,—प्रकटतां गत:, शापाद्यै:,—विघ्नविशेषैरिति भाव:, सान्तराय:,—सव्याघात:, स विमर्ष इति स्मृत:।

(ञ) बीजवन्त इति।—बीजवन्त: मुखाद्यर्था:,—मुखप्रतिमुखगर्भविमर्षा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।
श्रुत्ववानुक्तमप्येकस्तत् स्यादाकाशभाषितम्॥" [द०रू०]

"प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते ।
राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः ॥
राजर्षिभिर्वयस्येति तथा विदूषकेण च ।
राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च ॥
स्वेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः ।
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः ॥
वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम् ।

कथामन्तरा—कथामध्ये, जनान्ते—जनसमीपे, यत् अन्योऽन्याऽऽमन्त्रणं—परस्पर-कथोपकथनं, तत् जनान्तिकम् । पात्रं—सम्बोध्यजनं, विना, किं ब्रवीषि ? एवम्, इत्यादि अनुक्तमपि श्रुत्वेव एकः यत् ब्रवीति, तत् आकाशभाषितं स्यात् । गमेः,—गमधातोः स्थाने, प्रायेण ण्यन्तकः साधिः,—साधधातुः, प्रयुज्यते । प्रायेणेत्यभि-धानात् अन्यदपि तत्समानार्थकं प्रयोज्यमिति भावः । राजा, भृत्यैः स्वामीति, देव इति वा, अधमैः,—नीचैः जनैः, भट्टेति, राजर्षिभिः, तथा विदूषकेण च वयस्य इति, ऋषिभिः राजन्निति, तथा अपत्यप्रत्ययेन च—अपत्यप्रत्ययान्तपदेन, इञादि-प्रत्यययोगेन इत्यर्थः, दाशरथे ! इत्यादिनेति भावः, सः,—राजा, वाच्यः,—वक्तव्य सम्बोध्य इत्यर्थः । विप्रः,—द्विजः, विप्रैः,—अन्यैः ब्राह्मणैः, स्वेच्छया—यथाकामम्, अपत्यप्रत्ययान्तेन इति भावः, नामभिर्वा वाच्य इत्यन्वयः, इतरैः,—अन्यैश्च, विप्रभिन्नै-रित्यर्थः, आर्य्येति—आर्य्य ! इति सम्बोधनेन, विप्रो वाच्य इति शेषः । विदूषकः,—"कुसुमवसन्ताऽऽद्यभिधः कर्मवपुर्वेशभाषाऽऽद्यैर्हास्यकरः । कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः ॥" इत्युक्तलक्षणो नर्मसचिवः, राज्ञा वयस्य इति, अथवा नाम्ना—

इत्यर्थः, यथायथं—यथाऽनुरूपं, विप्रकीर्णाः,—विक्षिप्ताः, प्रयुक्ताः सन्तः इत्यर्थः, यत्र एकार्थम्—एकप्रयोजनवत्त्वम्, उपनीयन्ते—प्राप्यन्ते, तत् हि—निश्चितं, निर्वहणम्—उपसंहृतिरित्यर्थः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः ॥
सूत्रधारो मारिषेति हण्डे इत्यधमैः समाः।
वयस्येत्युत्तमैर्हंहो मध्यैरार्य्येति चाग्रजः ॥
भगवन्निति वक्तव्याः सर्वैर्देवर्षिलिङ्गिनः।
वदेद्राज्ञीश्च चेटीश्च भवतीति विदूषकः ॥
आयुष्मन् रथिनं सूतो वृद्धस्तातेति चेतरैः।
वत्स पुत्त्रक तातेति नाम्ना गोत्रेण वा सुतः ॥
शिष्योऽनुजश्च वक्तव्योऽमात्य आर्य्येति चाधमैः।
विप्रैरयममात्येति सचिवेति च भण्यते ॥
उपाध्यायेति चाऽऽचार्य्यः कुमारो भर्त्तृदारक।

वसन्तक इत्यादिरूपेणेत्यर्थः, वाच्यः। नटीसूत्रधारौ परस्परम् आर्य्यनाम्ना वाच्यौ—नट्या सूत्रधारः आर्य्येति, सूत्रधारेण नटी आर्य्ये इति च सम्बोध्य वाच्यौ इत्यर्थः; पारिपार्श्विकः,—सूत्रधारस्य पार्श्वचरो नटः, सूत्रधारं भाव इति वदेत्, सूत्रधारः मारिषेति, तं पारिपार्श्विकम् इति शेषः, वदेत्; (भावमारिषशब्दौ यथाक्रमं महाशय-भद्रार्थकौ नाटके प्रयुज्येते इति बोध्यम्); अधमैः,—नीचैः जनैः, समाः,—तुल्याः जनाः, हण्डे इति, वाच्या इति शेषः, उत्तमैः जनैः समाः वयस्येति, तथा मध्यैः समाः हंहो इति, वाच्या इति शेषः, अग्रजः,—ज्येष्ठः भ्राता, आर्य्येति वाच्यः, कनिष्ठैरिति शेषः, देवर्षिलिङ्गिनः,—देवाः, ऋषयः, लिङ्गिनः,—सन्न्यासधर्मिप्रभृतयः, सर्वैः,—जनैः, भगवन् इति वक्तव्याः। विदूषकः राज्ञीश्च चेटीश्च—राज्ञीसहचरीश्चेत्यर्थः, भवतीति वदेत्, तथा सूतः,—सारथिः, रथिनम् आयुष्मन् इति वदेत्, इतरैः,—वृद्धभिन्नैः बालयुवाऽऽदिभिरित्यर्थः, वृद्धः,—स्थविरो जनः, तातेति वक्तव्यः। सुतः,—पुत्रः, शिष्यः,—छात्रः, अनुजः,—कनीयांश्च, वत्स, पुत्रक, तात इति नाम्ना—आख्यया, वा—अथवा, गोत्रेण—अपत्यप्रत्ययान्तेन, काश्यप इत्यादिरूपेणेत्यर्थः, वक्तव्यः। अमात्यः अधमैः,—नीचैः जनैः, आर्य्येति, विप्रैः अयम्—अमात्य इत्यर्थः, अमात्येति सचिवेति च भण्यते—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सौम्य भद्रमुखेत्येवमधमैस्तु कुमारकः ॥
वाच्या प्रकृतिभी राज्ञः कुमारी भर्त्तृदारिका॥" [दर्पणः]
"हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति ॥" (२५)
[अमरः]

श्रव्यकाव्यस्य लक्षणं भेदांश्चाऽऽह,—

"श्रव्यं श्रोतव्यमात्रं तत् द्विविधं परिकीर्त्तितम् ।
पद्यं गद्यञ्च मिश्रञ्च पद्यं चतुष्पदी मतम् ॥
जातिर्वृत्तमिति द्वेधा जातिर्मात्राकृतेन तत् ।
वृत्तमक्षरसङ्घातं पद्येनैकेन मुक्तकम् ॥" (२६)
"द्वाभ्यान्तु युग्मकं ज्ञेयं त्रिभिः श्लोकैर्विशेषकम् ।
कलापकं चतुर्भिः स्यात् तदूर्द्धं कुलकं स्मृतम् ॥"

पद्यमयस्य महाकाव्यस्य लक्षणमुक्तं काव्यादर्शे,—

"सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तु-निर्द्देशो वाऽपि तन्मुखम् ॥

उच्यते। आचार्य्यः,—उपनीय वेदाध्यापयिता, ("उपनीय ददद्वेदमाचार्य्यः स उदाहृतः" इति शास्त्रात्) उपाध्यायेति, शिष्यैः वाच्य इति शेषः। कुमारः भर्त्तृदारक इत्युच्यते, प्रकृतिभिरिति शेषः। अधमैस्तु कुमारकः, सौम्य, भद्रमुख इत्येवं वाच्यः। प्रकृतिभिः,—अमात्याऽऽदिभिः, राज्ञः कुमारी, भर्त्तृदारिका इति वाच्या। नीचां प्रति हण्डे इति, चेटीं प्रति हञ्जे इति, सखीं प्रति हलेति आह्वानं—सम्बोधनं, कार्य्यमिति शेषः।

(२६) श्रव्यमिति।—श्रोतव्यमात्रं—केवलं श्रवणीयं, न त्वभिनयाईमिति भावः; पद्यं—छन्दसा निबद्धं, गद्यं—छन्दोरहितं, जातिः वृत्तमिति च द्वेधा—पद्यस्य द्वौ भेदावित्यर्थः। जातिरिति।—मात्रा—ह्रस्वाऽऽदिः, तया कृतं—रचितं, रचनमित्यर्थः, तेन उपलक्षितं, तत्—पद्यं, जातिः। अक्षरैः सङ्घातं—परिगणितं, पद्यं वृत्तम्। पद्येनेति।—एकेन पद्येन, निबद्धं यत् तदिति शेषः, मुक्तकम्—अन्याऽऽश्रयरहितत्वात् स्वतःसिद्धमिति यावत्।

(२७) सर्गबन्ध इति।—सर्गेण—तदाख्यपरिच्छेदेन, बन्धः,—बन्धनं, रचन-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।
चतुर्वर्गफलोपेतं चतुरोदात्तनायकम्॥
नगरार्णवशैलर्त्तु-चन्द्रसूर्य्याऽऽदिवर्णनैः।
अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम्॥
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः।
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्॥
काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति॥"(२०)

यथा,—रामायण-रघुवंश-शिशुपालवध-नैषधचरिताऽऽदि।

मित्यर्थः, यस्य तादृशः, श्रव्यकाव्यमिति भावः, महाकाव्यं, तस्य लक्षणं—स्वरूपम्, उच्यते। आशीः,—शुभाऽऽशंसनं, नमस्क्रिया—नमस्कारः, वाऽपि—अथवा, वस्तुनिर्देशः,—वस्तुनः,—इतिवृत्तस्य, निर्देशः,—समुल्लेखः, तन्मुखं—तस्य—महाकाव्यस्य, मुखं—प्रारम्भः, इतिहासकथाभिः, उद्भूतम्—उत्थितं, वा इतरत्—अन्यत्, कविकल्पितमिति भावः, सदाश्रयम्—उत्कृष्टाऽऽधारम, उत्तमं वस्तु समाश्रित्य निबद्धमित्यर्थः, चतुर्वर्गफलोपेतं—धर्मार्थकाममोक्षसाधनमित्यर्थः, चतुरोदात्तनायकं—सर्वकार्य्यकुशलधीरोदात्तनायकयुतम्। नगरेति।—नगरस्य—पुरस्य, अर्णवस्य—समुद्रस्य, शैलस्य—पर्वतस्य, ऋतूनां—ग्रीष्माऽऽदीनां, चन्द्रसूर्य्याऽऽदीनाञ्च वर्णनैः अलङ्कृतं—शोभितम्; असङ्क्षिप्तं—सङ्क्षेपेण नाभिहितं, विस्तीर्णमित्यर्थः। रसभावेति।—रसाः,—शृङ्गाराऽऽदयः, भावाः,—सञ्चारिणः प्रधानानि देवाऽऽदिविषया रतिः। उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते॥" इत्युक्तलक्षणाः, तैः निरन्तरं—निरवकाशं, सततसन्निहितमित्यर्थः, अनतिविस्तीर्णैः,—नातिविस्तारितैरित्यर्थः, श्रव्यवृत्तैः,—श्रवणीयचरितैः, सुसन्धिभिः,—सुष्ठु सन्धयः,—मुखप्रतिमुखगर्भविमर्षोपसंहृतिरूपाः पूर्वोक्ताः येषु तादृशैः, सर्वत्र—सर्वस्मिन् सर्गे, भिन्नवृत्तान्तैः,—भिन्नं—पृथग्विधं, वृत्तं—छन्दः, अन्ते—सर्गसमाप्तौ येषां तैः; अथवा पृथक् पृथक् घटनानिबद्धैः, सर्गैः,—तदाख्यपरिच्छेदैः, उपेतं—संयुक्तं, सदलङ्कृति—अलङ्कारसहितं, काव्यं—महाकाव्यसंज्ञं, लोकरञ्जकं—लोकाऽऽनन्दकरं सत्, कल्पान्तरस्थायि—आ-प्रलयस्थिति, जायते—भवति इत्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खण्डकाव्यलक्षणम्,—

"खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च।"

यथा—मेघदूतादि।

गद्यलक्षणम्,—

"वृत्तबन्धोज्झितं गद्यं, तद्भेदास्तु कथाऽऽदयः।"(२८)

यथा—कादम्बर्य्यादि।

चम्पूलक्षणम्,—

"गद्यपद्यमयं मिश्रं चम्पूरित्यभिधीयते।"

पद्यमिश्रत्वञ्चात्र बाहुल्येनेति ज्ञेयम्। ततश्च कादम्बर्य्यादिषु एकद्वित्रिपद्यसत्त्वेऽपि न तेषां गद्यकाव्यत्वहानिः।

इति दृश्यश्रव्यत्वभेदेन काव्यप्रभेदनं नाम चतुर्थशिखा।

---

(२८) वृत्तेति।—वृत्तं—नियमितवर्णविन्यासविशेषः, तेन बन्धः,—रचना, तेनोज्झितं, वाक्यमिति शेषः, गद्यं, तस्य भेदाः तु कथाऽऽदयः,—कथाऽऽख्यायिकाऽऽदयः। तत्र कथा,—"प्रबन्धकल्पनां स्तोक-सत्यां प्राज्ञाः कथां विदुः" इत्युक्तो गद्यविशेषः। आदिपदेन आख्यायिका-मुक्तक-वृत्तगन्धि-उत्कलिकाप्राय-चूर्णकाऽऽदीनां ग्रहणम्। तत्र आख्यायिका—"परम्पराऽऽश्रया या स्यात् सा मताऽऽख्यायिका बुधैः॥" इत्युक्तलक्षणा वाक्यरचना, मुक्तकं—समासरहितं वाक्यं, वृत्तगन्धि—वृत्तलक्षणांशशालिवाक्यम्, उत्कलिकाप्रायं—दीर्घसमासबहुलं वाक्यं, चूर्णकम्—अल्पसमासं वाक्यं, सट्टकं—"सरसा गद्यरचना सट्टकं परिकीर्त्त्यते" इत्युक्तं वाक्यम् इति दिक्।

इति चतुर्थशिखा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चमशिखा ।

दोषस्वरूपं तद्भेदांश्चाऽऽह,—

काव्यापकर्षका दोषास्ते पुनः पञ्चधा मताः ।
पदपदांशवाक्यार्थ-रसानां दूषणेन हि ॥

ये खलु पदवाक्यरसाऽऽदिदूषणद्वारेण काव्यस्यापकर्षमुत्पादयन्ति, ते नाम दोषनाम्ना कथ्यन्ते। ते पुनः पद-पदांश-वाक्य-अर्थ-रसदूषणद्वारेण काव्यं दूषयन्तीति प्रथमतः पञ्चविधाः। तत्र,—

पदमात्रगताः दोषाः,—

निरर्थकासमर्थत्वे च्युतसंस्कृतिता च पदगतास्त्वेव ।

निरर्थकत्वम्—अर्थहीनत्वम्। यथा,—'च, वा, ह्'ऽऽदीनि वृत्तपूरणमात्रप्रयोजनानि रामायणाऽऽदिषु बाहुल्येन द्रष्टव्यानि।

असमर्थत्वं—तदर्थे पठितमपि तस्य अवाचकत्वम्। यथा,—"कुञ्जं हन्ति कृशोदरी" इत्यत्र हन्तीति * गमनार्थे पठितमपि न तत्र समर्थम्।

च्युतसंस्कारत्वं—व्याकरणलक्षणहीनत्वम्। यथा,—

"गाण्डीवी कनकशिलानिभं भुजाभ्या-
माजघ्ने विषमविलोचनस्य वक्षः ॥" (१) [किरातार्जुनीयम्]

"आङो यमहनः" [१।३।२८ पा०] "स्वाङ्गकर्मकाच्च"

* पदान्तरसहकारेण तु "पद्धति" इत्यादौ हन्तेर्गमनार्थत्वमस्त्येव।

(१) गाण्डीवीति।—गाण्डीवं—तदाख्यं धनुः अस्यास्तीति गाण्डीवी—अर्जुनः, ("कपिध्वजस्य गाण्डीवं गाण्डिवं पुंनपुंसकम्" इत्यमरः) भुजाभ्यां—बाहुभ्यां, विषमविलोचनस्य—विषमाणि—असमसङ्ख्यकानि, त्रीणि इत्यर्थः, विलोचनानि यस्य तथोक्तस्य, त्रिलोचनस्येत्यर्थः; कनकशिलानिभं—स्वर्णपाषाणसदृशं वक्षः, आजघ्ने—आहतवान्। प्रहर्षिणी वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[पा० १।३।२८ सू० वा०] इत्यनुशासनबलादाङ्पूर्वस्य हनः स्वाङ्गकर्मकस्याकर्मकस्य चाऽऽत्मनेपदं नियमितम्, इह तु तदुल्लङ्घितमिति व्याकरणलक्षणहीनत्वात् च्युतसंस्कारत्वम् ।

पदवाक्यगताः दोषाः,—

दुःश्रवानुचितार्थत्वे ग्राम्यत्वं निहतार्थता ।
क्लिष्टत्वमप्रतीतत्वं विरुद्धमतिकारिता ॥
अविमृष्टविधेयांश-भावः सन्दिग्धता तथा ।
पदवाक्याऽऽश्रिता दोषाः*पदांशेऽप्येषु केचन ॥(२)

दुःश्रवत्वं †—परुषवर्णतया श्रुतिदुःखाऽऽवहत्वम् । पदगतं यथा,—

"बन्धुभिः सादरं नेत्रैः पीयमानेव सा मुहुः ।
सुताऽऽननेन्दुपूर्णाङ्गा कार्त्तार्थ्यं लभतां कदा ॥" (३)

अत्र कार्त्तार्थ्यमिति श्रुतिकटुः ।

* एकमात्रस्य पदस्य दुष्टत्वे पददोषः, पदानामेकाधिकानां तथात्वे वाक्यदोषः, पदानां परिवर्त्तनेऽपि दोषस्य तादवस्थ्ये ऽर्थदोषः इत्याहुः ।

† "वक्तरि क्रोधसंयुक्ते तथा वाच्ये समुद्धते ।
रौद्राऽऽदौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत् ॥" [विश्वनाथः]

क्रमेणोदाहरणम्,—

"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात् पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।

(२) पदांशे इति ।—एषु—निरुक्तेषु दुःश्रवत्वाऽऽदिषु दोषेषु मध्ये, केचनेत्यत्र बहुवचनमविवक्षितं, तेन कौचिदित्यर्थः, दुःश्रवत्व-निहतार्थत्वे इति भावः ।

(३) बन्धुभिरिति ।—बन्धुभिः,—पित्रादिभिः, सुताऽऽननेन्दुपूर्णाङ्गा—पुत्रमुख-चन्द्रोद्योतितोत्सङ्गा, कार्त्तार्थ्यं—कृतार्थतां, पुत्रप्रसवेन साफल्यमित्यर्थः । अन्यत् सुगमम् । पथ्यावक्त्रं वृत्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाक्यगतं यथा,—

"सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनतार्प्सीत् सममंस्त बन्धून्।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च॥" (४)

[भट्टि०]

यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥" (क)

[वेणी०]

अत्र कुपितो वक्ता।

---

(४) स इति।—सः,—राजा दशरथः, वेदान् अध्यैष्ट—अधीतवान्; त्रिदशान्—वीन् तापान् दशन्ति—विनाशयन्ति, [दश घञर्थे संज्ञायां कर्त्तरि को वा] इति तान्, देवानित्यर्थः, ("त्रिदशा विबुधाः सुराः" इत्यमरः) अयष्ट—यज्ञैरार्चितवान्; पितॄन्—अग्निष्वात्ताऽऽदीन्, अतार्प्सीत्—श्राद्धतर्पणाऽऽदिभिः प्रीणितवान्; बन्धून्—पितृव्यभ्रात्रादीन्, सममंस्त—सम्यक् मानितवान्; षड्वर्गं—षण्णां—कामाऽऽदीनां, वर्गः,—समूहः तं, व्यजेष्ट—विशेषेण जितवान्; नीतौ—नीतिशास्त्रे, अरंस्त—रतवान्, यथानीति राजकार्य्यमद्राक्षीदित्यर्थः; क्रियेति चार्थः, अरीन्—शत्रून्, समूलघातं—मूलघातसहितं यथा तथेत्यर्थः, न्यवधीत्—निहतवान्। अत्र अनेकेषाम् "अध्यैष्ट" इत्यादीनां दुःश्रवत्वाद्वाक्यगतं दुःश्रवत्वं बोध्यम्। उपजातिः वृत्तम्।

(क) य इति।—पाञ्चालसुतेन धृष्टद्युम्नेन पितरि द्रोणे अन्यायेन निहते क्रुद्धस्य अश्वत्थाम्न उक्तिरियम्। पाण्डवीनां, चमूनां—सेनानां मध्ये, यो यः स्वभुजगुरुमदात्—निजबाहुबलदर्पात्, ["स्वभुजगुरुबलः" इति पाठे,—स्वभुजा एव गुरुबलं यस्य सः, बाहुमात्रसहाय इत्यर्थः] शस्त्रं बिभर्त्ति—धरति, पाञ्चालगोत्रे—द्रुपदवंशे, यः यः शिशुः,—बालकः, अधिकवयाः,—युवा, प्रौढ़ः, स्थविरो वेत्यर्थः, वा—किंवा, गर्भशय्यां—जरायुं, गतः, मातृजठरस्थित इत्यर्थः, यो यः तस्य कर्मणः—मत्पितृवधरूपस्येति भावः, साक्षी—साक्षात् द्रष्टा, दृष्ट्वाऽपि प्रतीकारार्थं यत्नाभावेन उदासीन इव स्थित इत्यर्थः, तथा मयि रणे—सङ्ग्रामव्यापारे इत्यर्थः, चरति—तिष्ठति सति, यश्च यश्च प्रतीपः,—प्रतिकूलः, मद्विरोधमाचरिष्यतीति भावः, क्रोधेन—पितृनिधनजनितेन इति भावः, अन्धः,—कर्त्तव्याकर्त्तव्यविवेकशून्यः सन्, स्वयं—साक्षात्, जगताम् अन्तकस्यापि—यमस्यापि, सकललोकोच्छेदनसमर्थस्यापीत्यर्थः, इह—रणक्षेत्रे, न तु अन्यत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

पदांशेऽप्येतत्, यथा,—

"तद्गच्छ सिद्धैर कुरु देवकार्य्यम्" इत्यत्र "द्धैर" इति पदांशं दुष्टमाहुः।

अनुचितार्थत्वं (५) पदगतं यथा,—

"तपस्विभिर्या सुचिरेण लभ्यते
प्रयत्नतः सत्रिभिरिष्यते च या।
प्रयान्ति तामाशु गतिं यशस्विनो
रणाश्वमेधे पशुतामुपागताः॥" (६)

अत्र पशुपदं कातर्य्यम् (७) अभिव्यनक्तीत्यनुचितार्थम्।

उद्धतं वाच्यं यथा,—

"संवर्त्तप्रकटविवर्त्तसप्तपाथो-
नाथोर्मिव्यतिकरविभ्रमप्रचण्डः।

---

(५) अनुचितार्थत्वम्—अयुक्तार्थत्वम्।

(६) तपस्विभिरिति।—तपस्विभिः,—चान्द्रायणाऽऽदिव्रतपरायणैः जनैः, या—गतिः, सुचिरेण—सुदीर्घकालेन, अतिदीर्घकालिकतपोऽनुष्ठानेनेति भावः, लभ्यते—प्राप्यते, सत्रिभिः,—याज्ञिकैः जनैः, प्रयत्नतः,—बहुप्रयासेनेत्यर्थः, या च—गतिः, इष्यते—वाञ्छ्यते, रणाश्वमेधे—सङ्ग्रामरूपाश्वमेधयज्ञे, पशुताम्—अश्वतामिति भावः, उपागताः,—प्राप्ताः, निहता इति भावः, अत एव यशस्विनः,—कीर्त्तिशालिनः, वीरा इति शेषः, तां गतिं—स्वर्गरूपामिति भावः, आशु—शीघ्रं, प्रयान्ति—गच्छन्ति। वंशस्थविलं छन्दः।

(७) कातर्य्यमिति।—कातर्य्यं—दैन्यं, पशवो हि पराऽऽयत्तत्वात् सततदीना एव, तादृशवीराणान्तु स्वाधीनवृत्तित्वात् पशुत्वकीर्त्तनमतीवायुक्तमिति भावः।

इति भावः, अहं तस्य तस्य अन्तकः,—संहर्त्ता, अस्मि इति शेषः, तान् सर्वान् नाशयिष्यामीत्यर्थः। अत्र वक्तुरश्वत्थाम्नः क्रुद्धत्वात् "यो यः शस्त्रं बिभर्त्ति" इत्यादीनां दुःश्रवत्वमपि गुण इति बोध्यम्। स्रग्धरा वृत्तम्।

(ख) संवर्त्तेति।—संवर्त्ते—कल्पान्ते, ("संवर्त्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि" इत्यमरः) प्रकटः,—विषमः, विवर्त्तः,—परिणामो येषां तादृशाः ये सप्त पाथो-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाक्यगतन्तूह्यम् ।

ग्राम्यत्वं * (८)—केवलं लोके एव स्थितत्वम् ।

पदगतं यथा,—

"किं रुषा शोणितस्पर्द्धी गल्लस्ते स्पन्दते भृशम्" । (९)

निर्घोषः स्फुरति भृशं परःसहस्र-

व्यावल्गत्प्रबलगतागतास्रपाणाम् ॥" (ख) [वीर०]

रौद्रादिरसे तूदाहरणानि पूर्वमुक्तानि ।

* ग्राम्यत्वम् अधमोक्तिषु गुणः । यथा अभिज्ञानशकुन्तले,—"लाल । एत्तिके दाव एदस्स आगमे, अध मां मालेध कुट्टेध वा ।" (ग) अत्र "मालेध" "कुट्टेध" इति पदे ग्राम्ये ।

---

(८) ग्राम्यत्वमिति ।—काव्येषु अलौकिकचमत्कारिपदप्रयोग एव युक्तः, न तु सामान्यजनप्रयोज्यपदप्रयोगः ; तथात्वे काव्यस्य चमत्कारित्वं नश्यतीति भावः । ग्राम्यः,—ग्रामीणजनः,सामान्यजन इत्यर्थः, तस्य भावः, येन प्रयोगेण ग्राम्यत्वं प्रतीयते, तादृशप्रयोगो ग्राम्यः, स तु सहृदयानामप्रीतिकर इत्यस्य दोषत्वमिति भावः ।

(९) किमिति ।—रुषा—क्रोधेन, शोणितस्पर्द्धी—रुधिरनिभः, ते—तव, गल्लः,—कपोल इत्यर्थः, भृशम्—अत्यर्थं, स्पन्दते—स्फुरति । अत्र गल्लशब्दो ग्राम्यः । पथ्यावक्त्रं वृत्तम् ।

नाथाः,—पाथः,—जलं, ("कबन्धमुदकं पाथः" इत्यमरः) तस्य नाथाः,—अब्धिपाः, सप्त सागराः इत्यर्थः, तेषाम् ऊर्मीणां—तरङ्गाणां, ये व्यतिकराः,—सम्मेलनानि, तेषां यो विभ्रमः,—विलासः, विषमगतिविशेषः इति यावत्, तद्वत् प्रचण्डः,—दारुणः, परःसहस्राणां—सहस्राधिकानां, ("परःशताद्यास्ते येषां परा सङ्ख्या शताधिका" इत्यमरः) व्यावल्गतां—सञ्चरतां, प्रबलानां गतानां—रणकर्मणा निहतानाम्, अगतानां—रणकर्मणि सक्तानाञ्च,अस्रपाणां—राक्षसानां, ("राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः" इत्यमरः) निर्घोषः,—सिंहनादः, भृशम्—अत्यर्थं, स्फुरति—प्रसरति । अत्र राक्षसानां निर्घोषस्य वाच्यतया वाच्योऽङ्गतत्वं बोध्यम् । प्रहर्षिणी वृत्तम् ।

(ग) एत्तिके इति ।—["एतावांस्तावदेतस्याऽऽगमः, अथ मां मारयत कुट्टयत वा" इति सं] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

वाक्यगतं यथा,—

"ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः ।
करोति खादनं पानं सदैव तु यथा तथा ॥" (१०)

प्रथमे गल्लशब्दः, द्वितीये भल्लादयश्च शब्दाः ग्राम्याः ।

निहतार्थत्वम् *—उभयार्थकस्य शब्दस्य अप्रसिद्धेऽर्थे प्रयोगः । यथा,—"यमुनाशम्बरमम्बरं व्यतानीत्" । (११)

शम्बरशब्दो दैत्यविशेषे प्रसिद्धः, इह तु जले निहतार्थः । (१२)

क्लिष्टत्वम् †—अर्थप्रतीतेर्व्यवहितत्वम् । पदगतं यथा,—

"क्षीरोदजावसतिजन्मभुवः प्रसन्नाः" ।

अत्र क्षीरोदजा—लक्ष्मीः, तस्या वसतिः,—पद्मं, तस्य जन्मभुवः,—जलानि, इत्यतिकष्टेन बोधः ।

वाक्यगतं यथा,—

"धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः ।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ? ॥" (१३)

अत्र धम्मिल्लस्य—केशबन्धस्य, शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति सम्बन्धः क्लिष्टः ।

---

* श्लेषादौ एतन्न दोषः ।

† क्लिष्टत्वं, विरुद्धमतिकारित्वम्, अविमृष्टविधेयांशभावश्च । एतानि समासगतान्येव पददोषाः ।

---

(१०) ताम्बूलेति ।—ताम्बूलभृतगल्लः,—ताम्बूलपूर्णवदन इत्यर्थः, अयं मानुषः भल्लं—सुष्ठु इत्यर्थः, जल्पति—कथयति, अत्र तु चार्थे, किञ्चेत्यर्थः, यथा तथा—यत्र तत्र, सदैव खादनं—भोजनं, पानञ्च करोति । पथ्यावक्त्रं वृत्तम् ।

(११) यमुनेति ।—यमुनायाः शम्बरं—जलं [कर्तृ], ("शम्बरं सलिले पुंसि मृगदैत्यविशेषयोः" इति मेदिनी) अम्बरम्—आकाशं, व्यतानीत्—व्याप ।

(१२) शम्बरेत्यस्य पदत्वात् पदगतं दुष्टत्वम् । पदांशगतत्वे तु,—"धातुमत्तां गिरिर्धत्ते" इत्युदाहरणं बोध्यम्, अत्र हि मत्तेति पदांशो दुष्टः ।

(१३) धम्मिल्लस्येति ।—अपूर्वा—पूर्वमदृष्टा अश्रुता वा, बन्धे—केशबन्धनविषये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अप्रतीतत्वम्*—एकदेशशास्त्रान्तरमात्रप्रसिद्धत्वम् । यथा,—

"योगेन दलिताऽऽशय:" ।

अत्र आशयशब्दो वासनाऽर्थो योगशास्त्रे एव प्रसिद्ध: ।

विरुद्धमतिकारिता यथा —

"उदारचरितो धीमान् सर्वलोकप्रियङ्कर: ।
अकार्य्यमित्रमेकोऽसौ तस्य किं वर्णयामहे ? ॥" (१४)

अत्र कार्य्यं विना मित्रमिति विवक्षितम्, अकार्य्येषु मित्रमिति विरुद्धा प्रतीति: ।

---

* "गुण: स्यादप्रतीतत्वं ज्ञत्वं चेद्वक्तृवाच्ययो:" । [विश्वनाथ:]

यथा,—"त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्त्तिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदु: ॥" (घ) [कुमारस०]

अत्र वक्तृवाच्ययोस्तदर्थबोधान्न दोष: ।

इत्यर्थ:, व्युत्पत्ति:,—ज्ञानं, नैपुण्यमित्यर्थ:, यस्या: तथाभूताया:, कुरङ्गशावाक्ष्या:,—मृगाक्ष्या:, धम्मिल्लस्य—संयतकेशकलापस्य, ("धम्मिल्ला: संयता: कचा:" इत्यमर:) शोभां—सौन्दर्य्यं, प्रेक्ष्य कस्य मानसं निकामम्—अत्यर्थं, न रज्यति ?—न रक्तं भवति ? सर्वस्यैव रज्यतीत्यर्थ: । अत्र पदानां पदान्तरपातितया दुर्बोध्यान्वयत्वे क्लिष्टत्वं वाक्यमात्रगामीति बोध्यम् । आर्य्या वृत्तम् ।

(१४) उदारेति ।—असौ एक: उदारं—महत्, चरितं यस्य तादृश:, धीमान्—प्राज्ञ:, सर्वलोकानां प्रियङ्कर:,—प्रियकारी, अकार्य्यमित्रम्—अहेतुकबन्धुरित्यर्थ:, तस्य किं वर्णयामहे ? न किमपीति भाव: । अत्र "अकार्य्यमित्रम्" इत्यस्यैव एकस्य पदस्य विरुद्धमतिकारितया पददोष: । पंथ्यावक्त्रं छन्द: ।

(घ) त्वामिति ।—ब्रह्माणं प्रति देवानां स्तुतिरियम् । हे देव ! त्वां पुरुषार्थप्रवर्त्तिनीं—भोगापवर्गसाधयित्रीं, प्रकृतिं—मूलकारणं, ("प्रकृति: पञ्चभूतेषु प्रधाने मूलकारणे" इत्यमर:) आमनन्ति—कथयन्ति, बुधा इति शेष: ; तथा त्वामेव तद्दर्शिनं—तस्या:,—प्रकृते:, दर्शिनं—द्रष्टारम्, अध्यक्षरूपेणेति भाव:, ["मयाऽध्यक्षेण प्रकृति: सूयते सचराचरम्" (गीता० ९ अध्या० १० श्लोक:) इति अर्जुनं प्रति भगवदुक्ते:]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अविमृष्टः,—प्राधान्येनानिर्दिष्टः, विधेयांशो यत्र तस्य भावः अविमृष्टविधेयांशभावः ; अयं विधेयाविमर्श इति च कथ्यते । यथा,—

"वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यत् बालमृगाक्षि ! मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ? ॥" (१५) [कुमारस०]

अत्र अलक्ष्यं विधेयं, तस्य च समासे गुणीभावादप्राधान्येन निर्देशः । यथा वा,—

"अमुक्ता भवता नाथ ! मुहूर्त्तमपि सा पुरा" ।

अत्र नञो विधेयत्वमेवोचितम् । यथा निम्ने श्लोके,—

"नवजलधरः सन्नद्धोऽयं, न दृप्तनिशाचरः
सुरधनुरिदं दूराऽऽकृष्टं, न तस्य शराऽऽसनम् ।

---

(१५) वपुरिति ।—पार्वतीं प्रति जटिलरूपिणो हरस्योक्तिरियम् । हे बाल-मृगाक्षि !—मृगशावकनयने ! वपुः,—शरीरं,शम्भोरिति शेषः, विरूपाक्षि—विषमाक्षि, अक्षीणि यस्य तादृशं विरूपाक्षं—त्रिनेत्रं, कुत्सितमिति भावः, अलक्ष्यम्—अज्ञातं, जन्म यस्य तथोक्तः, तस्य भावः अलक्ष्यजन्मता—अकुलीनत्वमिति भावः, ["अलक्षिता जनिः" इति (निर्दुष्टे) पाठे,—जनिः,—उत्पत्तिः,अलक्षिता—अज्ञाता,"जनिरुत्पत्ति-रुद्भवः" इत्यमरः] तथा दिगम्बरत्वेन—नग्नत्वेन, वसु—धनं, निवेदितं—सूचितम् ; यस्य धनमस्ति, स कदाऽपि न नग्नस्तिष्ठति, अस्य तु तदभावात् दिगम्बरत्वमिति भावः । (अतः) वरेषु—उपयन्तृषु, यत्—रूपाऽऽदित्रयमित्यर्थः, (तदुक्तम्,—"कन्या वरयते रूपं माता वित्तं पिता श्रुतम् । बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥" इति) मृग्यते—कन्या-तद्बन्धुभिः अन्विष्यते, त्रिलोचने—हरे, तत् व्यस्तमपि—एकमपीत्यर्थः, समस्तं दूरापास्तमिति भावः, किम् अस्ति ? नेवेत्यर्थः । वंशस्थविलं वृत्तम् ।

(१६) नवेति ।—उर्वशीविरहिणः पुरूरवस उक्तिरियम् । अयं नवजलधरः,—

उदासीनम्—असंसृष्टं, कूटस्थमिति यावत्, पुरुषम्—आत्मानं, विदुः,—जानन्ति, अत्रापि बुधा इति शेषः । अत्र देवेन्द्राऽऽदयो वक्तारः, भगवांश्च वाच्यः, इति तदुभया-पेक्षया वाक्यार्थस्य दुर्बोध्यत्वाभावान्न दोषः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अयमपि पटुर्धाराऽऽसारः, न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत्, प्रिया न ममोर्वशी ॥" (१६)

[विक्रमो०]

"जुगोपाऽऽत्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुरादद्दे सोऽर्थानसक्तः सुखमन्वभूत् ॥" (१७) [रघुवंशम्]

इत्यत्र तु अत्रस्ततादीनामनुवादेनाऽऽत्मगोपनादीनामेव विधेयमिति न दोषः ।

वाक्यगतो यथा,—

"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो ! रावणः ।
धिक् ! धिक् ! शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ? ॥"(१८)

[महाना०]

नूतनमेघः, सन्नद्धः,—समुदितः, दृप्तः,—प्रचण्डश्चासौ निशाचरश्चेति स न ; इदं दूराऽऽकृष्टं—दूरात् आकृष्टं, सुरधनुः,—शक्रकार्मुकं, तस्य—निशाचरस्य, शराऽऽसनं—धनुः, न ; अयमपि पटुः,—प्रबलः, धाराऽऽसारः,—वृष्टिधारापातः, बाणपरम्परा—शरवर्षणधारा न ; कनकस्य निकषः,—कषणरेखा, तद्वत् स्निग्धा—मनोज्ञा, स्फुरन्ती इति यावत्, विद्युत्, इयमिति शेषः, मम प्रिया उर्वशी न । अत्रेदं बोध्यम् ;—"न दृप्तनिशाचरः" इत्यत्र नञोऽसमस्तत्वात् यथा न निषेधरूपस्य विधेयस्य गुणीभावः, तथा "अमुक्ता" इत्यत्रापि वाच्यम् ; अथ न तथोक्तमिति अत्र दोष इति । वृत्तं हरिणी ।

(१७) जुगोपेति ।—सः,—राजा दिलीपः, अत्रस्तः,—त्रासरहितः सन्, आत्मानं जुगोप—ररक्ष, अनातुरः,—अक्लान्तः सन्, धर्मं भेजे—सिषेवे, अगृध्नुः,—अलोलुपः सन्, अर्थान्—करान्, आददे—जग्राह, प्रजाभ्य इति शेषः, तथा असक्तः,—आसक्तिरहितः सन्, सुखम् अन्वभूत्—बुभुजे । पथ्यावक्त्रं वृत्तम् ।

(१८) न्यक्कार इति ।—राक्षसकुलं विनाशयति श्रीरामचन्द्रे रावणस्य हनुमन्नाटके स्वभर्त्सनोक्तिरियम् । मे—मम, अरयः,—शत्रवः, इति यत्, अयमेव न्यक्कारः,—निकारः, अवमाननमित्यर्थः, तत्रापि—अरिष्वपि, असौ—अरिः, राम इति भावः, [द्वेषातिशयख्यापनाय रामस्य अदःशब्देन निर्देशः] तापसः,—क्षुद्रतपस्वी, नु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्" इत्युक्तेरुद्देश्यस्य प्रथमं, ततो विधेयस्य निर्देशो युक्तः। अत्र न्यक्कारस्य विधेयत्वे विवक्षितेऽपि प्रथमं निर्देशात् न तथा प्रतीतिः। रचना च पदद्वयस्य विपरीतेति वाक्यदोषः। यथा वा,—

"आनन्दयति ते नेत्रे योऽसौ सुभ्रु! (१९) समागतः"।

अत "असौ" इत्यस्य विधेयत्वमेव भवितुं युक्तः, तच्च यच्छब्दनिकटस्थतया अनुवाद्यत्वप्रतीतिकृत्।

सन्दिग्धत्वं * यथा,—

"आशीःपरम्परां (२०) वन्द्यां कर्णे कृत्वा कृपां कुरु"।

अत्र वन्द्यामिति वन्दीभूतायाम्, उत वन्दनीयायामिति सन्देहः।

---

* "सन्दिग्धत्वं गुणो व्याज-स्तुतिपर्य्यवसायि चेत्।" [विश्वनाथः]

तु दैवयद्वाद्यन्यतमः इति भावः; सोऽपि—तापसोऽपि, अत्रैव—लङ्कायामेव, मम राजधान्यामेव इति भावः, न तु दूरे इत्याशयः, साकेतादागत्येति शेषः, राक्षसकुलं—मम बान्धववंशं, न तु तेष्वेक द्वौ त्रीन् वेति भावः, निहन्ति—नाशयति, अहो!—आश्चर्य्यं, रावणो जीवति, न तु मृतः, मृते तु रावणे कथञ्चित् राक्षसकुलनिहननं सम्भवेदिति भावः, एतावति निकारेऽपि रावणस्य जीवनमाश्चर्य्यमित्यर्थः। शक्रजितम्—इन्द्रजितं, धिक्! धिक्!—पुनः पुनः निन्दामीत्यर्थः, [इन्द्रजितः स्वापेक्षया गुरुत्वेऽपि प्रतिकारासमत्वे वारद्वयं न्यक्कारः। "धिक् निर्भर्त्सननिन्दयोः" इत्यमरः] इन्द्रजयिनाऽपि तापसात् पराजयो लब्ध इति भावः; प्रबोधितवता—जागरितेन, कुम्भकर्णेन वा किम्?—न किमपि कार्य्यं साधितमित्यर्थः; तथा स्वर्ग एव ग्रामटिका—क्षुद्रो ग्रामः,तस्या विलुण्ठनेन वृथा उच्छूनैः,—उद्दृप्ताः तैः,एभिः,—मदीयैरित्यर्थः, भुजैः,—बाहुभिः, विंशतिसङ्ख्यकैरिति भावः, किम्?—न किमपि प्रयोजनं सम्पादयितुं क्षममित्यर्थः। शार्दूलविक्रीडितम्।

(१९) सुभ्रु इति।—[भ्रूशब्दस्योवङ्स्थानीयतया "नेयङुवङ्स्थानावस्त्री" (१।४।४ पा०) इति नदीसंज्ञाप्रतिषेधे "अम्बार्थनद्योर्ह्रस्वः" (७।३।१०७ पा०) इति ह्रस्वत्वाभावात् प्रामादिकोऽयं प्रयोग: इत्येके; अन्ये तु,—"अप्राणिजातेश्चारज्ज्वादीनामुपसङ्ख्यानम्" इति वार्त्तिके "अलाबूः" "कर्कन्धूः" इत्याद्यूकारान्तादूङमुदाहृतवान् महाभाष्यकारः, इत्यस्याप्यूङन्तत्वात् नदीत्वे ह्रस्वत्वम्]।

(२०) आशीःपरम्परास्—आशिषां समूहम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाक्यमात्रगतान् दोषानाह,—

"वर्णानां प्रतिकूलत्वं सन्धौ विश्लेषकष्टते।
अधिकन्यूनकथित-पदताऽक्रमता तथा॥
भग्नप्रक्रमता ख्याति-हतता सङ्करोऽपि च।
गर्भितत्वं तथा काव्ये दोषाः स्युर्वाक्यमात्रगाः॥"

वर्णानां रसानुगुणत्वं वक्ष्यते, तद्वैपरीत्यं प्रतिकूलत्वम्। यथा,—"कृतमनुमतम्" (२० पृ०) इत्यादि पूर्वमुक्तम्। अत्र हि गाढ़बन्धत्वं दीर्घसमासत्वञ्च उचितम्। तद्वैपरीत्यकरणात् दोषः।

सन्धौ विश्लेषः द्विविधः,—व्याकरणलक्षणानुसारेण कृतः, अनुशासनमुल्लङ्घ्य स्वेच्छया कृतश्च। पूर्वः असकृदेव दोषः, द्वितीयस्तु सकृदपि।

आद्यो यथा,—

"दलिते उत्पले एते अक्षिणी अमलाङ्गि! ते"।

द्वितीयो यथा,—

"वासवाऽऽशामुखे भाति इन्दुश्चन्दनविन्दुवत्"।

सन्धौ कष्टता—श्रुतिदुःखाऽऽवहत्वम्। यथा,—

"उर्व्यसावत्र तर्वालो मर्वन्ते चार्ववस्थितिः।
नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक्॥" (२१)

व्याजस्तुतिश्च अलङ्कारप्रस्तावे वक्ष्यमाणा। यथा,—

"पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव!।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्॥"

---

(२१) उर्व्यसाविति।—अत्र मर्वन्ते—मरोः,—निर्जलदेशस्य, अन्ते—अवसाने, असौ उर्वी—महती, चार्ववस्थितिः,— सुष्ठु स्थिता, तर्वाली—तरूणां श्रेणी, अत्र ऋजु—सरलं यथा तथा, गन्तुं न युज्यते—न शक्यते इत्यर्थः, तत्—तस्मात्, मनाक्—ईषत्, शिरः,—मस्तकं, नमय—नतं कुरु। पथ्यावक्रं वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधिकपदता * यथा,—"सदाशिवं नौमि पिनाकपाणिम्" इत्यत्र "पिनाकपाणिम्" इति विशेषणमधिकम्।

"कुर्य्यां हरस्यापि पिनाकपाणेः" इत्यत्र तु अतिदुष्प्रधृष्यत्व-सूचनाय "पिनाकपाणेः" इति विशेषणं युक्तमेव।

---

* "गुणः क्वाप्यधिकं पदम्" यथा,—

"आचरति दुर्ज्जनो यत् सहसा मनसोऽप्यगोचरानर्थान्।
तन्न न जाने जाने स्पृशति मनः किन्तु नैव निष्ठुरताम्॥" (ङ)

अत्र "न न जाने" इत्ययोगव्यवच्छेदकम्। द्वितीयं "जाने" इति अन्ययोगव्यवच्छेदकम् (च) इति वैचित्र्यातिशयः।

"सम्भ्रमे विस्मये हर्षे विषादेऽप्यधिकं पदम्।" गुण एव।

सम्भ्रमे यथा,—

"अर्घ्यमर्घ्यमितिवादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः।
क्षत्रकोपदहनार्चिषं ततः सन्दधे दृशमुदग्रतारकाम्॥" (छ) [रघु०]

(ङ) आचरतीति।—दुर्ज्जनः सहसा—अतर्कितभावेन, मनसोऽपि अगोचरान्—अविषयान्, कदाऽपि मनसि अचिन्तितानित्यर्थः, अर्थान्—कार्य्याणीति यावत्, यत् आचरति—अनुतिष्ठति, तत् न जाने इति न, अपि तु जाने एव; किन्तु मनः निष्ठुरतां नैव स्पृशति—आश्रयति; दुर्ज्जनस्य दौर्ज्जन्यं जानामि, परं तस्य अनिष्टं कर्त्तुं नेच्छामीति भावः। गीतिः (आर्य्याभेदः) वृत्तम्।

(च) अयोगव्यवच्छेदकम्—अयोगस्य—ज्ञानाभावस्येत्यर्थः, व्यवच्छेदकं—निराकारकम्; तथा च,—दुर्ज्जनस्य दौःशील्यं मे ज्ञातमस्तीति भावः। जाने इति—द्वितीयं जाने इति पदमित्यर्थः, अन्ययोगस्य—अपरज्ञानस्य, व्यवच्छेदकम्; तथा च, अहमेव जाने, नान्यः इति; अथवा,—अहं यथा जाने, तथा नान्य इति भावः।

(छ) अर्घ्यमिति।—भग्नहरकार्मुकं कृतसीतोद्वाहं पुत्रं रामं गृहीत्वा अयोध्याऽभिमुखं गच्छतो दशरथस्य परशुरामं सक्रोधमागतं वीक्ष्य सम्भ्रमोक्तिरियम्। सः,—परशुरामः, अर्घ्यम् अर्घ्यं, गृहाण इति शेषः, इतिवादिनं नृपं—दशरथमित्यर्थः, अनवेक्ष्य—अगणयित्वा इत्यर्थः, यतः,—यस्यां दिशि, भरताग्रजः,—रामः, तिष्ठतीति शेषः, ततः,—तस्यां दिशि, क्षत्रकोपदहनार्चिषं—क्षत्रियान् प्रति कोपानलशिखारूपाम्, उदग्रतारकां—भयङ्करतारकां, दृशं—चक्षुः, सन्दधे—पातयामास। रथोद्धता छन्दः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्यूनपदता * यथा,—"तथाभूतां दृष्ट्वा" (१२ पृ०) इत्यादौ पूर्वमुक्ते। अत्र "अस्माभिः" इति, "खिन्ने" इत्यस्मात् पूर्वम् "इत्थम्" इति च पदं न्यूनम्।

विस्मये हर्षे च यथा,—

"दृष्ट्वा स्फीतोऽभवदलिरसौ लीलपद्मं विशालं
चित्रं! चित्रं! किमिति! किमिति! व्याहरन् निष्पपात।
नास्मिन् गन्धो न च मधुकणा नास्ति तत् सौकुमार्य्यं
घूर्णन् मूर्द्धा बत! नतशिरा व्रीड़या निर्जगाम॥" (ञ) [भ्रमरा०]

विषादे यथा,—

"रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मजालम्।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा! हन्त! हन्त! नलिनीं गज उज्जहार॥" (झ)

[भ्रमराष्टकम्]

* "उक्तावानन्दमग्नादेः स्यान्न्यूनपदता गुणः।"

(ञ) दृष्ट्वेति।—असौ अलिः,—भ्रमरः, विशालं—महत्, लीलपद्मं—विकसित-कमलं, दृष्ट्वा, स्फीतः,—आनन्दोत्फुल्ल इत्यर्थः, अभवत्; चित्रं चित्रम्—आश्चर्य्य-माश्चर्य्यं, किमिति किमिति व्याहरन्—ब्रुवन्, निष्पपात, तस्मिन् लीलपद्मे इति शेषः; अस्मिन्—लीलपद्मे, न गन्धः, न च मधुकणा—मकरन्दविन्दुश्च न, तत्—प्रसिद्धं, प्रकृतपद्मवत् इति शेषः, सौकुमार्य्यं—सुकोमलत्वम्, अपि नास्ति, इति दृष्ट्वेति शेषः, बत—खेदे, मूर्द्धा घूर्णन् व्रीड़या—लज्जया, नतशिराः,—अवनतमस्तकः सन्, निर्जगाम, तस्मादिति शेषः। मन्दाक्रान्ता वृत्तम्।

(झ) रात्रिरिति।—रात्रिः गमिष्यति—रजनी निवर्त्तिष्यते, सुप्रभातं भवि-ष्यति—सम्पत्स्यते, भास्वान्—सूर्य्यः, उदेष्यति—उत्थास्यति, पद्मजालं—कमलवृन्दं, हसिष्यति—विकसिष्यति, कोषगते—कमलकुड्मलस्थिते, द्विरेफे—भ्रमरे, इत्थम्—एवंरूपं, विचिन्तयति सति, हा! हन्त! हन्त!—विषादसूचकमव्ययत्रयमेतत्, गजः नलिनीं—पद्मिनीम्, उज्जहार—उदपाटयत्। वसन्ततिलकं छन्दः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथितपदत्वं * यथा,—

"प्रियं चेत् भरतस्यैतत् रामप्रव्राजनं भवेत्।
मास्म मे भरत: कार्षीत् प्रेतकृत्यं कदाचन॥" (२२) [रामायणे]

अत्र भरत इति पुन: कथितं, सर्वनाम्नैव अस्य परामर्शो युक्त:। "मास्म मेऽसौ सुत:" इत्यदुष्टम्।

अक्रमत्वम्—अविद्यमान: क्रम:,—पदस्थितिक्रमो यत्र तत् अक्रमं, तस्य भाव:। यथा,—

"द्वयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया पिनाकिन:।

* यत्र तत्पदप्रयोग एव न युक्त:, तत्र अधिकपदत्वम्; यत्र तु पर्य्यायान्तरेण सर्वनाम्ना वा तत्प्रयोगो युक्त:, तत्र कथितपदत्वम्।

विहितस्य अनुवाद्यत्वे कथितपदत्वं गुण:। यथा,—

"उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥" (ञ)

अत्र ताम्रपदस्य कथितपदत्वेऽपि उत्तरवाक्येऽनुवाद्यत्वान्न दोष:। यथा वा,—

"जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पद:॥"

(२२) प्रियमिति।—चेत्—यदि, एतत् रामस्य प्रव्राजनं—वनप्रेषणं, भरतस्य प्रियं भवेत्, तदा भरत: कदाचन मे प्रेतकृत्यं मास्म कार्षीत्—न करोतु।

(२३) द्वयमिति।—शिवप्राप्त्यर्थं तपस्यन्तीं पार्वतीं प्रति जटिलरूपिणो

(ञ) उदेतीति।—सविता—सूर्य्य:, ताम्र:,—रक्त: सन्, उदेति—उद्गच्छति, ताम्र एव—रक्त एव, अस्तमेति च—अस्तं गच्छति च। तथा हि, महतां, जनानामिति शेष:, सम्पत्तौ—सम्पदि च, विपत्तौ—विपदि च, एकरूपता—तुल्यता; महान्तो हि न कदाऽपि विकारमाप्नुवन्ति इति भाव:। पथ्यावक्त्रं वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कला च सा कान्तिमती कलावत-

स्त्वमस्य लोकस्य च नेत्रकौमुदी॥" (२३) [कुमारस०]

अत्र "त्वम्" इत्यनन्तरं चकारो युक्तः।

भग्नप्रक्रमता—भग्नः प्रक्रमः,—उद्देशानुगुणः प्रस्तावो यस्मिन् तत् भग्नप्रक्रमं, तस्य भावः। यथा,—

"यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसङ्ख्यामतिवर्त्तितुं वा।

निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति लक्ष्मीः॥"(२४)

[किरातार्जु०]

अत्र "सुखलिप्सया वा" इत्यत्र "सुखमीहितुं वा" इति तुमन्तप्रयोग एव युक्तः।

ख्यातिहतता—प्रसिद्धित्यागः। मेघाऽऽदीनां गर्जिताद्येव प्रसिद्धं, तदन्यथावर्णने ख्यातिहतत्वम्।

वाक्यान्तरपदानां वाक्यान्तरेऽनुप्रवेशः सङ्करः। यथा,—

"किमिति न पश्यसि? कोपं पादगतं बहुगुणमाद्रियस्वैनम्।

ननु मुञ्च हृदयनाथं सदयं मनसस्तमोरूपम्॥"

हरस्योक्तिरियम्। कलावतः,—चन्द्रस्य, सा—अतिप्रसिद्धा, कान्तिमती—लावण्यपूर्णा, कला—षोड़शभागैकभागः, ("कला तु षोड़शो भागः" इत्यमरः), अस्य लोकस्य—जगतः, नेत्रकौमुदी—नयनाऽऽनन्ददायिनीत्यर्थः, त्वञ्च (कान्तिमतीत्व-नेत्रकौमुदीत्वविशेषणद्वय-मुभयत्रापि अन्वेति) सम्प्रति एतद्द्वयं पिनाकिनः,—शम्भोः, समागमप्रार्थनया—सङ्गाभिलाषेण, शोचनीयतां—शोच्यत्वं, गतं—प्राप्तम्। प्रागेका एव शोच्या, सम्प्रति तु त्वमप्यपरा, इति निकृष्टाऽऽश्रयणात् द्वयं शोच्यमिति पिण्डितार्थः। वंशस्थविलं वृत्तम्।

(२४) यश इति।—यशः,—कीर्त्तिम्, अधिगन्तुं—लब्धुं, सुखस्य लिप्सया—लाभेच्छया वा, मनुष्यसङ्ख्यां—सामान्यमनुष्येषु गणनाम्, अतिवर्त्तितुम्—अतिक्रमितुं वा, अमानुषीं क्रियां कर्त्तुमिति यावत्, निरुत्सुकानां—निरुद्वेगानाम्, अभियोगभाजाम्—उद्योगिनां, निरुद्वेगेनोद्योगमातन्वतामित्यर्थः, लक्ष्मीः,—सम्पत्, सिद्धिरित्यर्थः, समुत्सुकेव—समुत्कण्ठता कामिनीव, अङ्कं—क्रोड़म्, उपैति—आगच्छति। उपजातिः वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र पादगतं बहुगुणं हृदयनाथं किमिति न पश्यसि? एनं सदयमाद्रियस्व, मनसस्तमोरूपं कोपं मुञ्चेत्यन्वयः। एकवाक्यगतत्वे तु क्लिष्टत्वमित्यस्माद्भेदः।

वाक्यान्तरे वाक्यान्तरप्रवेशो गर्भितत्वम्। * यथा,—

"परापकारनिरतैर्दुर्जनैः सह सङ्गतिः।
कर्त्तव्यः साधुसंसर्गो न विधेया कदाचन॥"

अत्र तृतीयपादवाक्यं वाक्यान्तरमध्ये प्रविष्टम्।

अर्थदोषानाह,—

"दुष्क्रमग्राम्यकष्टत्वं व्याहतत्वमहेतुता।
अनवीकृतता पौनरुक्त्यं ख्यातिविरुद्धता॥

---

* गर्भितत्वं क्वचिद्गुणः; यथा,—

"दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा साऽपि वदन्त एव हि वयं रोमाञ्चिताः पश्यत।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमः
यस्मात् प्रादुरभूत् कथाऽद्भुतमिदं यत्रैव चास्तं गतम्॥"(ट)

अत्र "वदन्त एव हि" इत्यादिवाक्यं वाक्यान्तरमध्ये प्रविष्टं चमत्कारातिशयं पुष्णाति।

(ट) दिङ्मातङ्गेति।—सर्वां पृथिवीं जित्वा विप्रसात् कृतवन्तं परशुरामं दृष्ट्वा जनानामुक्तिरियम्। दिङ्मातङ्गानां—दिग्गजानां, घटाभिः,—समूहैः, चतुष्टयैरिति भावः, विभक्ताः,—विभज्य गृहीताः, चत्वारः आघाटाः,—सीमानः यस्याः तादृशी, मही—पृथ्वी, साध्यते—उपार्ज्यते, महामहिमशालिभिरिति शेषः, सा—मही, सिद्धाऽपि—स्ववशीकृताऽपीत्यर्थः, विप्राय—कश्यपाय इत्यर्थः, प्रतिपाद्यते—समर्प्यते, वदन्त एव—कथयन्त एव, हि वयं रोमाञ्चिताः,—सञ्जातरोमहर्षाः, जाता इति शेषः, पश्यत—अवलोकयत, अपरम्—अन्यत्, किं, वक्तव्यमिति शेषः, यस्मात—रामात्, इदं—समस्तायाः पृथिव्याः सम्प्रदानत्वरूपं, कथाऽद्भुतम्—अद्भुतकथेत्यर्थः, प्रादुरभूत्—जातं, यत्रैव च—रामे, अस्तं गतं, तथा च तत्तुल्यो न भूतो न वर्त्तमानो न वा भविष्यन्निति भावः; तस्मै रामाय—परशुरामाय, नमः। भट्टप्रभाकरस्येदं पद्यम्। शार्दूलविक्रीड़ितं वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुवादो विधिश्चैवमर्थदोषाः प्रकीर्त्तिताः ॥”

दुष्क्रमता—दुः,—दुष्टः, विरुद्ध इति यावत्, क्रमः,—वचनक्रमो यस्मिन् स दुष्क्रमः ; यथा,—वसन्ताऽऽदिवर्णने प्रथमं प्रवालोद्गमस्य, ततः कुसुमोत्पत्तेरनन्तरं पुष्पेषु शिलीमुखानाम् आपतनमिति यथाक्रममेवैतेषामाविष्करणमुचितं, विशिष्टहेतुं विना ततोऽन्यथावर्णने दुष्क्रमतादोषः। एवमन्यत्रापि।

ग्राम्यत्वं * यथा,—

“ताम्रभृङ्गारतुल्योऽयमर्को मज्जति वारिधौ”। (२५)

कष्टत्वम्—अर्थप्रतीतेर्व्यवहितत्वम्। यथा,—

“सदा मध्ये यासामियममृतनिष्यन्दसरसा
सरस्वत्युद्दामा वहति बहुमार्गा परिमलम्।
प्रसादं ता एता घनपरिचिताः केन महतां
महाकाव्यव्योम्नि स्फुरितमधुरा यान्तु रुचयः ॥” (२६)

* ग्राम्यत्वमधमोक्तिषु गुणः, यथा,—

“एसो ससहरबिंबो दीसइ हैअंगवीणपिंडो व्व।
एदे अ रस्सिममोहा पड़ंति आसासु दुद्धधार व्व ॥” (ठ)

(२५) ताम्रेति।—ताम्रभृङ्गारेण—रक्तवर्णजलपात्रविशेषेण, तुल्यः अयम् अर्कः,—सूर्य्यः, वारिधौ—समुद्रे, मज्जति—अस्तमेतीत्यर्थः।

(२६) सदेति।—अमृतवत् निष्यन्दः,—प्रकाश इति यावत्, तेन सरसा—रसवती, बहुमार्गा—नानारीतिसङ्घटिता, उद्दामा—प्रौढ़ा, इयं सरस्वती—वाणी,

(ठ) एसो इति।—[“एष शशधरबिम्बो दृश्यते हैयङ्गवीनपिण्ड इव। एते च रश्मिसमूहा पतन्ति आशासु दुग्धधारा इव ॥” इति संस्कृतम्]। इयं हि विदूषकोक्तिः। एषः,—परिदृश्यमानः, शशधरबिम्बः,—चन्द्रमण्डलं, (“बिम्बोऽस्त्री मण्डलं त्रिषु” इत्यमरः) हैयङ्गवीनपिण्डः,—नवनीतपिण्ड इव, दृश्यते, जनैरिति शेषः ; एते च रश्मिसमूहाः,—किरणसङ्घाः, आशासु—दिक्षु, (“दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः” इत्यमरः) दुग्धधारा इव पतन्ति। अत्र हैयङ्गवीनपिण्ड-दुग्धधाराशब्दप्रयोगो ग्राम्यः वक्तुरधमत्वप्रतीतिकारत्वाद्गुण एव।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र यासां कविरुचीनां मध्ये सुकुमारचित्रमध्यमाऽऽत्मक-त्रिमार्गा भारती चमत्कारं वहति, ता गम्भीरकाव्यपरिचिताः कथमितरकाव्यवत् प्रसन्ना भवन्तु? इत्येकोऽर्थः। यासामादित्य-प्रभाणां मध्ये त्रिपथगा वहति, ता मेघपरिचिताः कथं प्रसन्ना भवन्ति? इति द्वितीयोऽर्थः। अर्थद्वयमपि नितरां दुर्बोधम्; शब्दानां परिवर्त्तनेऽपि कष्टतायास्तादवस्थ्यादयमर्थदोषः।

कस्यचित् प्रागुत्कर्षमपकर्षं वा अभिधाय पश्चात् तदन्यथा-प्रतिपादनं व्याहतत्वम्। यथा,—

"हरन्ति हृदयं यूनां न नवेन्दुकलाऽऽदयः।
वीक्ष्यते यैरियं तन्वी लोकलोचनचन्द्रिका॥" (२७)

अत्र येषामिन्दुकला नाऽऽनन्दहेतुः, तेषामेवाऽऽनन्दाय तन्व्यां चन्द्रिकात्वाऽऽरोपः।

यासां—रुचीनां, मध्ये सदा परिमलं—सौरभं, वहति—रुचिभ्यः स्वदते इति भावः; अन्यच,—बहुमार्गा—त्रिपथगेत्यर्थः, उद्दामा—उत्कटवेगा, अमृतनिष्यन्दिनी सरस्वती—मन्दाकिनीत्यर्थः, यासां—सौरीणां, रुचीनां—किरणानां, मध्ये सदा परिमलं—देवाङ्गनानां विमर्दजनितगन्धं, वहति; ता एता महतां स्फुरितेन—सहजबोधेनेति भावः, मधुराः,—मधुराऽऽस्वादवत्यः, रुचयः,—अभिलाषाः, महाकाव्यं—दुर्बोधकाव्यं, व्योमेव—आकाशमिव तस्मिन्, घनपरिचिताः,—अतिपरिचिताः, (अपि-रवाध्याहार्यः) केन—कथं, प्रसादं—प्रसन्नतां, यान्तु? न कथमपि प्रसन्ना भवन्तीत्यर्थः; अन्यच,—ता एता महतां—भास्वतामित्यर्थः, स्फुरितेन—विकाशेन, मधुराः,—मनोहारिण्यः, रुचयः,—प्रभाः, महाकाव्यमिव व्योम तस्मिन्, घनपरिचिताः,—मेघाऽऽच्छादिता इति यावत्, केन—कथं, प्रसादं यान्तु? न कथमपि प्रसन्ना भवन्तीत्यर्थः। शिखरिणी वृत्तम्।

(२७) हरन्तीति।—यैः,—युवभिः, लोकानां लोचनचन्द्रिका—नयनाऽऽनन्दिनीति यावत्, इयं तन्वी—कृशाङ्गी, वीक्ष्यते—अवलोक्यते, नवेन्दुकलादयः,—अभिनवाश्चन्द्रकलाप्रभृतयः, तेषां यूनां—तरुणानां, हृदयं न हरन्ति—नाऽऽकर्षन्ति। अत्र इन्दुकलाऽऽदीनामपकर्षमुक्त्वा पश्चात् नायिकायाः उत्कर्षार्थे चन्द्रकलाकिरणरूप-चान्द्रकलाऽऽरोपेण उत्कर्षोऽभिहित इति बोध्यम्। पथ्यावक्त्रं वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहेतुता—(निर्हेतुता) * हेतोरवचनम् ; यथा,—

"गृहीतं येनाऽऽसीः परपरिभवान्नोचितमपि
प्रभावात् यस्याभून्न खलु तव कश्चिन्न विषयः।
परित्यक्तं तेन त्वमसि सुतशोकान्न तु भयात्
विमोक्ष्ये शस्त्र ! त्वामहमपि यतः स्वस्ति भवते ॥"(२८)
[वेणीसंहार०]

अत्र द्वितीयशस्त्रमोचने हेतुर्नोक्त इति निर्हेतुत्वम्।

* "निर्हेतुता तु ख्यातेऽर्थे दोषतां नैव गच्छति"।

यथा,—"चन्द्रं गता पद्मगुणान् न भुङ्क्ते
पद्माऽऽश्रिता चान्द्रमसीमभिख्याम्।
उमामुखन्तु प्रतिपद्य लोला
द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥" (ङ) [कुमारसं०]

अत्र रात्रौ पद्मस्य सङ्कोचः, दिवा चन्द्रमसश्च निष्प्रभत्वं लोकप्रसिद्धमिति 'न भुङ्क्ते' इति हेतुं नापेक्षते।

(२८) गृहीतमिति।—कर्णं प्रति कोपात् त्यज्यमानमस्त्रं सम्बोध्य अश्वत्थाम्न उक्तिरियम्। हे शस्त्र ! येन, मत्पित्रेति भावः, त्वं परपरिभवात्—द्रुपदादिरूपशत्रुभिः परिभवभयादित्यर्थः, ["परिभवभयात्" इति पाठान्तरेऽप्ययमेवार्थः] नोचितम्—अनुचितग्रहणमपीति यावत्, ब्राह्मणस्य शस्त्रग्रहणनिषेधादिति भावः, गृहीतम्—अवलम्बितम्, आसीः,—अभवः, यस्य—मत्पितुः, प्रभावात्—तेजसः, तव कश्चित्—कोऽपि, जन इति शेषः, विषयः,—गोचरीभूतः, न अभूत् इति खलु न, अपि तु सर्व एव जनस्तव गोचरीभूत इत्यर्थः, द्रोणस्य सर्वंजयित्वात् ; मत्पिता त्वां बहुषु लक्ष्येषु प्रयुक्तवानिति भावः ; तेन—मम पित्रा, सुतशोकात्—हतत्वेन मिथ्याश्रुतस्य मम शोकात्, न तु भयात्, शत्रुभ्य इति शेषः, त्वं परित्यक्तम् असि, अहमपि त्वां विमोक्ष्ये—त्यक्ष्यामि, यतः,—मोचनादित्यर्थः, भवते—तुभ्यं, स्वस्ति—शुभं, भूयादिति शेषः। शिखरिणी छन्दः।

(ङ) चन्द्रमिति।—पार्वत्या मुखवर्णनमिदम्। लोला—चपला, लक्ष्मीः चन्द्रं गता सती, रात्राविति भावः, पद्मगुणान्—कमलस्थितिजनितसुखानीति यावत्, न भुङ्क्ते—नाऽऽस्वादयति, पद्माऽऽश्रिता—पद्माधिष्ठिता सती, दिवसे इति भावः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनवीकृतत्वं यथा,—

"प्राप्ताः श्रियः सकलकामदुघास्ततः किम् ?
दत्तं पदं शिरसि विद्विषतां ततः किम् ?
सन्तर्पिताः प्रणयिनो विभवैस्ततः किम् ?
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ?" (२९) [वैराग्यशत०]

अत्र "ततः किम् ?" इति न नवीकृतम्। *

पौनरुक्त्यं यथा,—

"अस्त्रज्वालाऽवलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन् मम पितरि गुरौ सर्वधन्वीश्वराणाम्।
कर्णालं सम्भ्रमेण व्रज कृप ! समरं मुञ्च हार्दिक्य ! शङ्कां
ताते चापद्वितीये वहति रणधुरां को भयस्यावकाशः ?॥" (३०)
[वेणीसंहार०]

अत्र चतुर्थपादवाक्यार्थः पुनरुक्तः।

* भङ्ग्यन्तरेण निर्देश्यत्वं नवीकृतत्वम्। "ततः किम्" इत्यत्र "तस्मात् किम्" इत्यादिरूपेण शब्दपरिवर्त्तनेऽपि उत्कर्षाभावा-दनवीकृतत्वमेवेति कथितपदत्वाद्भेदः।

(२९) प्राप्ता इति।—कस्यचिद्विरागिण उक्तिरियम्। सकलकामदुघाः,—सर्वमनोरथपूरण्यः, श्रियः,—सम्पदः, प्राप्ताः, जनैरिति शेषः सर्वत्र योज्यः; ततः किम् ?—न किमपीत्यर्थः। विद्विषतां—वैरिणां, शिरसि पदं दत्तं, वैरिणो निर्जिता इति भावः, ततः किम ?। विभवैः,—सम्पद्भिः, प्रणयिनः,—बन्धवः, सन्तर्पिताः,—प्रीणिताः, ततः किम् ?। तनुभृतां—प्राणिनां, तनुभिः,—शरीरैः, कल्पं—प्रलयकालं यावदित्यर्थः, स्थितं—प्राणिनः प्रलयपर्य्यन्तजीविन इत्यर्थः, ततः किम् ? सर्वमेवा-लीकमसारञ्च जगदिति भावः। वसन्ततिलकं वृत्तम्।

(३०) अस्त्रेति।—अस्त्राणां ज्वालाभिः,—प्रभाभिः, अवलीढः,—ग्रस्तः, यः

("चन्द्राम्भोजं विकसति" इति कविसमयप्रसिद्धेः) चान्द्रमसीं—चान्द्रीम, अभिख्यां—शोभाम्, ("अभिख्या नामशोभयोः" इत्यमरः) न भुङ्क्ते; तु—किन्तु, उमायाः,—पार्वत्याः, मुखं, प्रतिपद्य—प्राप्य, द्विसंश्रयां—चन्द्रकमलवासजनितामिति भावः, प्रीतिम्—आनन्दम, अवाप—प्राप। पार्वत्या वदनं चन्द्रः, कमले च नेत्रे, तेषाञ्च दिवारात्रं तुल्यविकासित्वादिति भावः। उपजातिः छन्दः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ख्यातिविरुद्धता * यथा,—

* "कवीनां समये ख्याति गुणः ख्यातिविरुद्धता"। [विश्वनाथः]

कविसमयख्यातानि दर्पणे,—

"मालिन्यं व्योम्नि पापे, यशसि धवलता वर्ण्यते हासकीर्त्त्योः,
रक्तौ च क्रोधरागौ, सरिदुदधिगतं पङ्कजेन्दीवराऽऽदि।
तोयाऽऽधारेऽखिलेऽपि प्रसरति च मरालाऽऽदिकः पक्षिसङ्घो
ज्योत्स्ना पेया चकोरैः, जलधरसमये मानसं यान्ति हंसाः॥
पादाऽऽघातादशोकं विकसति, वकुलं योषितामास्यमद्यै-
र्यूनामङ्गेषु हाराः, स्फुटति च हृदयं विप्रयोगस्य तापैः।

प्रतिबलजलधिः,—प्रतिपक्षसैनिकसागरः, तस्य अन्तः,—अभ्यन्तरे, और्वायमाणे—वडवानल इवाऽऽचरति, सर्वधन्वीश्वराणां—सर्वेषां महाधनुर्धराणां, गुरौ—आचार्य्ये, सेनानाथे मम पितरि—द्रोणे, अस्मिन्—समरक्षेत्रे इति भावः, स्थिते—वर्त्तमाने सति, हे कर्ण! सम्भ्रमेण—भयेन, अलं—निरर्थकं, भयेन साध्यं नास्तीत्यर्थः। हे कृप! समरं—सङ्ग्रामक्षेत्रं, व्रज—गच्छ। हे हार्दिक्य!—हृदिकानन्दन! कृतवर्मन्नित्यर्थः, [अत्र मातृनामसम्बोधनेन भीरुत्वं सूचितम्] शङ्कां—त्रासं, मुञ्च—त्यज। भयाभावे हेतुमाह, ताते इत्यादि।—चापद्वितीये—धनुर्मात्रसहाये, ताते—पितरि, रणधुरां—सङ्ग्रामभारं, रणाग्रयायित्वमिति यावत्, वहति सति, भयस्य अवकाशः,—अवसरः, कः? नैव भयसम्भव इत्यर्थः। स्रग्धरा वृत्तम्।

(ढ) मालिन्यमिति।—व्योम्नि—आकाशे, पापे च मालिन्यम्; यशसि, तथा हासकीर्त्त्योश्च धवलता—शुभ्रता, वर्ण्यते, कविभिरिति शेषः; आकाशं पापञ्च कृष्णवर्णं, यशः कीर्त्तिर्हासश्च श्वेतवर्णो वर्णनीय इत्यर्थः। क्रोधरागौ—कोपानुरागौ, रक्तौ—रक्तवर्णौ, वर्ण्येते इति शेषः। पङ्कजेन्दीवराऽऽदि—पद्मकुवलयाऽऽदि, सरिदुदधिगतं—नदीसमुद्रगतं, वर्ण्यते इति शेषः। अखिलेऽपि—सर्वस्मिन्नेव, तोयाऽऽधारे—जलाऽऽशये, मरालाऽऽदिकः,—हंसाऽऽदिकः, पक्षिसङ्घः, प्रसरति—विचरति। चकोरैः,—पक्षिभेदैः, ज्योत्स्ना पेया—पातव्या। जलधरसमये—वर्षासु इत्यर्थः, हंसाः मानसं—तदाख्यं सरोवरं, यान्ति। योषितां—रमणीनां, पादाऽऽघातात्—चरणताड़नात्, अशोकं—तदाख्यं पुष्पम्; आस्यमद्यैः,—मुखनिःसृतसीधुगण्डूषैः, वकुलञ्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"ततश्चचार समरे शितशूलधरो * हरिः" ।

अत्र हरेः शूलं लोकेऽप्रसिद्धम् ।

विधेः,—विधेयस्य, अनुवादः,—अप्राधान्येन निर्देशः ; यथा,—"प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशाम्" इत्यत्र शयितः प्रयत्नेन बोध्यसे इति विधेयम् ।

रसदोषानाह,—

रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि ।
प्रतिकूलविभावादि-ग्रहो दीप्तिः पुनः पुनः ॥

मौर्वी रोलम्बमाला, धनुरथ विशिखाः कौसुमाः पुष्पकेतो-
र्भिन्नं स्यादस्य बाणैर्युवजनहृदयं, स्त्रीकटाक्षेण तद्वत् ॥
अह्न्यम्भोजं, निशायां विकसति कुमुदं, चन्द्रिका शुक्लपक्षे,
मेघध्वानेषु नृत्यं भवति च शिखिनां, नाप्यशोके फलं स्यात् ।
न स्याज्जाती वसन्ते, न च कुसुमफले गन्धसारद्रुमाणा-
मित्याद्युन्नेयमन्यत् कविसमयगतं सत्कवीनां प्रबन्धे ॥" (ढ)

* अत्र शूलशब्दस्य पर्य्यायान्तरेणोपादानेऽपि दोषस्यास्य सद्भाव इति प्रसिद्धिहतत्वाद्भेदः ।

विकसति । यूनां—तरुणानाम्, अङ्गेषु हाराः, वर्णनीया इति शेषः । विप्रयोगस्य—विरहस्य, तापैः,—सन्तापैः, हृदयं स्फुटति—विदीर्य्यते । पुष्पकेतोः,—कामस्य, मौर्वी—ज्या, रोलम्बमाला—भ्रमरश्रेणी, धनुः कौसुमं, विशिखाः,—शराः, कौसुमाः,—कुसुमनिर्मिताः । अस्य—कामस्य, बाणैः युवजनानां हृदयं भिन्नं—विदीर्णं, स्यात् । स्त्रीणां कटाक्षेण तद्वत्—भिन्नं स्यादिति भावः । अह्नि—दिवसे, अम्भोजं—पद्मं, निशायां कुमुदं—कैरवं, तथा शुक्लपक्षे चन्द्रिका विकसति ; चन्द्रिकायाः शुक्लपक्षोय-समस्तरात्रिसाधे असद्भावेऽपि सा वर्णनीया इति भावः । मेघानां ध्वानेषु—ध्वनिषु सत्सु, शिखिनां—मयूराणां, नृत्यं भवति । अशोके च फलं नापि—नैव, स्यात् । वसन्ते जाती—जातीपुष्पं, न स्यात् । गन्धसारद्रुमाणां—चन्दनवृक्षाणां, कुसुमं फलञ्च न स्यात्, इत्यादि तथा अन्यत् कवीनां समयगतं—सिद्धान्तसिद्धं वस्तु, सुकवीनां प्रबन्धे—ग्रन्थे, उन्नेयं—ऊहनीयम् । अपरापरादिपद्धाः शोध्याः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः।
अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्य्ययः॥
इत्यादिकाः सहृदयैः रसे दोषाः प्रकीर्त्तिताः॥

रसस्य स्वशब्देन—"रसः" इति शब्देन, हास्यादिशब्देन वा, अभिधानं, स्थायिनां—हासाऽऽदीनां, सञ्चारिणां—निर्वेदादीनाञ्च, स्वनाम्ना कथनं दोषः। प्रतिकूलानां—विरुद्धानां, *विभावाऽऽदीनां ग्रहः,—ग्रहणम्।

* "सञ्चार्य्यादेर्विरुद्धस्य बाध्यत्वेन वचो गुणः"। [विश्वनाथः]

यथा—
"क्वाकार्य्यम्? शशलक्ष्मणः क्व च कुलम्? भूयोऽपि दृश्येत सा?
दोषाणां प्रशमाय मे श्रुतमहो! कोपेऽपि कान्तं मुखम्।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः? स्वप्नेऽपि सा दुर्लभा
चेतः! स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति?॥"(ण)
[विक्रमो०]

अत्र शमाङ्गानां वितर्कमतिशङ्काधृतीनामभिलाषाङ्गौत्सुक्यस्मृतिदैन्यचिन्ताभिस्तिरस्कारः, पर्य्यन्ते चिन्ताप्रधानमास्वादप्रकर्षमाविर्भावयति।

(ण) क्वाकार्य्यमिति।—उर्वशीवियोगेन स्वमरणमुपक्रम्य पश्चान्निवर्त्तमानस्य पुरूरवस उक्तिरियम्। अकार्य्यं—स्त्रिया विरहेण मरणरूपमित्यर्थः, क्व? शशलक्ष्मणः,—चन्द्रस्य, कुलञ्च क्व? चन्द्रवंशोत्पन्नस्य मम अकार्य्यं न कथमपि युज्यते इति प्रशमभावविशसूचकं कदयमिति भावः। सा—उर्वशी, भूयोऽपि—पुनरपि, दृश्येत?—पुनस्तां द्रष्टुं प्राप्स्यामि किम्? इत्यर्थः। मे—मम, श्रुतं—शास्त्रज्ञान, दोषाणां—कुकार्य्याणां, प्रशमाय—शान्तये; शास्त्र ज्ञात्वा कथमहं कुकार्य्यं करोमि? इति भावः। अहो!—इति विषादे, कोपेऽपि मुखम, उर्वश्या इति शेषः, कान्तं—मनोहरम्। अपकल्मषाः,—निष्पापाः, कृतधियः,—विद्वांसः, किं वक्ष्यन्ति?—ईदृशं मां दृष्ट्वा निन्दिष्यन्तीत्यर्थः। सा स्वप्नेऽपि दुर्लभा—अदर्शनीयेति यावत्। हे चेतः!—चित्तम्! स्वास्थ्यं—धैर्य्यम, उपैहि—अवलम्बस्व। कः खलु धन्यः,—भाग्यवान्, युवा—तरुणपुरुषः, अधरं, तस्या इति शेषः, धास्यति?—पास्यति? शार्दूलविक्रीडितं वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा,—आदिमे निर्वेदाऽऽदीनां शान्तसञ्चारिणां, वीरे च वैवर्ण्यत्रासाऽऽदीनां भयानकस्यानुभावाऽऽदीनां ग्रहणम्। (३१)

पुनःपुनर्दीप्तिर्यथा,—कादम्बर्यां महाश्वेताविलापे।

अकाण्डे—अनुचितेऽवसरे, प्रथनं—प्रकटनम्। यथा,—वेण्यां द्वितीयेऽङ्के अनेकवीरसङ्क्षये प्रवृत्ते दुर्योधनस्य भानुमत्या प्रमोदवर्णनम्।

अकाण्डे छेदः यथा,—वीरचरिते राघवभार्गवयोर्द्वाराधिरूढे सङ्ग्रामे "कङ्कणमोचनाय गच्छामि" इति राघवस्योक्तिः। (३२)

अङ्गस्य अतिविस्तृतिः यथा,—किरातार्जुनीये सुराङ्गना-विलासाऽऽदिवर्णने। (३३)

अङ्गिनोऽननुसन्धानं यथा,—रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्या-ऽऽगमने सागरिकाया विस्मृतिः। (३४)

---

(३१) उदाहरति, यथेति।—आदिमे—आद्ये रसे। निर्वेदादीनामिति।—आदिपदेन हर्षधृतिवितर्कस्मृतिमतीनामेव ग्रहणम्। वर्ण्यमानत्वं विरुद्धमिति प्रकृतोऽर्थः। वैवर्ण्यत्रासाऽऽदीनामिति।—त्रासाऽऽदिपदेन ग्लानिदैन्याऽऽदीनां ग्रहणम्। भयानकस्येति।—इदम् आदिमबीभत्साऽऽदेरप्युपलक्षकम्; तेन, आदिमबीभत्साऽऽदि-सञ्चारिणामपि वीरे विरुद्धत्वमिति फलितम्। तथा च, वीरे रतिशोकहर्षौत्सुक्य-स्वप्नावहित्थाऽलसताचिन्ताऽऽदीनां सञ्चारिणामपि वर्णनमनुचितमेवेति बोध्यम्।

(३२) द्वाराधिरूढे—द्वारम् अधिरूढः तस्मिन्, प्रारम्भे इत्यर्थः। ["धाराऽधिरूढे" इति पाठान्तरे,—प्रवाहरूपेण प्रवृत्ते इत्यर्थः। "दूराधिरूढे" इति पाठे तु,—दूरम्—अत्यन्तम्, अधिरूढे—उद्भूते, उद्रेकं प्राप्ते इति यावत्]। कङ्कणमोचनाय—वैवाहिकं हस्तबद्धसूत्रं निर्ग्रन्थिकं कर्त्तुम्; वीरचरिते द्वितीयाङ्कान्ते,—"को दोषः? क्रियतां लोकधर्मः" इति जामदग्न्योक्तेः परम् "एवम्" इत्यनेनैव कङ्कणमोचनाय गच्छामि इत्यर्थबोधिका राघवोक्तिः अधीरतां प्रत्याययति इति दोषसद्भावः।

(३३) किरातार्जुनीयस्य वीररसप्रधानतया आद्यरसातिशयेन वीरस्य तिरोभावः।

(३४) अङ्गिन इति।—अङ्गिनः,—प्रधानस्य, अननुसन्धानं—विस्मरणम्। बाभ्रव्यस्य—सागरिकायाः पितृगृहादागतस्य कञ्चुकिनः। अयं भावः,—विजयवर्मणः

का—७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकृतयः,—दिव्याः, अदिव्याः, दिव्यादिव्याश्च, तेषु च धीरोदात्ताऽऽदयः, तत्र यो यथाभूतः, तस्यायथावर्णने प्रकृतिविपर्य्ययो दोषः ; यथा,—रामस्य छद्मना बालिवधः। यथा वा,—कुमारसम्भवे अष्टमे उत्तमदेवतयोः पार्वतीपरमेश्वरयोः सम्भोगवर्णनम्।

दोषाणां क्वचिददोषत्वं क्वचिद्गुणत्वञ्च.—

उक्तानां दोषाणां केषाञ्चित् क्वचिददोषत्वं, क्वचिद्गुणत्वञ्च। तच्च तत्तद्दोषोल्लेखस्थलेषु पत्राधोभागे द्रष्टव्यम्।

"अनुकरणे तु सर्वेषां दोषाणां स्याददोषता।"

यथा,—प्रलपत्येष वैधेयः "स्कन्धस्ते यदि बाधति।" (३५) अत्र बाधतीति दुष्टमप्यनुकरणत्वाददुष्टम्।

इति दोषविवेचनं नाम पञ्चमशिखा।

षष्ठशिखा।

गुणस्वरूपमाह मम्मटः.—

"ये रसस्याङ्गिनो धर्माः शौर्य्याऽऽदय इवाऽऽत्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥"

आत्मन एव हि यथा शौर्य्याऽऽदयः, नाऽऽकारस्य, तथा रस-

वृत्तान्तं श्रोतुं प्रसन्नचित्तेन नृपतिना सागरिकायाः नाम्नाऽपि न स्मरणं कृतम्; तेन नाटिकाप्रधानार्थस्य स्खलनं स्फुटं, तच्च न युक्तं, सागरिकाया एव तत्र प्रधानभूतत्वात्; प्रत्युत बाभ्रव्याऽऽगमने तस्याः स्मरणं नितान्तमपेक्षितमासीदिति नाटिकाप्रतिपाद्यः शृङ्गाररसो विच्छिन्नप्राय इति दोषः।

(३५) प्रलपतीति।—एष वैधेयः,—मूर्खः, प्रलपति—वक्ति। अन्यत् स्पष्टम्।

इति पञ्चमशिखा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यैव माधुर्य्याऽऽदयो गुणाः, न वर्णानाम्। अचलस्थितयः,—नियतावस्थानाः।

गुणविभागः,—

"माधुर्य्यौजःप्रसादाऽऽख्यास्त्रयस्ते" समुदीरिताः।

माधुर्य्यलक्षणमुक्तं काव्यप्रकाशे,—

"आह्लादकत्वं माधुर्य्यं" चित्तस्य "द्रुतिकारणम्।"

आह्लादकत्वम्—आनन्दजनकत्वम्। द्रुतिः,—गलितत्वमिव।

रसविशेषे द्रुतेरातिशय्यमाह,—

"करुणे विप्रलम्भे तत् शान्ते चातिशयान्वितम्।"

[मम्मटः]

अत्यन्तद्रुतिहेतुत्वादित्यर्थः।

रचनायां माधुर्य्यलक्षणम्,—

"मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्ट-ठ-ड-ढान् विना।
र-णौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः॥
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा॥" (१)

[विश्वनाथः]

यथा,—

"तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम्।
विधुरां ज्वलनातिसर्जनान्ननु! मां प्रापय पत्युरन्तिकम्॥" (२)

[कुमारस॰]

---

(१) मूर्ध्नीति।—मूर्ध्नि—शिरसि, वर्गस्य अन्त्यवर्णेन—शेषवर्णेन, युक्ताः,—ङ्क ञ्च प्रभृतय इत्यर्थः, ट-ठ-ड-ढान् विना—टादिव्यतिरिक्ता इत्यर्थः, लघू—अदीर्घौ अगुरू च, र णौ च—रेफो णकारश्च, वर्णाः,—उक्ता एते वर्णाः, तद्व्यक्तौ—तस्य—माधुर्य्यस्य, व्यक्तौ—प्रकटने, कारणतां—हेतुतां, गताः,—हेतवो भवन्तीत्यर्थः, तथा अवृत्तिः,—असमस्ता, वा—अथवा, अल्पवृत्तिः,—अल्पसमस्ता, मधुरा—मनोहारिणी, रचना—पदसन्दर्भः, तद्व्यक्तौ कारणतां गतेति शेषः।

(२) तदिति।—कामविरहिताया रतेर्वसन्तं प्रति विलापोक्तिरियम्। [हे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ओजःस्वरूपं तद्व्यञ्जकं वर्णाऽऽदिकञ्चाऽऽह विश्वनाथः,—

"ओजश्चित्तस्य विस्तार-रूपं दीप्तत्वमुच्यते ।
वीरबीभत्सरौद्रेषु क्रमेणाऽऽधिक्यमस्य तु ॥
वर्गस्याऽऽद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ ।
उपर्य्यधो द्वयोर्वा स-रेफाष्ट-ठ-ड-ढैः सह ॥
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः ।
तथा समासबहुला घटनौद्धत्यशालिनी ॥ (३)

वसन्त ! इत्यध्याहार्य्यम्] तत्—तस्मात् कारणात्, पतिवियोगेन अन्यथाऽपि मरणस्यावश्यम्भावित्वादित्यर्थः, भवता इदं—वक्ष्यमाणम्, अनन्तरम्—अतःपरकरणीयं, बन्धुजनप्रयोजनं—मित्रकृत्यं, क्रियताम्—अनुष्ठीयताम् ; [प्रार्थनायां लोट्]। किं तत् ? इत्याह, विधुरामिति ।—ननु !—भोः सखे ! विधुरां—कातरां, मां ज्वलनातिसर्जनात्—ज्वलनस्य—अग्नेः, अतिसर्जनं—दानं तस्मात्, अग्निदानादित्यर्थः,पत्या सह दग्धीकृत्येति भावः, पत्युरन्तिकं—स्वामिसन्निधिं, प्रापय—नय । सुन्दरी वृत्तम् ।

(३) ओज इति ।—चित्तस्य—मनसः, विस्ताररूपं—विस्फारस्वरूपं,दीप्तत्वं—ज्वलितत्वम्, ओजः उच्यते ; वीरबीभत्सरौद्रेषु तु अस्य—ओजसः, क्रमेण आधिक्यम्—आतिशय्यं, वीररसे ओजः, बीभत्सरसे ततोऽपि अधिकमोजः, रौद्रे तु ततोऽपि अधिकमित्यर्थः। वर्गस्य आद्यतृतीयाभ्यां—कग-चज-टड तद-पबैरित्यर्थः,युक्तौ,तदन्तिमौ—तयोः,—आद्यतृतीययोः,कगादीनामित्यर्थः, अन्तिमौ—परवर्त्तिनौ, खघ-छझ ठढ-थध फभा इत्यर्थः, वर्णौ, यथा—क्ख ग्घ इत्यादयः, तथा उपरि—शिरसि, अधः,—पदतले वा, द्वयोः,—उपर्य्यधोभागयोरित्यर्थः, सरेफाः,—रेफसहिताः, ["सरेफ." इति पाठे—रेफसहितः, वर्ण इति शेषः। "सरेफौ" इति पाठस्तु प्रामादिकः, रेफयुक्तस्य यस्य कस्यचिदपि वर्णस्य ओजोव्यञ्जकत्वात्] ; क्रमेण यथा,—अर्कः, अग्रम्, आर्द्रम् इत्यादयः, तथा ट-ठ-ड-ढैः सह—टादिसहिता इत्यर्थः,शकारश्च षकारश्च एते वर्णाः, तस्य—ओजसः, व्यञ्जकतां—प्रकाशकत्वं, गताः ; तथा समासबहुला—बहुसमस्तपदा, अत एव औद्धत्यशालिनी—उत्कटा, घटना—रचना, पदविन्यासः इति यावत्, तस्य व्यञ्जकतां गतेति शेषः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा,—"चञ्चद्भुजभ्रमितचण्डगदाऽभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि ! भीमः ॥" (४) [वेणीसं०]

प्रसादस्वरूपं तद्व्यञ्जकान् वर्णांश्चाऽऽह स एव,—

"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।
स प्रसादः समस्तेषु रसेषु रचनासु च ।
शब्दास्तद्व्यञ्जका अर्थ-बोधकाः श्रुतिमात्रतः॥"(५)

यथा,—

"गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ? ॥"(६)
[रघु०]

इत्यादिकं कालिदासग्रन्थेषु रामायणे च बाहुल्येन द्रष्टव्यम् ।

---

(४) चञ्चदिति ।—पाञ्चालीं प्रति भीमसेनस्योक्तिरियम् । हे देवि ! भीमः चञ्चद्भ्यां—चलद्भ्यां, भुजाभ्यां भ्रमिता—आघूर्णिता, या चण्डा—भीषणा, गदा तस्याः अभिघातेन—प्रहारेण, सञ्चूर्णितं,[हननमात्रे बहुलशोणिताभावात् सञ्चूर्णितेत्युक्तम्] ऊरुयुगलं यस्य तथाभूतस्य, सुयोधनस्य स्त्यानं—गाढ़ं, दृढ़ं यथा तथेत्यर्थः, अवनद्धेन—संलिप्तेन, घनेन—सान्द्रेण, शोणितेन—रक्तेन, शोणः,—रक्तवर्णः, पाणिर्यस्य तादृशः सन्, तव कचान्—केशान्, उत्तंसयिष्यति—भूषयिष्यति, संयंस्यतीत्यर्थः । ["उत्तम्भयिष्यति" इति पाठे,—संयमयिष्यतीत्यर्थः] । वसन्ततिलकं वृत्तम् ।

(५) चित्तमिति ।—अनलः,—अग्निः, शुष्कं—नीरसम्, इन्धनमिव—काष्ठमिव, यः क्षिप्रं—शीघ्रं, चित्तं व्याप्नोति—अधिकरोति, सहसाऽर्थबोधेन विमलयतीत्यर्थः, सः प्रसादः । शब्दा इति ।—श्रुतिमात्रतः,—श्रवणमात्रेणैवेत्यर्थः । स्पष्टमन्यत् ।

(६) गृहिणीति ।—इन्दुमतीविरहे अजस्य राज्ञः प्रलापवचनमिदम् । [हे प्रिये ! इत्यध्याहार्य्यम्] त्वां हरता, करुणाविमुखेन—निर्दयेन, मृत्युना—अन्तकेन, मे—मम, किं न हृतम् ? वद—कथय, सर्वमेव हृतमित्यर्थः ; तथा हि,—त्वं मे गृहिणी—गृहस्वामिनी, (इति गृहिणी हृता); त्वं मे सचिवः,—सदुपदेशकत्वात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"एषां शब्दगुणत्वञ्च गुणवृत्त्योच्यते बुधैः ।" (७)

गुणवृत्त्या—परम्परया ।

इति गुणविवेको नाम षष्ठशिखा ।

सप्तमशिखा ।

रीतिस्वरूपं तद्भेदांश्चाऽऽह,—

"अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम् ।
तत्र वैदर्भगौड़ीयौ वर्ण्येते प्रस्फुटान्तरौ ॥ [दण्डी]

प्रस्फुटान्तरौ—स्फुटप्रतीयमानभेदौ । मार्गः,—रीतिः, सा च पदविन्यासप्रणालीरूपा । यथाऽऽह विश्वनाथः,—

"पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।" (१)

मन्त्री, (इति मन्त्री कृतः); त्वं मे मिथः,—रहसि, एकान्ते इत्यर्थः, ("मिथोऽन्योऽन्यं रहस्यपि" इत्यमरः) सखी—विजनसहचारिणी, (इति सखी कृता); तथा त्वं मे ललिते—मनोज्ञे, ("ललितं त्रिषु सुन्दरम्" इति कोषः) कलाविधौ—नृत्यगीताऽऽदिव्यापारे, प्रियशिष्या, (इति साऽपि कृता); अतः सर्वमेव मे कृतमिति भावः । अत्र इन्दुमतीहरणरूपमेकं कार्य्यं प्रकुर्वतः विधेः गृहिण्यादिहरणरूपस्य अपरस्य कार्य्यस्य देशात् करणम्, अतो विशेषो नाम अलङ्कारः । सुन्दरी वृत्तम् ।

(७) एषामिति ।—एषां—माधुर्य्यौजःप्रसादानां, शब्दगुणत्वं गुणवृत्त्या—परम्परया, बुधैः उच्यते—कथ्यते । गुणवृत्तिश्चात्र स्वाऽऽश्रयोपस्थापकत्वरूपेति बोद्धव्यम् ।

इति षष्ठशिखा ।

---

(१) पदेति ।—पदानां—सुप्तिङन्तानां, सङ्घटना—संयोजना, सम्यक् विन्यासः इत्यर्थः, रीतिः,—प्रणाली, [रीयते गुणानां विशेषो ज्ञायते अनयेति रीतिः । "रीङ् गतौ" इत्यनेन साधुः; गत्यर्थानां ज्ञानार्थत्वात् तथा व्युत्पत्तिः] । सा च अङ्गानाम्—अवयवानां, संस्थाविशेषवत्—यथास्थानविन्यासवत्, विलक्षणमुखाद्यवयवसन्निवेशविशेषवदित्यर्थः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

वैदर्भीस्वरूपमाह स एव,—

"माधुर्य्यव्यञ्जकैर्वर्णै रचना ललिताऽऽत्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥" (२)

ललिताऽऽत्मिका—मधुरस्वरूपा । वृत्तिः,—समासः । यथा,—"तदिदं क्रियताम्" (७५ पृष्ठे) इत्यादि पूर्वमुक्तम् ।

गौडीस्वरूपमाह,—

"ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ।
समासबहुला गौड़ी" दर्पणे समुदीरिता ॥ (३)

बन्धः,—रचना । आडम्बरः,—गाढ़ः । यथा,—"वच्चडुज-भ्रमित" (७७ पृष्ठे) इत्यादि पूर्वमुक्तम् ।

इति रीतिविवेचनं नाम सप्तमशिखा ।

अष्टमशिखा ।

अलङ्कारस्वरूपमाह,—

"काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।"
[दण्डी]

अलङ्कारविभागः,—

ते च द्विविधाः,—शब्दगताः अर्थगताश्च ।

---

(२) वैदर्भीमाह, माधुर्य्येति ।—माधुर्य्यव्यञ्जकैः वर्णैः ललिताऽऽत्मिका—मनोहारिणी, अवृत्तिः,—समासरहिता, अल्पवृत्तिः,—अल्पसमासा वा, रचना, विदर्भदेशप्रचलिता इति वैदर्भी, रीतिः इष्यते—कथ्यते ।

(३) गौड़ीमाह, ओज इति ।—ओजःप्रकाशकैः,—चित्तविस्ताररूपदीप्तत्वज्ञापकैः, उज्ज्वलार्थप्रतिपादकैरित्यर्थः, वर्णैः,—"वर्गस्याऽऽद्यतृतीयाभ्याम्" इत्यादिना प्रागुक्तैः, आडम्बरः,—उद्भटः, श्रेष्ठार्थप्रतिपादकतया प्रवर इत्यर्थः, बन्धः,—रचनाविशेषः, गौड़ी, सा च समासबहुला इति ।

इति सप्तमशिखा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ शब्दालङ्काराः,—

शब्दगताः,—अनुप्रासयमकाऽऽदयः।

तत्र अनुप्रासः,—

"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।"

[विश्वनाथः]

स्वरवैसादृश्येऽपि व्यञ्जनमात्रसादृश्यम् अनुप्रासः; स च रसानुगुणो वर्णानां प्रकर्षेण न्यासः। यथा,—

"लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्,
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन्।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि॥" (१)

[विश्वनाथः]

यमकम्,—

"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवाऽऽवृत्तिर्यमकं विनिगद्यते॥" (२)

[विश्वनाथः]

---

(१) लतेति।—वसन्तवायुवर्णनमिदम्। मरुत्—वायुः, गुञ्जन्तः,—रणन्तः, गुनगुनध्वनिं कुर्वन्तः इत्यर्थः, मदवन्तः,—मत्ताः, सोल्लासाः इति यावत्, अलीनां—भ्रमराणां, पुञ्जाः,—समूहाः यस्मिन् तादृशं, लताकुञ्जं—लतावेष्टितविहारस्थानं, चपलयन्—कम्पयन्, अङ्गं—शरीरं, प्राणिनामिति शेषः, समालिङ्गन्—संस्पृशन्, द्रुततरं—सद्यः, अनङ्गं—मदनं, प्रबलयन्—वर्द्धयन्, दलितं—विकसितम्, अरविन्दं—कमलं, मन्दं मन्दं—शनैः शनैः, तरलयन्—चञ्चलीकुर्वन्, रजोवृन्दं—रजसां—परागाणां, वृन्दं—चयं, विन्दन्—लभमानः सन्, दिशि दिशि मकरन्दं—पुष्परसं, किरति—निक्षिपति, वर्षतीति यावत्। अत्र प्रथमे पादे "ञ्ज" इति, द्वितीये पादे "ङ्ग" इति, तृतीये चतुर्थे च पादे "न्द" इति व्यञ्जनसङ्घानां पुनः पुनरावृत्तिः। वृत्तं शिखरिणी नाम।

(२) सतीति।—अर्थे, सति—विद्यमाने, पृथगर्थायाः,—भिन्नार्थायाः, स्वरव्यञ्जनसंहतेः,—स्वरव्यञ्जनसमुदायस्य, तेनैव क्रमेण—पूर्वाऽऽवृत्तिक्रमेणेत्यर्थः, आवृत्तिः,—पुनः पुनरुच्चारणं, यमकं विनिगद्यते—कथ्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र द्वयोरपि वर्णसङ्घातयोः क्वचित् सार्थकत्वं, क्वचि- न्निरर्थकत्वं, क्वचिदेकस्य सार्थकत्वम् अपरस्य निरर्थकत्वम् ; अत उक्तं "सत्यर्थे" इति। तेनैव क्रमेणेति "दमो मोदः" इत्यादे- र्विविक्तविषयत्वम्। (३) एतच्च पदपादाऽऽद्यावृत्तित्वेन प्रभूत- तमभेदम्। (४) दिङ्मात्रम् (५) उदाह्रियते,—

"नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिंसुमनोभरैः॥"(६)

[माघः]

प्रथमे पादे द्वयोरपि, द्वितीये प्रथमस्यैव, तृतीये च द्वितीय- स्यैव सार्थकत्वं, चतुर्थे द्वयोरपि "रभिंसु" इत्येतयोर्निरर्थकत्वम्।

श्लेषः,—

"श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।" (७)

[विश्वनाथः]

---

(३) विविक्तविषयत्वं—विभिन्नविषयत्वम्।

(४) प्रभूततमभेदं—बहुतरप्रकारम्।

(५) दिङ्मात्रं—किञ्चिन्मात्रमित्यर्थः।

(६) नवेति।—राजसूये निमन्त्रितस्य इन्द्रप्रस्थं गच्छतः कृष्णस्य पथि वसन्ताऽऽवि- र्भावदर्शनवर्णनमिदम्। सः,—कृष्णः, पुरः,—अग्रतः, नवानि—नूतनानि, पलाशानि —पत्राणि यत्र तादृशं, पलाशवनं—किंशुककाननं यस्मिन् तथोक्तं, ("पलाशः किंशुके पत्रे पलाशम्" इति विश्वः) स्फुटानि—विकसितानि, परागैः,—रजोभिः, परागतानि —व्याप्तानि, पङ्कजानि—पद्मानि यस्मिन् तथाविधं, मृदुलाः,—कोमलाः, अत एव तान्ताः,—आतपसमये किञ्चित् म्लानाः, लतान्ताः,—पल्लवा यस्मिन् तं, तथा सुमनसां —पुष्पाणां, भरैः,—समूहैः, सुरभिं—सुगन्धिं, सुरभिं—वसन्तम्, अलोकयत्— अपश्यत्। द्रुतविलम्बिताऽऽख्यं वृत्तम्।

(७) श्लिष्टैरिति।—श्लिष्टैः—नानाऽर्थैः, पदैः,—सुबन्ततिङन्तरूपैः, अनेकेषां— बहूनाम्, अर्थानाम्, अभिधाने—अभिधया प्रतिपादने, श्लेष इष्यते ; अभिधया बह्वर्थ- प्रतिपादनमेव श्लेष इति फलितम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स च वर्णप्रत्ययप्रकृतिपदाऽऽदिश्लेषात् बहुविधः ; यथा,—

"प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि॥" (८)

[माघ०]

अत्र "विधौ" इत्यत्र विधु-विधिशब्दयोरुकारेकारयोर्वर्णयो-रौकाररूपत्वात् वर्णश्लेषः। "कर" इत्यत्र प्रकृतिश्लेषोऽपि।

"पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव!।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्॥" (९)

अत्र पदश्लेषः।

---

(८) वर्णश्लेषमुदाहरति, प्रतिकूलतामिति।—सूर्य्यास्तवर्णनमिदम्। विधौ—दैवे, चन्द्रे च, ("विधिर्विधाने दैवे च" इति, "विधुः सुधांशुः शुभ्रांशुः" इति चामरः) प्रतिकूलतां—विरोधिताम्, उदयोन्मुखत्वञ्च, उपगते—प्राप्ते सति, बहुसाधनता—विविधोपायवत्त्वं, विफलत्वं—वैफल्यम्, एति—प्राप्नोति ; महत्यपि साधनसम्पत्तिर्निष्फलैवेत्यर्थः। हि—तथाहि, पतिष्यतः,—पतनोन्मुखस्य, अस्तं गमिष्यत इति यावत्, दिनभर्त्तुः,—सूर्य्यस्य, कराणाम्—अंशूनां, किरणानामित्यर्थः, हस्तानाञ्च, ("बलिहस्तांशवः कराः" इत्यमरः), सहस्रमपि अवलम्बनाय—आश्रयाय, पतनप्रतिबन्धायेति यावत्, न अभूत् ; पतिष्यतो जनस्य करद्वयमपि पतनविघाताय भवति, अस्य तु करसहस्रमपि अवलम्बनाय नाभूत्, अतो दैवमेव प्रबलमिति भावः। अत्र विधाविति पदस्य औकाररूपवर्णस्य इकारोकारजन्यत्वात् अनेकार्थप्रतिपादकत्वं बोध्यम्। प्रमिताक्षरा छन्दः।

(९) पदश्लेषमुदाहरति, पृथ्विति।—राजानं प्रति कस्यचित् भिक्षोरुक्तिः। हे देव! सम्प्रति आवयोः,—तव मम चेत्यर्थः, सदनं—गृहं, पृथुकार्त्तस्वरपात्रं—पृथूनि—बहूनि, कार्त्तस्वरपात्राणि—सौवर्णभाजनानि यस्मिन् तत् ; अन्यत्र,—पृथुकानां—शिशूनां, ("पृथुकः शावकः शिशुः" इत्यमरः) आर्त्तस्वरस्य—आहाराभावेन कातररवस्य, पात्रं—स्थानम् ; भूषितनिःशेषपरिजनं—भूषिताः,—अलङ्कृताः, निःशेषाः,—समस्ताः, परिजनाः,—परिवाराः यस्मिन् तथाविधम् ; अन्यत्र,—भुवि—भूतले, शय्याऽऽद्यभावात् इति भावः, उषिताः,—स्थिताः, निःशेषाः परिजनाः,—पुत्रकलत्राऽऽदयः यस्मिन् तथाविधम् ; तथा विलसत्करेणुगहनं—विलसद्भिः,—शोभमानैः, विलसन्तीभिर्वा, करेणुभिः,—इभैः, हस्तिभिरित्यर्थः, हस्तिनीभिर्वा, ("करेणुरिभ्यां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ अर्थालङ्काराः,—

अर्थालङ्काराः,—स्वभावोक्तिरुपमाऽऽदयश्च। तत्र स्वभावोक्ते-र्वस्तुस्वभाववर्णनस्वरूपत्वात् स्वभाववर्णनञ्च वस्तूनां प्रकृतञ्चेत् तद्वस्तूनि प्रत्यक्षमिव दर्शयित्वा सहृदयमनांसि नितरामाकर्षतीति तस्या अतीव चमत्कारित्वात् तामेव प्रथममाह,—

स्वभावोक्तिः,—

"स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् ।"(१०)

यथा अभिज्ञानशकुन्तले,—

"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्वकायम् ।
शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वात् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥" (११)

स्त्री नेभे" इत्यमरः) गहनं—निविडं,दुष्प्रवेशमिति भावः ; अन्यत्र,—बिलेषु—गर्त्तेषु, सीदन्तीति बिलसदः, ते एव इति बिलसत्काः, [स्वार्थे कन्-प्रत्ययः]—मूषिकाः इत्यर्थः, तेषां रेणुभिः,—रजोभिः, गहनं—पूर्णमित्यर्थः, अत एव समं—तुल्यम् ; त्वत्तो धनलाभे तु मद्गृहमनेवंभावात् समं न स्यास्यतीति भावः। वृत्तमार्य्या।

(१०) स्वभावोक्तिरिति।—चारु—मनोज्ञं, सहृदयहृदयरञ्जनमित्यर्थः, यथा-वत्—यथास्थितं, वस्तुनः,—विषयस्य, यत् वर्णनम्, असौ स्वभावोक्तिः।

(११) ग्रीवेति।—अयं मृग इति पूर्वेणान्वयः। अनुपतति—अनुगच्छति, स्यन्दने—रथे, ("शताङ्गः स्यन्दनो रथः"इत्यमरः) ग्रीवाभङ्गाभिरामं—ग्रीवाया भङ्गेन —परिवर्त्तनेन, अभिरामं—मनोज्ञं यथा तथा, मुहुः,—पुनः पुनः, दत्तदृष्टिः,—निक्षिप्तनयनः, ("दृष्टिः ज्ञानेऽक्ष्णि दर्शने" इत्यमरः) शरस्य पतनभयात् पश्चार्द्धेन—अपरम् अर्द्धं पश्चार्द्धम् ["अपरस्यार्द्धे पश्चभावो वक्तव्यः" इति वार्त्तिकात् अपरशब्दस्य पश्चाऽऽदेशे पश्चार्द्धमिति सिद्धम्] तेन, देहस्य पाश्चात्यभागेन, भूयसा— बाहुल्येन, पूर्व-कायं—कायस्य पूर्वार्द्धं, प्रविष्टः, भयात् लाङ्गूलान्तभागं सम्मुखीनचरणद्वयान्तिक-मानीतवानित्यर्थः ; तथा अर्द्धावलीढैः,—अर्द्धजग्धैः, अत एव श्रमेण—भयात् द्रुत-गतिजनितया क्लान्त्या, विवृतात्—प्रकटितात्, मुखात् भ्रंशन्तीति तथोक्तैः, शष्पैः, —बालतृणैः, कीर्णवर्त्मा—आच्छादितपथः सन्, उदग्रप्लुतत्वात्—अतिप्लुतगतित्वात्,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा वा,—तत्रैव पञ्चमाङ्कादौ कञ्चुकिनो जरावर्णनम्। तत्रैव च सप्तमे नृपशिशोः सिंहशावकाऽऽस्कन्दनविक्रान्तिवर्णनम्।

उपमास्वरूपमुक्तमादर्शे,—

उपमा,—

"प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते।" (१२)

प्रस्फुटमिति रूपकाऽऽदेर्गम्यसाम्याद्भेदाय। सुन्दरं—वैचित्र्य-जनकं, तेन "गौरिव गवयः" इत्यत्र नायमलङ्कारः। साम्यं—सादृश्यम्; साम्यञ्च—क्रियागतं, गुणगतम्, उभयगतञ्चेति त्रिविधम्। क्रमेणोदाहरणानि। तत्र क्रियागतं यथा,—

"क्षणात् प्रबोधमायाति लङ्घ्यते तमसा पुनः।
निर्वास्यतः प्रदीपस्य शिखेव जरतो मतिः॥" (१३)[अभि॰शकु॰]

अत्र "आयाति" "लङ्घ्यते" इति च क्रियाद्वयस्य उपमेये उपमाने च साम्यम्।

गुणगतं यथा,—

"हरस्तु किञ्चित् परिलुप्तधैर्यश्चन्द्रोदयाऽऽरम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥"(१४)
[कुमार६०]

अत्र परिलुप्तधैर्यत्वं गुण उभयत्रापि समानः।

वियति—आकाशे, बहुतरम्—अधिकतरं, तथा उर्व्यां—पृथिव्यां, स्तोकम्—अल्पं, प्रयाति—धावति, पश्य—अवलोकय। स्रग्धराऽऽख्यं वृत्तम्।

(१२) प्रस्फुटमिति।—प्रस्फुटं—सुव्यक्तं, सुन्दरं—चमत्कारकं, साम्यं—सादृश्यं, तच्च द्वयोः प्रसिद्धयोरेवेति, यत्रोपमानोपमेययोः प्रसिद्धयोर्द्वयोरेकरूपत्वेन साधर्म्य-मित्यर्थः, तत्र उपमा इति अभिधीयते।

(१३) क्षणादिति।—जरतः,—जरां गच्छतः, स्थविरस्येत्यर्थः, मतिः,—बुद्धिः, निर्वास्यतः,—निर्वाणं गमिष्यतः, प्रदीपस्य शिखेव क्षणात्—क्षणमात्रेण, प्रबोधं—प्रकृष्टं ज्ञानं, स्मरणमित्यर्थः, विकाशञ्च, आयाति—प्राप्नोति, पुनः,—क्षणात्, तमसा—मोहेन, तिमिरेण च, लङ्घ्यते—आक्रम्यते, आव्रियते इत्यर्थः। पथ्यावक्त्रं वृत्तम्।

(१४) हर इति।—हरस्तु—हरोऽपि, चन्द्रोदयस्य आरम्भे अम्बुराशिः,—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

उभयगतं यथा,—

"स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलबहलमुग्धा दुग्धकुल्येव दृष्टिः॥" (१५) [उत्तरच०]

अत्र "स्नपयति" इति क्रियासाम्यं, "स्नेहनिष्यन्दिनी" "धवलबहलमुग्धा" इति गुणसादृश्यञ्च। *

---

* यथा वा,—

"गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति॥" (क)

[कुवलयानन्दः]

समुद्र इव, किञ्चित्—ईषत्, परिलुप्तं—विनष्टं, धैर्य्यं यस्य तथाभूतः सन्, न तु प्राकृतजनवत् अत्यन्तलुप्तधैर्य्य इति भावः; बिम्बफलाधरोष्ठे—बिम्बफले इव अधरोष्ठौ यत्र तादृशे, उमायाः—पार्वत्याः, मुखे विलोचनानि—नेत्राणि, व्यापारयामास—पातयामास; चुम्बनार्थं त्रिभिरपि लोचनैः साभिलाषमद्राक्षीदिति भावः। एतेन भगवतो रतिभावोदय उक्तः। अत्र पूर्वार्द्धे एवोपमानिदर्शनं विवक्षितमिति बोध्यम्। वृत्तमुपजातिः।

(१५) स्नपयतीति।—ते—तव, धवला—अतिनिर्मलत्वात् शुभ्रा, [एतेन नेत्रयोः सुकृष्णतारत्व ध्वन्यते] अत एव बहलमुग्धा—अतिमनोहारिणी, स्नेहनिष्यन्दिनी—स्नेहमुद्गिरन्ती, प्रणयातिशयप्रकाशिनीत्यर्थः, दृष्टिः दुग्धकुल्येव—क्षीरपूर्णक्षुद्रकृत्रिमसरिदिव, ("कुल्याऽल्पा कृत्रिमा सरित्" इत्यमरः), हृदयेशं—जीवितेश्वरं, स्नपयति—आर्द्रयतीत्यर्थः। अत्र साम्यवाचकस्य इवेत्यस्य दुग्धकुल्येत्यत्रोपमाने दृष्टिरित्यत्रोपमेये च स्नपयतीत्यर्थस्य साधारणेनानुगमकतयोपमाऽलङ्कार इति बोध्यम्; वस्तुतस्तु अत्र उत्प्रेक्षैव; तथा हि,—अत्रोपमानभूतायाः दुग्धकुल्याया अप्रसिद्धत्वात् दृष्टेस्तथात्वेन सम्भावनमेव सम्भवति; यत्र तु उपमानस्य प्रसिद्धत्वे सादृश्यस्याङ्गीकारः, तत्रोपमाऽलङ्कार एव इति दिक्। मालिनी वृत्तम्।

(क) उदाहृते पद्ये उत्प्रेक्षासम्भवे इदमुदाहरणं शिष्याणां ज्ञानवर्द्धकं भविष्यतीत्याशयेनाऽऽह, यथा वेति।—ईश्वरः,—शङ्करः, इन्दुक्ष्वेडौ—चन्द्र विषञ्च इत्यर्थः, ("क्ष्वेडस्तु गरलं विषम्" इत्यमरः), इव बुधः,—पण्डितः, गुणदोषौ,परस्य इति शेषः, गृह्णन्—जानन्, अन्यत्र,—स्वीकुर्वन् इत्यर्थः, पूर्वं—पूर्वनिर्दिष्टं गुणम्, अन्यत्र,—

का—८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मालोपमा,—

"मालोपमा यदेकस्योपमानं बहु दृश्यते।" [विश्वनाथः]

यथा,—

"प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः।
संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च॥"(१६)
[कुमारस०]

रूपकम्,—

"तद्रूपकमभेदो यः उपमानोपमेययोः।" [मम्मटः]

उपमानं चन्द्रादि, उपमेयं मुखादि। प्रकाशितविभिन्नस्वरूपयोरपि उपमानोपमेययोरतिसाम्यप्रदर्शनाय काल्पनिकोऽभेदाऽऽरोपो रूपकमित्यर्थः। यथा,—

(१६) प्रभेति।—सः,—हिमवान्, प्रभामहत्या—प्रभोज्ज्वलया, शिखया—ज्वालया, दीप इव, [शिखादीपयोः अवयवावयविभावाद्भेदेन व्यपदेशः] त्रिमार्गया—त्रयो मार्गाः,—पन्थानः यस्याः तया, त्रिपथगया मन्दाकिन्या इति यावत्, तृतीया द्यौः,—लोक इति त्रिदिवः,—स्वर्गः. [वृत्तिविषये त्रिशब्दस्य त्रिभागवत् पूरणार्थत्वम्; पृषोदरादित्वात् दिव्शब्दादकाराऽऽगमः, पुंस्त्वं लोकात्। दीव्यतेर्घञर्थे क-विधानं, दीव्यन्त्यत्र जना इति दिव इति क्षीरस्वामी] तस्य मार्ग इव, तथा संस्कारः,—व्याकरणजन्या शुद्धिः, तद्वत्या—विशुद्धया इत्यर्थः, गिरा—वाचा, "भद्रैषां लक्ष्मीर्निहिताधिवाचि" इति श्रुतेः इति भावः; [मनसः ईषा मनीषा, शकन्ध्वादित्वात् (६।१।९४ पा० वा०) साधुः; सा अस्यास्तीति] मनीषी—विद्वान् इव, तया—पार्वत्या, पूतश्च—पवित्रीकृतश्च, विभूषितश्च—अलङ्कृतश्च। अत्र शिखागिरोः अविशिष्टयोः उपमानानर्हत्वात् न विशेषणाऽऽधिक्यदोषः। वृत्तमुपजातिः।

इन्दुमित्यर्थः, शिरसा—तदान्दोलनेन, अन्यत्र,—तत्र निवेशनेन, श्लाघते—अभिनन्दयति, अन्यत्र,—तदुत्तमत्वं द्योतयति, परं—परतो निर्दिष्टं दोषम्, अन्यत्र,—क्ष्वेडं, कण्ठे नियच्छति—निरुणद्धि, वाचा: कण्ठात् बहिः न प्रकाशयतीत्यर्थः, अन्यत्र,—स्वगलदेश एव स्थापयति, जरयतीति यावत्। अत्र ईश्वर उपमानं, बुध उपमेयम्, इन्दुः उपमानं, गुण उपमेयं, क्ष्वेड उपमानं, दोष उपमेयश्च। इवेति सादृश्यार्थकं शब्दं इत्यादिपदप्रतिपाद्यो धर्मः उभयगतश्चेति पूर्णेयमुपमा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"पर्य्याप्तपुष्पस्तवकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः ।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥" (१७)

[कुमारस०]

अत्र लतासु वधूनां, पुष्पस्तवकाऽऽदिषु च स्तनाऽऽदीनामभेदारोपः ।

उत्प्रेक्षा,—

"सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।" [दण्डी]

प्रकृतस्य—उपमेयस्य, समेन—उपमानेन, सम्भावनञ्च—उत्कटकोटिकः संशयः; अप्रस्तुतकोटेरुत्कटत्वञ्च प्रस्तुतकोटेर्निगरणेन जायते, निगरणञ्च प्रस्तुतस्य क्वचिदनुपादानेन क्वचिदुपात्तस्याप्यधःकरणेन भवति । यदुक्तम्,—

निगीर्णलक्षणम्,—

"विषयस्यानुपादानेऽप्युपादाने च सूरयः ।
अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते ॥" (१८)

[दण्डी]

विषयः,—प्रस्तुतम् । क्रमेणोदाहरणम्,—

---

(१७) पर्य्याप्तेति ।—वसन्तवर्णनमिदम् । तरवोऽपि—वृक्षा अपि, स्थावरा अपीति भावः, किमु वक्तव्यं जङ्गमा इत्यपिशब्दार्थः, [लिङ्गादेव पुंस्त्वं गम्यते] पर्य्याप्ताः,—प्रभूताः, पुष्पाणां स्तवकाः,—गुच्छा एव, स्तनाः यासां ताभ्यः, ["स्वाङ्गाच्चोपसर्जनात् असंयोगोपधात्" (४।१।५४ पा०) इति विकल्पात् न ङीप्] स्फुरद्भिः,—विकसद्भिः, प्रवालैः,—नवपल्लवैरेव, ओष्ठैः मनोहराभ्यः, लता एव वध्वः ताभ्यः सकाशात्, विनम्राः शाखा एव भुजाः तैः, बन्धनानि—वेष्टनानि, आलिङ्गनानीत्यर्थः, अवापुः,—प्रापुः; स्थावराणामपि मदनविकारोऽभूत्, किमुतान्येषामिति भावः; एतच्च तरुलतानामपि चेतनत्वादुक्तम्; यथाऽऽह मनुः,—"अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः" इति (१ अ० ४९ श्लो०) । वृत्तमुपजातिः ।

(१८) विषयस्येति ।—सूरयः,—विद्वांसः, विषयस्य—प्रस्तुतस्य, अनुपादाने—अग्रहणे, उपादाने—ग्रहणेऽपि, अधःकरणमात्रेण—तिरस्करणमात्रेण, अनादरपूर्वकवर्णनमात्रेणेत्यर्थः, निगीर्णत्वं—निगरणं, प्रचक्षते—कथयन्ति । अधःकरणमेव निगरणमिति फलितम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥" (१९) [मृच्छ०]

अत्र तमसः प्रसरसम्पाताऽऽदिरूपो विषयो नोपात्तः।

"समयः स वर्त्तत इवैष यत्र मां
समनन्दयत् सुमुखि! गौतमार्पितः।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्त्तिमानिव महोत्सवः करः॥" (२०) [उत्तरच०]

अत्र विषयः कर उपात्तोऽपि मूर्त्तिमन्महोत्सवरूपेणाधःकृतः।

उत्प्रेक्षाबोधकशब्दाः,—

"मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः॥"(२१)

[दण्डी]

अतिशयोक्तिः,—

"सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।" [विश्वनाथः]

प्रकृतस्य निगरणेनाभेदज्ञानमप्रकृतस्य अध्यवसायः, तस्य

---

(१९) लिम्पतीति।—गाढान्धकारवर्णनमिदम्। तमः,—अन्धकारम्, अङ्गानि—अवयवान्, लिम्पतीव—लिप्तानि करोतीव, नभः,—अन्तरीक्षम्, अञ्जनं—कज्जलं, वर्षतीव, दृष्टिः,—चक्षुः, असत्पुरुषसेवेव—असतां पुरुषाणां सेवेव, नीचपरिचर्य्या इव, विफलतां—निष्फलतां, गता—प्राप्ता, दर्शनव्यापाररहित्यादिति भावः। अत्र तमः-प्रसरसम्पातरूपौ विषयौ लेपनवर्षणाभ्याम् अधःकृताविति बोध्यम्। पथ्यावक्त्रं छन्दः।

(२०) समय इति।—हे सुमुखि! एष स समयः वर्त्तत इव—अतीतोऽपि सुनिपुणाङ्कितचित्रदर्शनाद्वर्त्तमान इव अनुभूयत इत्यर्थः, यत्र—यस्मिन् सम्प्रदान-समये इत्यर्थः, गौतमेन—गौतमनन्दनेन शतानन्देन, अर्पितः,—समन्तं प्रदत्तः, आगृहीतं—धृतं, कमनीयं—मनोज्ञं, कङ्कणं—हस्ताऽऽभरणविशेषः, हस्तसूत्रं वा येन तादृशः, तव अयं करः,—पाणिः, मूर्त्तिमान्—देहवद्धः, महोत्सव इव मां समनन्दयत्—सन्तोषितवान्। मञ्जुभाषिणी नाम छन्दः।

(२१) मन्ये इति।—इवशब्दोऽपि तादृशः,—उत्प्रेक्षाव्यञ्जक इत्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च उत्प्रेक्षायामप्रस्तुतस्यानिश्चितत्वेन निर्देशात् साध्यत्वम्; इह तु निश्चितत्वेनैव प्रतीतिरिति सिद्धत्वमित्यनयोर्भेदः। निगरणञ्च उभयत्रापि समानमेव; यथा,—

"अकालजलदाऽऽवली किरतु नाम मुक्ताऽऽवली-
रपर्वणि विधुन्तुदस्तुदतु हन्त! शीतद्युतिम्।
इदन्तु महदद्भुतं यदनपायिविद्युल्लता-
ऽवलम्बि कनकाचलद्वयमधोमुखं नृत्यति॥" (२२)

अत्र केशादेर्जलदाऽऽवल्यादिरूपेणाध्यवसानम्।

यथा वा,—"दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम्।
कौमारकेऽपि गिरिवद्गुरुतां दधानः
वीरो रसः किमयमित्युत दर्प एव?॥" (२३) [उत्तरच०]

---

(२२) अकालेति।—स्नातोत्थितायाः कस्याश्चिन्नायिकायाः सज्जीभूतायाः केशकलापात् सम्मुखस्थितात् जलनिःसारणव्यापारवर्णनमिदम्। अकाले—असमये, जलदानां—मेघानाम्, आवली—राजिः, मुक्ताऽऽवलीः,—मुक्ताप्रकरान्, किरतु—वर्षतु, नाम—सम्भावनायाम्; अकालमेघराजिभ्यो मुक्तावर्षणं सम्भाव्यते इत्यर्थः; विधुन्तुदः,—राहुः, अपर्वणि—पौर्णमासीव्यतिरिक्ते काले, शीतद्युतिं—चन्द्रं, तुदतु—ग्रसतु, हन्तेत्यपि सम्भावनायां, तदपि सम्भाव्यते इति भावः; तु—किन्तु, अनपायिनी—स्थायिनीत्यर्थः, या विद्युल्लता—सौदामनीवल्ली, तस्याम् अवलम्बते इति तथोक्तं, कनकाचलद्वयं—सौवर्णगिरियुगलम्, अधोमुखं सत् नृत्यति इति यत्, इदं महत् अद्भुतम्—अतीव विस्मयकरम्। अत्र केशाऽऽदिरूपो विषयो नोपात्तः, जलदाऽऽवल्यादिरूपेण निश्चिततयाऽधःकृतः प्रतीयते। छन्दस्तु पृथ्वी।

(२३) दृष्टिरिति।—दृष्टिः,—अस्य बालकस्य दृष्टिपातः, तृणीकृतः,—तृणवदवगणित इत्यर्थः, जगत्त्रयस्य—त्रिजगतामित्यर्थः, सत्त्वसारः,—प्रभावोत्कर्षः; यद्वा,—सत्त्वानां—प्राणिनां, सारः,—बलं यया तादृशी, तथा, धीरा—गाम्भीर्यसूचिका, अव्याकुलेति यावत्, उद्धता—सदर्पा च, गतिः,—पादविक्षेपः, धरित्रीं—पृथिवीं, नमयतीव—नतां करोतीव, सर्वंसहाऽपि सती तथाविधां गतिं सोढुं न शक्नोतीति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र कुमारस्य वीररसरूपेण दर्पंरूपेण चाध्यवसानम्। प्रथमे विषयः केशाऽऽदिर्नोपात्तः, द्वितीये "अयम्" इत्यनेनोपात्तोऽप्यधःकृतः।

अन्यरूपा अतिशयोक्तिः,—

"प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्।
कार्य्यकारणयोर्यश्च पौर्वापर्य्यविपर्य्ययः।
विज्ञेयाऽतिशयोक्तिः सा" ऽप्यन्यैव प्रथमोक्ततः॥(२४)

[मम्मटः]

क्रमेणोदाहरणम्,—

"अन्यदेवाङ्गलावण्यमन्याः सौरभसम्पदः।
तस्याः पद्मपलाशाक्ष्याः सरसत्वमलौकिकम्॥" (२५)

त्यर्थः; कौमारकेऽपि—शैशवेऽपि वयसि, गिरिवत—पर्वत इव, गुरुतां—गौरवं, भारवत्त्वमित्यर्थः, दधानः,—धारयन्, [शैला हि उत्पत्तिमारभ्य एव गुरुत्ववन्तो भवन्ति, न तु वृक्षाऽऽदयः, इति गिरिसाम्यसार्थक्यम्] अयं—बालकः, वीरो रसः किम्?—शरीरधारी वीररसस्य स्थायी भाव उत्साहः किम्? इत्यर्थः, उत—अथवा, दर्पः एव—अन्तःसारनाती मूर्त्तिमान् गर्व एव, एति?—आगच्छति? यन्मता यदतिशयोक्त्यलङ्कार इत्युक्तं तद्धेयम्; अत्र किमुतशब्दाभ्यां संशयद्योतकाभ्याम् अध्यवसायस्य अनिश्चिततया प्रतीतेः, निश्चिततया प्रतीतेरेव अतिशयोक्तेर्विषयत्वात्। अस्मन्मते तु अत्र पूर्वार्द्धे उत्प्रेक्षा, द्वितीयार्द्धे प्रकृते अन्यवस्तुनः संशयात् सन्देहालङ्कार एवेति बोध्यम्। वसन्ततिलकाऽऽख्यं वृत्तम्।

(२४) प्रस्तुतस्येति।—प्रस्तुतस्य—विषयस्य, यत् अन्यत्वं—पृथक्त्वं, पृथक्तयाऽध्यवसानमित्यर्थः, यद्यर्थोक्तौ च कल्पनं—यदिशब्दार्थबलात् कल्पितेन अप्रस्तुतेन प्रस्तुतस्य अध्यवसानमित्यर्थः, यश्च कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययः,—कारणात् पूर्वं कार्य्यस्य भावितारूपेण, समकालत्वेन वा अध्यवसानं, साऽपि प्रथमोक्ततः,—प्रथमोक्तातिशयोक्त्यलङ्कारतः, अन्या एव—द्वितीया, अतिशयोक्तिः विज्ञेया, सर्वत्रैवाध्यवसानमस्तीति सुधीभिर्विभाव्यम्।

(२५) अन्यदिति।—तस्याः पद्मपलाशाक्ष्याः,—कमलदललोचनायाः, कान्ताया इति शेषः, अङ्गानां लावण्यं—"मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥" इत्युक्तलक्षणकः कान्तिविशेषः, अन्यदेव—पृथगेव,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदिशब्देन, तत्पर्य्यायान्तरेण वा यद्यर्थस्य कथनेऽसम्भविनोऽर्थस्य कल्पनमित्यर्थः। यथा,—

"पुष्पं प्रवालोपहितं यदि स्यात्
मुक्ताफलं वा स्फुटविद्रुमस्थम्।
ततोऽनुकुर्य्याद्विशदस्य तस्या-
स्ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य॥" (२६) [कुमारस०]

कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययश्च द्विधा भवति, कारणात् पूर्वं कार्य्यस्य भावे, द्वयोः समकालत्वे च। क्रमेण यथा,—

"उदेति पूर्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं क्रम-
स्तव प्रसादस्य पुरस्तु सम्पदः॥" (२७) [अभि० शकु०]

सौरभसम्पदः,—गुणश्रियः, अन्याः,—अपराः, एवेति पूर्वतोऽन्वेति; तथा सरसत्वं—रसिकत्वम्, अलौकिकं—लोकविलक्षणम्। अत्र प्रस्तुतस्य लावण्यस्य अन्यत्वेनाध्यवसानम्। पथ्यावक्त्रं छन्दः।

(२६) पुष्पमिति।—पार्वत्याः स्मितवर्णनमिदम्। यदि पुष्पं—पुण्डरीकाऽऽदिकं, प्रवाले—नवपल्लवे, उपहितम्—अर्पितं, वा मुक्ताफलं—मौक्तिकं, स्फुटे—समुज्ज्वले, विद्रुमे—प्रवाले, तिष्ठतीति तथोक्तं स्यात्, ततः,—तदा, तस्याः,—पार्वत्याः, विशदस्य—स्वच्छस्य, ताम्रौष्ठपर्य्यस्तरुचः,—ताम्रे—ताम्रवत् रक्तवर्णे, ओष्ठे पर्य्यस्ता—पतिता, प्रतिफलिता इत्यर्थः, रुक्—प्रभा यस्य तथाभूतस्य, रक्ताधरपतितप्रभस्य, स्मितस्य—मृदुहासस्य, अनुकुर्य्यात्, स्मितमनुकुर्य्यादित्यर्थः, ["माषाणामश्नीयात्" इतिवत् सम्बन्धमात्रविवक्षया षष्ठी]। अत्र यदिशब्दार्थबलात् प्रवालोपहितपुष्पाऽऽदिना स्मितमध्यवसीयते। वृत्तमुपजातिः।

(२७) उदेतीति।—पूर्वं—प्रथमं, फलोदयात् प्रागित्यर्थः, कुसुमं—पुष्पम्, उदेति—विकसति, ततः,—कुसुमोदयादनन्तरं, फलं, जायते इति शेषः; प्राक्—प्रथमं, घनानां—मेघानाम्, उदयः,—उद्गमः, भवतीति शेषः, तदनन्तरं—घनोदयानन्तरं, पयः,—जलं, पततीति शेषः; निमित्तनैमित्तिकयोः,—कारणकार्य्ययोः, अयं क्रमः,—पौर्वापर्य्यनियमः, लोके दृश्यते इति शेषः; तव प्रसादस्य—अनुग्रहस्य,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"सममेव समाक्रान्तं द्वयं द्विरदगामिना।
तेन सिंहाऽऽसनं पित्र्यमखिलञ्चारिमण्डलम्॥" (२८) [रघु०]

व्यतिरेकः,—

"उपमानात् यदन्यस्य व्यतिरेकः स एव सः।" (२९)
[मम्मटः]

अन्यस्य—उपमेयस्य, व्यतिरेकः,—आधिक्यं, स एव व्यतिरेकालङ्कारः। यथा,—

"चन्द्रं गता पद्मगुणान् न भुङ्क्ते
पद्माऽऽश्रिता चान्द्रमसीमभिख्याम्।
उमामुखन्तु प्रतिपद्य लोला
द्विसंश्रयां प्रीतिमवाप लक्ष्मीः॥" (३०) [कुमारस०]

अत्र उपमानभूतचन्द्रपद्मापेक्षया उपमेयस्य उमामुखस्य अधिकगुणवत्त्वकथनम्। यथा वा,—

"दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे॥" (३१) [रघु०]

तु पुरः,—अग्रतः एव, सम्पदः,—श्रियः, मनोरथसिद्धयः इत्यर्थः, भवन्तीति शेषः। आशिषोऽनन्तरं सम्पदो लाभस्येव नियमः, भवतस्तु आशिषि एतद्वैलक्षण्यं यत्, प्राक् शकुन्तलारूपसम्पत् लब्धा, परतः आशीःप्रकाश इति भावः। अत्र प्रसादस्य सम्पदां पश्चाद्भावितया अध्यवसानम्। वंशस्थविलं वृत्तम्।

(२८) सममेवेति।—द्विरदगामिना—गजगतिना, तेन—रघुणा, पित्र्यं—पितृक्रमाऽऽगतं, पैतृकमिति यावत्, सिंहाऽऽसनम्, अखिलम् अरिमण्डलं—शत्रुमण्डलञ्च, द्वयं सममेव—युगपदेव, समाक्रान्तम्—अधिकृतम्, अभिभूतञ्चेत्यर्थः। अत्र सिंहाऽऽसनाऽऽक्रमणात् परभावि शत्रुमण्डलाऽऽक्रमणम्, उभयोः समकालभावितया अध्यवसानम्। पथ्यावक्त्रं छन्दः।

(२९) उपमानादिति।—उपमानात्—उपमानापेक्षया, अन्यस्य—उपमेयस्य, यत्—यः, व्यतिरेकः,—आधिक्यं, सः,—व्यतिरेकः, स एव—व्यतिरेकालङ्कार एव।

(३०) चन्द्रं गतेति।—(६८ पृष्ठे) पूर्वं व्याख्यातम्।

(३१) दिशीति।—रघुदिग्विजयवर्णनमिदम्। दक्षिणस्यां दिशि रवेः,—सूर्य्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र उपमानभूतात् सूर्य्यादपि रघोः प्रतापातिशय-वर्णनम्। (३२)

प्रतिवस्तूपमा,—

"प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः।
एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक्॥"(३३)

[विश्वनाथः]

प्रतीयमानसादृश्ययोर्वाक्ययोरेकस्यापि धर्मस्य पौनरुक्त्य-भिया शब्दान्तरेण निर्देशः प्रतिवस्तूपमा। यथा,—

स्यापि, तेजः मन्दायते—अल्पायते; दक्षिणायने सूर्य्यतेजसो मन्दीभावः प्रसिद्धः, तस्यामेव—दक्षिणस्यां दिशि इत्यर्थः, पाण्ड्याः,—तदाख्यक्षत्रियाः, रघोः प्रतापं—कोषदण्डजं तेजः, ("स प्रभावः प्रतापश्च यत् तेजः कोषदण्डजम्" इत्यमरः), न विषेहिरे—न सोढुं शेकुरित्यर्थः।

(३२) अत्रेति।—रघोः,—उपमेयभूतस्य रघुनृपतेरित्यर्थः। स्पष्टमन्यत्। इदञ्च उपमेयाऽऽधिक्ये व्यतिरेकोदाहरणम्। अन्ये तु,—उपमेयापेक्षयोपमानाऽऽधिक्येऽपि व्यतिरेकमाहुः; तथा हि साहित्यदर्पणकारः,—"आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा" इति। रसगङ्गाधरकारोऽपि,—"द्वयोरेकस्य न्यूनत्वमाधिक्यं वा भवेत् यदि। व्यतिरेक इति प्रोक्तः" इति। एषां मते,—"हनूमदाद्यैर्यशसा मया पुनः द्विषां हसैर्दूतपथः सितीकृतः" इत्युदाहरणं बोध्यम्। अस्यार्थः,—दमयन्तीं प्रति दूतत्वेनेन्द्रादिभिः प्रेषितस्य नलस्य तत्प्रयोजनासिद्धौ विषादोक्तिरियम्। हनूमदाद्यैः,—हनूमत्प्रमुखैः, दूतपथः यशसा सितीकृतः,—उज्ज्वलीकृतः, मया पुनः द्विषां—शत्रूणां, हसैः,—हास्यैः, दूतपथः सितीकृतः; मां दौत्ये अकृतकार्य्यं दृष्ट्वा शत्रवो नूनं हसिष्यन्ति, तेषां हास्यसितिम्ना च स एव दूतमार्गो धवलो भविष्यतीति भावः;. यशसो हासस्य च धावल्यं कविसमय-प्रसिद्धमेव "यशसि धवलता वर्ण्यते हासकीर्त्योः" इत्युक्तेः। एतेन प्रभुप्रयोजननिष्पादकत्वेन हनूमदादेरुपमानस्योत्कृष्टत्वं, तद्व्यतिरेकेणोपमेयस्य नलस्यापकृष्टत्वञ्च प्रतीयते। इह दूतयोरुपमानोपमेयभावविवक्षणेऽपि उपमानस्यैवाऽऽधिक्यं, न तु उपमेयस्य इति।

(३३) प्रतिवस्तूपमेति।—यत्र गम्यसाम्ययोः,—प्रतीयमान-सादृश्ययोः, वाक्ययोः,—वाक्यार्थयोः, एकोऽपि—अभिन्नोऽपि, सामान्यः,—साधारणः, धर्मः,—गुणक्रिया-रूपः, पृथक्—पौनरुक्त्यभिया पर्य्यायान्तरेण, निर्दिश्यते, सा प्रतिवस्तूपमा—वस्तुनि वस्तुनि प्रतिवस्तु, तस्य उपमेति व्युत्पत्तिरत्र बोध्येति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"मधुश्च ते मन्मथ! साहचर्य्यादसावनुक्तोऽपि सहाय एव।
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य?॥"(३४)
[कुमारस०]

अत्र अनुक्तस्यापि सहजसहायस्य स्वत एव साहाय्य-सम्पादने प्रवृत्तिरित्येक एवार्थः शब्दान्तरेण निर्दिष्टः।

यथा वा,—

"धन्याऽसि वैदर्भि! गुणैरुदारै-
र्यया समाकृष्यत नैषधोऽपि।
इतः स्तुतिः का खलु चन्द्रिकाया:
यदब्धिमप्युत्तरलीकरोति?॥" (३५) [नैषधच०]

अत्र समाकर्षणरूप एक एव धर्मः भङ्ग्यन्तरेण पृथङ् निर्दिष्टः।

निदर्शना,—

"अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः।"
निदर्शना भवेत् सेयं मम्मटेन यथोदिता। (३६)

उपमापरिकल्पकः,—पर्य्यवसाने साम्यबोधकः। यथा,—

(३४) मधुरिति।—हरसमाधिभङ्गोद्यतं कामं प्रति इन्द्रस्योक्तिरियम्। हे मन्मथ!—काम! असौ—पुरोवर्त्तीत्यर्थः, मधुः,—वसन्तः, च—अपि, अनुक्तोऽपि—अकथितोऽपि, साहचर्य्यात्—सहचरत्वात्, ते—तव, सहाय एव—सहकार्य्येव, भविष्यतीति शेषः। (त्वं) हुताशनस्य—अग्नेः, नोदयिता—प्रेरकः, सहायः इत्यर्थः, भव इति समीरणः,—वायुः, केन व्यादिश्यते—नियुज्यते? न केनापीत्यर्थः। इन्द्रवज्रोपजातिः।

(३५) धन्याऽसीति।—दमयन्तीं प्रति हंसस्योक्तिरियम्। हे वैदर्भि!—दमयन्ति! धन्या—भाग्यवती, असि, त्वमिति शेषः, यया, त्वयेति शेषः, उदारैः,—महद्भिः, गुणैः,—सौन्दर्य्याऽऽदिभिः, नैषधोऽपि—निषधराजः नलोऽपि, समाकृष्यत—समाकृष्टः; चन्द्रिकायाः,—कौमुद्याः, ("चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः), इतः,—अस्मादधिका, स्तुतिः,—प्रशंसा, का खलु? यत् अब्धिमपि—समुद्रमपि, उत्तरलीकरोति—चपलयति। इन्द्रवज्रोपजातिः।

(३६) अभवन्निति।—वस्तुनः,—विषयस्य, सम्बन्धः,—अन्वयः, अभवन्—असम्भवन्, अघटमानः सन् इत्यर्थः, उपमायाः,—सादृश्यस्य, उपमाऽलङ्कारचमत्कारस्येति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

"क्व सूर्य्यप्रभवो वंशः ? क्व चाल्पविषया मतिः ? ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥" (३७) [रघु०]

अत्र मन्मत्या सूर्य्यवंशवर्णनमुडुपेन सागरतरणमिव इत्युपमायां पर्य्यवस्यति। यथा वा,—

"अभ्युन्नताङ्गुष्ठनखप्रभाभिर्निक्षेपणात् रागमिवोद्गिरन्तौ।
आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम् ॥"(३८)
[कुमारस०]

अत्र उपमाधर्मस्य अरविन्दश्रियश्चरणयोरुपमेयभूतयोः असम्भवादरविन्दश्रियमिव श्रियमित्युपमायां पर्य्यवसानम्।

दृष्टान्तः,—

"दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिविम्बनम्।"[१] (३९)
[विश्व०]

सधर्मस्य—समानधर्मस्य, वस्तुनः,—विषयस्य, प्रतिविम्बनं

स्यात्, परिकल्पकः,—प्रत्यायकः, भवेत्, सा इयं निदर्शना, मम्मटेन यथोदिता—यथा कथिता, तथा ज्ञेयेति शेषः।

(३७) क्वेति।—सूर्य्यः, प्रभवति अस्मादिति प्रभवः,—कारणं यस्य सः, वंशः क्व ? अल्पो विषयो यस्याः तथाभूता (मे) मतिश्च क्व ? नानयोः सङ्गतिः कदाचिदपि भवितुमर्हतीति कृदयस्यार्थः। (अहं) मोहात्—अज्ञानात्, उडुपेन—"भेला" इति ख्यातेन प्लवेन, ("उडुपन्तु प्लवः कोलः" इत्यमरः), दुस्तरं—तरितुमशक्यं, सागरं तितीर्षुः,—तरीतुमिच्छुः, अस्मि—भवामि। अत्र मन्मत्या सूर्य्यवंशवर्णनरूपं वस्तु असम्भवत् उपमायां परिकल्प्यते इति बोध्यम्। वृत्तमुपजातिः।

(३८) अभ्युन्नतेति।—तच्चरणौ—तस्याः,—पार्वत्याः, चरणौ अभ्युन्नतयोः,—अभि—सर्वतोभावेन, उन्नतयोः, अङ्गुष्ठनखयोः प्रभाभिः, निक्षेपणात्—निर्भरविन्यासा-द्धेतोः, रागं—रक्तिम, उद्गिरन्ताविव—वमन्तौ इव, पृथिव्याम् अव्यवस्थां—चञ्चलां, स्थलारविन्दश्रियम् आजह्रतुः,—आहृतवन्तौ, प्रापतुरित्यर्थः। वृत्तमुपजातिर्नाम।

(३९) दृष्टान्तस्त्विति।—सधर्मस्य—सधर्मणः, [अत्र "धर्मादनिच् केवलात्" (५।४।१२४ पा०) इत्यनिचः प्राप्तावपि तदकरणं "समासविधेः अनित्यत्वात्" इति, "निरङ्कुशा हि कवयः" इति वा द्योतयति]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

—प्रणिधानेन गम्यसाम्यत्वम्। प्रतिवस्तूपमायामेकस्यैव धर्मस्य भङ्ग्यन्तरेण निर्देशः, इत्यस्माद्भेदः। यथा,—

"नैतल्लघ्वपि भूयस्या वचो वाचाऽतिशय्यते।
इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम्॥" (४०) [माघः]

अर्थान्तरन्यासः,—

"सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा॥" (४१)

[मम्मटः]

---

(४०) नैतदिति।—एतद्वचः,—वासुदेववाक्यं, लघु—अल्पमपि, भूयस्या—बहुतरया, विस्तृततयाऽपीत्यर्थः, ["द्विवचनविभज्यो—"(५।३।५७ पा०) इत्यादिना ईयसुनि "बहोर्लोपो भू च बहोः" (६।४।१५८ पा०) इतीकारलोपो बहोश्च भूरादेशः] वाचा न अतिशय्यते—नातिक्रम्यते, गुर्वर्थत्वादिति भावः, [शीङः कर्मणि लटि यक् "अयङ् यि क्ङिति"(७।४।२२ पा०) इति अयङादेशः] तथा हि,—इन्धनौघान् दहतीति इन्धनौघधक्—काष्ठराशिदाहकः, भूयानपि इत्यर्थः, [क्विपि घत्वधत्वभष्भावाः] अग्निः,—वह्निः, त्विषा—तेजसा, पूषणं—सूर्य्यम,अल्पीयांसमपीति भावः, न अत्येति—नातिक्रामति; तेजसः प्रभावत्त्वमिव वचसोऽर्थवत्त्वमलङ्घ्यत्वहेतुरित्यर्थः। पूर्वोक्तं वृत्तम्। अत्र "समानधर्मविम्बितया दृष्टान्तालङ्कारः" इति मल्लिनाथमतमनुसृत्य ग्रन्थकृता दृष्टान्तालङ्कारः स्वीकृतः; अस्मन्मते तु,—एकस्यैव धर्मस्य अतिक्रमरूपस्य गम्यसाम्ययोः वाक्ययोः पर्य्यायान्तरेण पृथक्तया निर्देशात् प्रतिवस्तूपमैवेति बोध्यम्। दृष्टान्तोदाहरणन्तु,—

"अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला॥" इति।

अस्यार्थः,—सतां कवीनां भणितिः,—वाणी, अविदितगुणा अपि—अर्थबोधविरहादिति भावः, कर्णेषु मधुधारां वमति—उद्गिरति, माधुर्य्याऽऽदिगुणसम्पत्तेरिति तात्पर्य्यम्; मालतीमाला अनधिगतः,—अप्राप्तः, परिमलो यस्याः तादृशी अपि, दृशं—नेत्रं, हरति—आकर्षति; सौन्दर्य्यातिशयादिति भावः। अत्र मधुधारावमनस्य नेत्रहरणस्य च नैकरूपत्वं, परं प्रणिधानेन गम्यसाम्यत्वमस्तीति द्रष्टव्यम्। वासवदत्तायाः पद्यमिदम्। वृत्तमार्य्या।

(४१) सामान्यमिति।—यत्र साधर्म्येण, इतरेण—वैधर्म्येण वा, सामान्यं वा, विशेषो वा, तदन्येन—सामान्यप्रतियोगिना विशेषेण, विशेषप्रतियोगिना सामान्येन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण, विशेषो वा सामान्येन यत् समर्थ्यते—सोपपत्तिकतया दृढ़ः क्रियते, सोऽर्थान्तरन्यासः। समर्थ्यसमर्थकवाक्ययोः सामान्यविशेषभावे अर्थान्तरन्यासः, दृष्टान्तस्तु न तथा, इत्यनयोर्भेदः। (४२)

सामान्यं विशेषेण यथा,—

"बृहत्सहायः कार्य्यान्तं क्षोदीयानपि गच्छति।
सम्भूयाम्भोधिमभ्येति महानद्या नगाऽऽपगा॥" (४३) [माघः]

अत्र द्वितीयार्द्धगतेन विशेषेणार्थेन पूर्वार्द्धगतः सामान्योऽर्थः समर्थ्यते।

विशेषः सामान्येन यथा,—

"यावदर्थपदां वाचमेवमादाय माधवः।
विरराम महीयांसः प्रकृत्या मितभाषिणः॥" (४४) [माघः]

वा, समर्थ्यते—सत्यत्वेन प्रतिपाद्यते, सः अर्थान्तरन्यासः। अत्र साधर्म्यवैधर्म्ये समर्थनीयसमर्थकयोः। तथा च, किञ्चिद्धर्मवत्तया उक्तस्य सामान्यस्य तत्साधर्म्यवता विशेषेण तद्धर्मवत्तायाः सत्यत्वेन प्रतिपादनम्; एवं-रीत्या विशेषस्यापि सामान्येन तथा प्रतिपादनं तत्त्वमित्यर्थः। हेतुश्चात्र समर्थको ज्ञेयः।

(४२) समर्थ्यसमर्थकवाक्ययोः सामान्यविशेषभावेऽर्थान्तरन्यासः; दृष्टान्ते प्रतिवस्तूपमायाञ्च न तथेति परस्परं भेदः।

(४३) बृहदिति।—क्षोदीयानपि—अतिक्षुद्रोऽपि, ["स्थूलदूर—"(६।४।१५६ पा०) इत्यादिना ईयसुनि यणादिपरलोपः पूर्वगुणश्च] बृहत्सहायः,—महासहायः सन्, कार्य्यान्तं—प्रारब्धकर्मसमाप्तिं, गच्छति—प्राप्नोति; तथा हि, [अपां समूह आपं, "तस्य समूहः" (४।२।३७ पा०) इत्यण्; तेन गच्छतीत्यापगा] नगाऽऽपगा—गिरिनिर्झरिणी, क्षुद्रा नदी इति भावः, महानद्या—गङ्गाऽऽदिकया, सम्भूय—मिलित्वा, अम्भोधिं—समुद्रम्, अभ्येति—प्राप्नोति। क्षुद्रोऽप्येवं, तादृक् महावीरश्चेदस्तु विसु वक्तव्य इत्यपिशब्दार्थः। पथ्यावक्त्रं वृत्तम्।

(४४) यावदिति।—माधवः,—कृष्णः, एवम्—उक्तप्रकारां, यावन्तोऽर्था इति यावदर्थं, ["यावदवधारणे" (२।१।८ पा०) इति साकल्येऽव्ययीभावः] यावदर्थं पदानि यस्याः ताम्, अभिधेयसम्मिताक्षरामित्यर्थः, वाचम् आदाय—उक्त्वा इत्यर्थः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र द्वितीयार्द्धगतेन सामान्येनार्थेन प्रथमार्द्धगतो विशेषोऽर्थः समर्थ्यते ।

वैधर्म्येण यथा,—

"इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् ।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः ॥" (४५) [कुमारस०]

अत्र द्वितीयार्द्धगतेन सामान्येनार्थेन प्रथमार्द्धगतो विशेषोऽर्थो वैधर्म्येण समर्थ्यते ।

तुल्ययोगिता,—

"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥ (४६)

[विश्वनाथः]

केवलं प्रस्तुतानामप्रस्तुतानां वा एकधर्मसम्बन्धः तुल्ययोगिता । यथा,—

"यं सर्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे ।

विरराम—तूष्णीम्बभूव ; ["व्याङ्परिभ्यो रमः" (१।३।८३ पा०) इति परस्मैपदम्] ; तथा हि, महीयांसः,—महत्तराः, जनाः इति शेषः, प्रकृत्या—स्वभावेन, मितभाषिणः,—अल्पवादिनः, भवन्तीति शेषः, वृथाऽऽलापनिषेधादिति भावः । वृत्तं तदेव।

(४५) इत्थमिति ।—इत्थम्—अनेन प्रकारेण, रविशशिपवनोदधिभुजङ्गसुरेन्द्रैरिति भावः, आराध्यमानोऽपि—सेव्यमानोऽपि, (स तारक इति पूर्वेणान्वयः) भुवनत्रयं क्लिश्नाति—पीडयति । तथा हि, दुर्जनः,—दुष्टो जनः, प्रत्यपकारेण—तत्कृतापकारस्य प्रतीकारेण, तत्कृतानिष्टविनिमयरूपेणानिष्टेन इत्यर्थः, शाम्येत्—शान्तो भवेत्, उपकारेण न, शाम्येदिति शेषः ; प्रत्युत प्रकुप्यतीति भावः । अत्र क्लेशशमने विरुद्धधर्माविति बोध्यम् । वृत्तं पूर्वोक्तम् ।

(४६) पदार्थानामिति ।—यदा प्रस्तुतानां—प्राकरणिकानाम्, अन्येषां वा—अप्रस्तुतानां वा, अप्राकरणिकानां वेत्यर्थः, पदार्थानां—वस्तूनाम्, एकेन धर्मेण—गुणक्रियाऽन्यतररूपेण, न तु तदुभयरूपेण धर्मेणेति भावः, अभिसम्बन्धः,—सम्भावनीयोधनं, भवेत्, तदा तुल्ययोगिता स्यात् । तथा चेयं द्विविधा,—केवलप्रस्तुतपदार्थैकधर्मसम्बन्धा, केवलाप्रस्तुतपदार्थैकधर्मसम्बन्धा चेति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भास्वन्ति रत्नानि महौषधीश्च
पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥" (४७) [कुमारस०]

अत्र हिमवद्वर्णनस्य प्रकृतत्वात् तद्गतौषधिरत्नानां द्वयानामपि प्रकृतत्वं, तेषां दोहनक्रियारूपैकसमानधर्मसम्बन्धात् औपम्यस्य गम्यत्वात् केवलप्राकरणिकविषयोऽयमलङ्कारः ।

"नागेन्द्रहस्तास्त्वचि कर्कशत्वा-
देकान्तशैत्यात् कदलीविशेषाः ।
लब्ध्वाऽपि लोके परिणाहि रूपं
जातास्तदूर्व्वोरुपमानवाह्याः ॥" (४८) [कुमारस०]

अत्र नागेन्द्रहस्तानां कदलीविशेषाणाञ्च द्वयानामप्यप्रस्तुतानां परिणाहिरूपलाभक्रियायाः समानधर्मस्य सम्बन्धात् केवलाप्राकरणिकविषयकमिदमुदाहरणम् ।

दीपकम्.—

"अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते ।" [विश्वनाथः]

अप्रस्तुतप्रस्तुतयोः एकधर्माभिसम्बन्धो दीपकम् । (४९)

---

(४७) यमिति ।—सर्वशैलाः,—सर्वे पर्वताः, दोहदक्षे—दोहनकुशले, मेरौ—सुमेरुपर्वते, दोग्धरि—दोहके, स्थिते सतीत्यर्थः, यं—हिमालयं, वत्सं परिकल्प्य—विधाय, पृथुना—वेणपुत्रेण तदाख्यनृपेण, उपदिष्टां—निर्दिष्टां, धरित्रीं—वसुन्धरां, गोरूपधरामिति भावः, ("गौर्भूत्वा तु वसुन्धरा" इति विष्णुपुराणात्) भास्वन्ति—प्रभापूर्णानि, रत्नानि—मणीन्, जातिश्रेष्ठवस्तूनि वा, महौषधीश्च—सञ्जीवनीप्रभृतीश्च, क्षीरत्वेन परिणता इति भावः, ("ताः क्षीरपरिणामिनीः" इति विष्णुपुराणात्) दुदुहुः । उपजातिः ।

(४८) नागेन्द्रेति ।—नागेन्द्राणाम्—ऐरावतादीनां, हस्ताः,—कराः, गजशुण्डादण्डा इत्यर्थः, त्वचि—चर्मणि, कर्कशत्वात्—काठिन्यात्, कदलीविशेषाः,—रामरम्भाऽऽदयः, एकान्तशैत्यात्—अतिशीतलत्वात्, लोके—जगति, परिणाहि—विशालं, ("परिणाहो विशालता" इत्यमरः) रूपं लब्ध्वाऽपि तदूर्व्वोः,—तस्याः,—पार्वत्याः, ऊर्व्वोः, उपमानवाह्याः,—उपमीयते अनेनेति उपमानं, तस्मात् वाह्याः,—बहिःस्थिताः, जाताः, उपमानक्रियाऽनर्हा बभूवुः । तदूर्व्वोर्न कार्कश्यं नापि एकान्तशैत्यमिति भावः । पूर्वोक्तं वृत्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा,—"बलावलेपादधुनाऽपि पूर्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा।
सती च योषित् प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि॥" (५०) [माघः]

अत्र प्रस्तुतायाः निश्चलायाः प्रकृतेरप्रस्तुतायाः पतिव्रतायाश्च जन्मान्तरेऽपि स्वकीयपुरुषानुगमनरूपैकक्रियासम्बन्धः।

अन्यरूपं दीपकम्,—

"अथ कारकमेकं स्यादनेकासु क्रियासु चेत्।"(५१)
[विश्वनाथः]

तदाऽपि दीपकमेव। यथा,—

"विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च॥" (५२) [उत्तरच०]

---

(४९) अप्रस्तुतेति।—अप्रस्तुतप्रस्तुतयोः,—अप्रकृतप्रकृतयोर्मिलितयोः पदार्थयोः, न तु अमिलितयोरित्यर्थः ; अत एव तुल्ययोगिताया अस्य भेदः।

(५०) बलावलेपादिति। जिगीषुणा—जयेच्छुना, तेन—शिशुपालेन, बलावलेपात्—बलदर्पात्, अधुनाऽपि—अस्मिन् जन्मनि अपि, पूर्ववत्—पूर्वजन्मनीव, जगत् प्रबाध्यते—प्रपीड्यते ; तथा हि, सती—साध्वी, योषित्—नारी च, निश्चला—स्थिरा, प्रकृतिश्च—स्वभावश्च, भवान्तरेष्वपि—जन्मान्तरेष्वपि, पुमांसं—पुरुषं, जन्मान्तरीणाऽऽश्रयभूतमिति भावः, अभ्येति—प्राप्नोति। ["सतीव योषित् प्रकृतिः सुनिश्चला" इति पाठे—उपमानोपमेयपुरस्कृतोऽर्थान्तरन्यासालङ्कारः]। वंशस्थविलं वृत्तम्।

(५१) अथेति।—अथ—अथवा, चेत्—यदि, अनेकासु—बह्वीषु, क्रियासु, सतीषु अपीति शेषः, एकं कारकं स्यात्, तदाऽपि दीपकमिति पूर्वतोऽधिगम्यते।

(५२) विनिश्चेतुमिति।—सीतां प्रति रामस्योक्तिः। अत्र मूलोक्तचूर्णकस्थम् "एतत्" इति पदम् आकृष्य अन्वयः कार्य्यः। एतत्—मया अनुभूयमानं त्वदङ्गसंस्पर्शजनितम् अनिर्वचनीयं वस्तु इत्यर्थः, सुखम् इति विनिश्चेतुं न शक्यः,—सुखत्वेन निर्णेतुं न शक्यते, सम्यगनुभवसामर्थ्याभावादिति भावः ; वा—अथवा, दुःखमिति विनिश्चेतुं न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अत्र भ्रमयति सम्मीलयति चेत्युभयोः क्रिययोः कर्त्तृकारकमेकं विकार इति, कर्मकारकञ्चैकं चैतन्यमिति।

सन्देहः,—

"सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः।"

[विश्वनाथः]

भेदोक्तौ तदनुक्तौ च द्विधाऽसौ परिकीर्त्तितः॥

प्रकृते—उपमेये, अन्यस्य—उपमानस्य, प्रतिभा—कविप्रौढ़ोक्तिः, तया उत्थितः; तेन "स्थाणुर्वा पुरुषो वा" इति सन्देहे नायमलङ्कारः। भेदः,—वैधर्म्यम्।

भेदोक्तौ यथा,—

"अयं मार्त्तण्डः किम्? स खलु तुरगैः सप्तभिरितः
कृशानुः किम्? सर्वाः प्रसरति दिशो नैष नियतम्।
कृतान्तः किं साक्षात्? महिषवहनोऽसाविति चिरं
समालोक्याऽऽजौ त्वां विदधति विकल्पान् प्रतिभटाः॥" (५३)

शक्यः, अन्तःकरणप्रतिकूलवेदनीयस्यैव दुःखपदार्थत्वात्, एतद्भावस्य तु सर्वदैवाभिलषणीयत्वेन अन्तःकरणप्रतिकूलवेदनीयत्वाभावादिति भावः; वा—अथवा, प्रमोहः, सर्वत्रैव "इति विनिश्चेतुं न शक्यः" इत्यनुषज्यते; सीतास्पर्शजनितोऽयं भावः इति यथार्थानुभवात् अज्ञानत्वेनापि निर्णेतुं न शक्यते इति भावः; वा निद्रा, युगपत् सर्वेन्द्रियवृत्तिरोधो हि निद्रा, अत्र तु त्वगिन्द्रियग्राह्यस्पर्शज्ञानसत्त्वात् निद्रात्वेनापि निश्चेतुं न शक्यः इति भावः; किमु—किंवा, विषविसर्पः,—विषस्य सर्वशरीरे सञ्चारः, विषव्याप्तस्थले वेदनाज्ञानं न जायते, अत्र तु वेदनाऽनुभवात् निश्चेतुं न शक्य इति भावः; मदः,—मद्यपानजनिताऽवस्था, किमु, इति विनिश्चेतुं—विशेषेण निर्द्धारयितुं, न शक्यः,मद्यपानाकरणादिति भावः; हि—यतः, (हे प्रिये!) तव स्पर्शे स्पर्शे—प्रतिस्पर्शं, परिमूढ़ः,—विवश इत्यर्थः, इन्द्रियगणो येन तादृशः, विकारः,—तव स्पर्शजनितचित्तविकृतिः, मम चैतन्यं भ्रमयति च, सम्मीलयति च—आवृणोति च; तव स्पर्शजविकारे कदाचित् मम ज्ञानं विलुप्तं, कदाचिद्वा अस्थिरं सत् किमपि निश्चेतुं न शक्नोति इति निष्कर्षः। शिखरिणी नामच्छन्दः।

(५३) अयमिति।—राजस्तुतिरियम्। अयं मार्त्तण्डः,—सूर्यः, किम्? नु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भेदानुक्तौ यथा,—

"अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः?
चित्तोन्मादरसः स्वयं नु मदनो मासो नु पुष्पाऽऽकरः?।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः?॥" (५४) [विक्रमो०]

हीत्याह,—सः,—मार्त्तण्डः, खलु—निश्चितं, सप्तभिः तुरगैः,—अश्वैः, इतः,—गतः, अयन्तु न तथेति भावः; कृशानुः,—अग्निः, किम्? न हीत्याह,—एषः,—कृशानुः, नियतं सर्वा दिशो न प्रसरति—न व्याप्नोति इत्यर्थः; "प्रसिद्धमूर्द्ध्वज्वलनं हविर्भुजः" इति तस्य ऊर्द्ध्वप्रसरस्य प्रसिद्धत्वात्, वाय्वभिमुखदिग्भावप्रसारित्वाद्वा, नायं तथेति भावः; साक्षात्—स्वयं, कृतान्तः,—अन्तकः, किम्? न हीत्याह,—असौ—कृतान्तः, महिषवहनः,—महिषाऽऽरूढः, नायं तथेति भावः; त्वाम् आजौ—युद्धे, समालोक्य—दृष्ट्वा, प्रतिभटाः,—प्रतिपक्षवीराः, चिरं—बहुक्षणम्, इति—इत्थं, विकल्पान्—वितर्कान्, विदधति—कुर्वन्ति। वृत्तं पूर्वोक्तम्।

(५४) अस्या इति।—उर्वशीं दृष्ट्वा पुरूरवसस्तुक्तिः। अस्याः,—उर्वश्याः, सर्गविधौ—सृष्टिव्यापारे, कान्तिप्रदः,—लावण्यदाता, चन्द्रः प्रजापतिः,—स्रष्टा, अभूत् नु?—अभूत् किम्? नु इति प्रश्ने, चन्द्रस्य कान्तिमयत्वात् कान्तिप्रदत्वं वितर्क्यते इति भावः; चित्तस्य उन्मादे—उन्मत्तीकरणे, रसः,—अनुरागो यस्य तथाभूतः, स्वयं मदनः,—कामः, नु—किं, प्रजापतिरभूत्? इति पूर्वोक्तेनान्वयः; अन्यथा कथमेवं विलासित्वम्? इति भावः; अथवा पुष्पाऽऽकरः,—पुष्पाणाम् आकरः,—उत्पत्तिकालः, कुसुमयोनिरित्यर्थः, मासः,—फाल्गुनचैत्रमासाऽऽत्मकः वसन्तकाल इति यावत्, नु—किं, प्रजापतिरभूत्? अन्यथा कथमेवं कुसुमवत् अङ्गानां सौकुमार्य्यम्? इति भावः। कथमियं जिज्ञासा? इत्याशङ्क्याऽऽह, वेदेति।—वेदाभ्यासेन—वेदानां पुनः पुनरनुशीलनेन, जडः,—विषयबोधरहित इत्यर्थः, अत एव विषयेभ्यः,—स्रक्चन्दनवनिताऽऽदिभ्यः, व्यावृत्तं—निवृत्तं, कौतूहलम्—औत्सुक्यं यस्य तथाभूतः, भोगवासनाविरत इति यावत्, पुराणः,—चिरन्तनः, मुनिः,—बदरिकाऽऽश्रमवासी नारायणः, इदम्—ईदृशं, मनोहरं रूपं निर्मातुं कथं नु—केन प्रकारेण, प्रभवेत्?—शक्नुयात्? न कथमपीत्यर्थः। क्व वा रसज्ञानविरहितपुराणो मुनिः? क्व चैतत् सौन्दर्य्यम्? सर्वथा नेयं जराजीर्णप्रकृतेः नियतवेदाभ्यासविरसचेतसो नारायणमुनेर्निर्मितिः, अपि तु चन्द्रमदनाऽऽदेः सुकुमारतरस्य कस्यापि विलसितमेतदिति भावः। शार्दूलविक्रीडितं वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्रान्तिमान्,—

"साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता॥" (५५)

[विश्वनाथः]

प्रतिभोत्थितेति "शुक्तिकायां रजतम्" इति भ्रान्तिर्नास्य अलङ्कारस्य विषयः। यथा,—

"महाराज! श्रीमन्! जगति यशसा ते धवलिते
पयःपारावारं परमपुरुषोऽयं मृगयते।
कपर्दी कैलासं करिवरमथायं कुलिशभृत्
कलानाथं राहुः कमलभवनो हंसमधुना॥" (५६) [महापद्यम्]

अत्र भोजराजस्य यशसा धवलीकृते जगति सर्वत्रापि परमपुरुषाऽऽदीनां समुद्राऽऽदिभ्रान्तिः कविप्रतिभोत्थितेति भ्रान्तिमानलङ्कारः।

अपह्नुतिः,—

"प्रकृतं प्रतिषिध्यान्य-स्थापनं स्यादपह्नुतिः॥" (५७)

[विश्वनाथः]

इहापि कविप्रौढोक्तिसिद्धमेव। (५८)

---

(५५) साम्यादिति।—अतस्मिन्—अतथाभूते, वस्तुनीति शेषः, साम्यात्—सादृश्यात्, प्रतिभोत्थिता—कविप्रौढोक्तिसमुद्भूता, तद्बुद्धिः,—तद्वस्तुबोधः, भ्रान्तिमान्।

(५६) उदाहरति, महाराजेति।—हे श्रीमन्! महाराज! ते—तव, यशसा जगति धवलिते—शुक्लीकृते सति, अधुना अयं परमपुरुषः,—नारायणः, पयःपारावारं—क्षीरसागरं, कपर्दी—शम्भुः, कैलासम्, अयं कुलिशभृत्—वज्री, इन्द्र इत्यर्थः, करिवरम्—ऐरावतं, राहुः कलानाथं—चन्द्रं, कमलभवनः,—पद्मयोनिः ब्रह्मा, हंसं—स्ववाहनमिति भावः, मृगयते—अन्विष्यति, सर्वस्य जगतः श्वेतीभूतत्वात् श्वेतवस्तूनां क्षीरसागराऽऽदीनां तदन्तर्लीनत्वेन मार्गणमुचितमेवेति भावः। शिखरिणी वृत्तम्।

(५७) प्रकृतमिति।—प्रकृतं—प्रस्तुतं, प्रतिषिध्य—निषिध्य, अन्यस्य—अप्रकृतस्य, स्थापनम् अपह्नुतिः स्यात्।

(५८) इहेति।—इहापि—निरुक्तलक्षणेऽपि, कवेः प्रौढोक्त्या सिद्धम् एव, "प्रकृतं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा,—"नेदं नभोमण्डलमम्बुराशि-
नैताश्च तारा नवफेनभङ्गाः।
नायं शशी कुण्डलितः फणीन्द्रो
नासौ कलङ्कः शयितो मुरारिः॥" (५९)

अत्र प्रस्तुतानां नभोमण्डलाऽऽदीनां प्रतिषेधेन अम्बुराशि-प्रभृतीनामप्रस्तुतानां स्थापनम्। यथा वा,—

"दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः।
मणिव्याजेन पर्य्यस्ताः पृथिव्यामश्रुबिन्दवः॥" (६०) [रघु०]

अत्र प्रस्तुतानां मणीनां प्रतिषेधेन अश्रुबिन्दूनां स्थापनम्।

समासोक्तिलक्षणमुक्तमाग्नेये,—

"यत्रोक्तात् गम्यतेऽन्योऽर्थस्तत्समानविशेषणः।
सा समासोक्तिरुदिता सङ्क्षेपार्थतया बुधैः॥"

तत्समानविशेषण इत्युपलक्षणं, तेन तत्समानकार्य्यैः, तत्समानलिङ्गैश्च गृह्यते। यत्र समैर्विशेषणैः कार्य्यैर्लिङ्गैश्च उक्तात्—प्रस्तुतात् अप्रस्तुताद्वा, अन्यः,—यथाक्रममप्रस्तुतः प्रस्तुतो

प्रतिषिध्य अप्रकृतस्य स्थापनम् अपह्नुतिः" इति अपेक्षितम्; तथा च,—कविप्रौढ़ोक्ति-सिद्धत्वे तु यथा,—"नेयं रज्जुः, किन्तु सर्पः" इत्यादौ नापह्नुतिः इति फलितम्।

(५९) नेदमिति।—इदं नभोमण्डलम्—आकाशमण्डलं, न, अम्बुराशिः,—समुद्रः; एताश्च ताराः,—नक्षत्राणि, न, नवाः फेनानां भङ्गाः,—छेदाः; अयं शशी—चन्द्रः, न, कुण्डलितः,—मण्डलाऽऽकारेण स्थितः, फणीन्द्रः,—शेषनागः; असौ—चन्द्रस्थितोऽयमङ्कः इत्यर्थः, कलङ्कः, न, शयितः,—शयनं गतः, मुरारिः,—नारायणः। उपजातिर्वृत्तम्।

(६०) दशाऽऽननेति।—तत्क्षणं—रामजन्मक्षणे इत्यर्थः, राक्षसानां श्रियः,—लक्ष्म्याः, अश्रुबिन्दवः,—वाष्पकणाः, मणिव्याजेन—रत्नच्छलेन, दशाऽऽननस्य—रावणस्य, किरीटेभ्यः,—मुकुटेभ्यः, पृथिव्यां पर्य्यस्ताः,—पतिताः, रावणमुकुटेभ्यः रत्नानि पेतुरित्यर्थः। [एतेन भविष्यद्राक्षसश्रीविनाशरूपं वस्तु व्यज्यते]। पथ्यावक्त्रं वृत्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वा, अर्थः गम्यते—बोध्यते, सा सङ्क्षेपोक्तिस्वरूपत्वात्, "समासेन—सङ्क्षेपेण उक्तिः" इति व्युत्पत्त्या—समासोक्तिः कथिता । सङ्क्षेपश्च एकस्य वचनेनोभयप्रतिपत्तिरिति । आदर्शे,—"अप्रस्तुतात् वाच्यात् प्रस्तुतस्य गम्यत्वे समासोक्तिः" इत्यभिहितम् ; नव्यास्तु तद्वैपरीत्येन—"प्रस्तुतादप्रस्तुतप्रतीतौ समासोक्तिः, अप्रस्तुतात् प्रस्तुतप्रतीतावप्रस्तुतप्रशंसा" इत्याहुः । "वाच्ये प्रस्तुतेऽप्रस्तुत-व्यवहारसमारोपः समासोक्तिः" इति विश्वनाथाऽऽदयः । वस्तु-तस्तु—उभयत्रापि समासोक्तेरेवाभ्युपगमस्यौचित्यादनुगुणमेव प्राचीनरीत्या लक्षणमुक्तमस्माभिः । उदाहरणं क्रमेण,—

"श्रुतिसुखभ्रमरस्वनगीतयः
कुसुमकोमलदन्तरुचो बभुः ।
उपवनान्तलताः पवनाऽऽहतैः
किसलयैः सलयैरिव पाणिभिः ॥" (६१) [रघु०]

अत्र विशेषणसाम्यात् कार्य्यसाम्याच्च प्रस्तुताद्वनलता-रूपार्थादप्रस्तुतो नर्त्तकीरूपोऽर्थः प्रतीयते ।

"चातकस्त्रिचतुरान् पयःकणान्
याचते जलधरं पिपासितः ।
सोऽपि पूरयति भूयसाऽम्भसा
चित्रमत्र महतामुदारता ॥" (६२) [पूर्वचातकाष्टक०]

---

(६१) श्रुतीति ।—श्रुतिसुखाः,—श्रवणाऽऽनन्दिनः, भ्रमराणां स्वनाः,—गुञ्जनानि, गीतय इव यासां ताः, तथा कुसुमानि एव कोमला दन्तानां रुचः,—प्रभाः यासां तथाविधाः, [अनेन सस्मितत्वं विवक्षितम्] उपवनान्तलताः,—उपवनप्रान्तवर्त्तिन्यो प्रतत्यः, यद्वा,—उपवनेषु या अन्ताः,—रमणीयाः, लताः, पवनाऽऽहतैः,—वायुकम्पितैः, किसलयैः,—नवपल्लवैः, सलयैः,—लयाऽऽख्यसङ्गीताङ्गहस्तचालनसहितैः, पाणिभिरिव—भुजैरिव, बभुः,—शोभन्ते स्म । [अनेन लतानां नर्त्तकीसाम्यं गम्यते]। द्रुतविलम्बितं वृत्तम् ।

(६२) चातक इति ।—चातकः,—पक्षिविशेषः, पिपासितः सन्, जलधरं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र अप्रस्तुताच्चातकाज्जलधराच्च कार्य्यसाम्यात् प्रस्तुतो याचकः, उदाराऽऽशयो धनपतिश्च बोध्यते।

अप्रस्तुतप्रशंसा,—

"अप्रस्तुतप्रशंसा स्यादप्रक्रान्तेषु या स्तुतिः।
तन्मुखेन प्रस्तुतस्य निन्दा यत्र प्रतीयते॥" (६३)

[दण्डी]

अप्रक्रान्तेषु—अप्रस्तुतेषु, अप्रस्तुतानामित्यर्थः, [षष्ठ्यर्थे सप्तमी]। यथा,—

"पादाऽऽहतं यदुत्थाय मूर्द्धानमधिरोहति।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः॥" (६४) [माघः]

विचतुरान् पयःकणान्—वारिबिन्दून्, याचते—प्रार्थयते; सोऽपि—जलधरोऽपि, भूयसा—प्रचुरेण, अम्भसा—जलेन, पूरयति, तत्प्रार्थनामिति शेषः। अत्र—जगति, महतां, जनानामिति शेषः, उदारता—वदान्यता, चित्रम्—आश्चर्य्यम्; महान् जनः स्वल्पं प्रार्थितोऽपि बहु ददातीति भावः। अत्र यद्यपि ग्रन्थकृता समासोक्तिः समर्थिता, तथाऽपि "पादाऽऽहतम्" इत्युदाहरिष्यमाणे पद्ये इवाप्रस्तुतप्रशंसैव बोध्या; क्षुद्रः अल्पमेव याचते, किन्तु महान्तः भूय्यैव प्रददतीति विशेषे प्रस्तुते सामान्यरूपेण तथाऽभिधानात्। यत्तु ग्रन्थकारेण प्राचीनमतमवलम्ब्य तथा समर्थितं, तन्न विचारसहं, वक्ष्यमाणाप्रस्तुतप्रशंसालक्षणस्यावातिप्रसङ्गात्। यथा हि अत्र समासोक्तिः समर्थ्यते, तथैव वक्ष्यमाणलक्षणानुसारेणापि अप्रस्तुतस्य अल्पप्रार्थनया भूरि ददतो जलधरस्य प्रशंसया ये भूरिप्रार्थनयाऽपि अल्पमपि न ददति, तेषां निन्दाप्रतीत्यभिधानस्यापि उपपत्तेः। रथोद्धता वृत्तम्।

(६३) अप्रस्तुतेति।—यत्र—यस्मिन् वाक्ये, तन्मुखेन—तस्य—अप्रस्तुतस्य, मुखं—द्वारं तेन, अप्रस्तुतद्वारेत्यर्थः, प्रस्तुतस्य—प्रकृतस्यार्थस्य, निन्दा—दोषोद्भावना, प्रतीयते—बोध्यते, न तु साक्षादभिधीयते, न वा लक्ष्यते इत्यर्थः, अप्रक्रान्तेषु—अप्रस्तुतानाम्, अप्रकृतानामर्थानामिति भावः, [षष्ठ्यर्थे सप्तमीयम्] अत्र तादृशीति पदमध्याहरणीयम्; तादृशी या स्तुतिः,—प्रशंसा, सा अप्रस्तुतप्रशंसा स्यात्।

(६४) पादाऽऽहतमिति।—बलदेवस्योक्तिरियम्। यत् रजः,—धूलिः, पादाऽऽहतं—चरणताडितं सत्, उत्थाय—उड्डीय, मूर्द्धानं—मस्तकं, पदा आहन्तुरिति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अत्र अप्रस्तुतस्य रजसः प्रशंसामुखेन प्रस्तुतस्य अपमानसहिष्णोर्निन्दा प्रतीयते। यथा वा,—

"सुखं जीवन्ति हरिणा वनेष्वपरसेविनः।
अन्नैरयत्नसुलभैस्तृणदर्भाङ्कुराऽऽदिभिः॥" (६५)

अत्र मृगाणां सुखजीवनस्याप्रस्तुतस्य प्रशंसया प्रस्तुतस्य राजानुवृत्तिजीवनस्य निन्दा प्रतीयते।

व्याजस्तुतिः,—

"व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढ़िरन्यथा।"(६६)

[मम्मटः]

मुखे—आपाततः, अन्यथा—यथाक्रमं स्तुत्यां निन्दायां वा, रूढ़िः,—पर्य्यवसानम्। स्तुतिपर्य्यवसायिनी निन्दा, निन्दापर्य्यवसायिनी स्तुतिश्च व्याजस्तुतिरिति फलितम्। निन्दायाः स्तुतिरूपेण पर्य्यवसाने व्याजेन स्तुतिरिति व्याजस्तुतिः, स्तुतेर्निन्दारूपेण पर्य्यवसाने व्याजरूपा स्तुतिः। क्रमेण यथा,—

"त्यक्त्वा राज्यं गिरमनुसरन् स्त्रीवशान्मूढ़बुद्धे
राज्ञो भ्रान्त्वा गहनविपिने हारयन् मुग्धकान्ताम्।

शेषः, अधिरोहति—आक्रामति, तत्—रजः, अचेतनमपीति भावः, अपमानेऽपि—अनुपराभवेऽपि, स्वस्थात्—सन्तुष्टात्, देहिनः,—चेतनात्, वरं—श्रेष्ठम्; ("देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवं मनाक् प्रिये" इत्यमरः)। यत्तु मल्लिनाथेन अत्र व्यतिरेक इत्युक्तं, तदुपेक्ष्यम्; तथाऽङ्गीकारे सर्वाऽऽलङ्कारिकविरोधाऽऽपत्तेः, देहिरजसोरुपमानोपमेयभावस्याऽऽर्थिकत्वेऽपि शाब्दत्वाभावाच्च।

(६५) सुखमिति।—वनेषु अपरसेविनः,—परसेवनवर्जिताः, हरिणाः अयत्नसुलभैः,—अनायासलभ्यैः, तृणदर्भाङ्कुराऽऽदिभिः अन्नैः सुखं जीवन्ति। पथ्यावक्त्रं वृत्तम्।

(६६) व्याजेति।—मुखे—प्रथमं, निन्दा—दोषाऽऽविष्करणं, वा—यद्वा, स्तुतिः, अन्यथा—स्तुत्यां निन्दायां वेति भावः, रूढ़िः,—पर्य्यवसानं, भवतीति शेषः, सा व्याजस्तुतिः; निन्दया स्तुतिः, स्तुत्या वा निन्दा यत्र प्रतीयते, सा व्याजस्तुतिरिति फलितम्।

(६७) त्यक्त्वेति।—रामं प्रति कस्यचित् व्याजस्तुतिः। हे राम! इत्यामन्त्रणपद-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सख्यं बद्धा कपिभिरसमं लङ्घयन् कीर्त्तिमग्र्यां
पूर्वेषां वो विलयमनयो हेमलङ्कां किमेतत् ? ॥" (६७)

अत्र स्त्रीवशवर्त्तिनो मूढ़धियो नरपतेर्वचनप्रतिपालनं, पूर्वेषां सगरसुतानां कीर्त्तिलङ्घनाऽऽदिकञ्चाऽऽपाततो निन्देव प्रतिभाति, चरमे तु पितुः प्रतिज्ञा संरक्षिता, दुस्तरं तोयनिधिमुत्तीर्य्य दुःसहप्रतापो वनिताऽपहारी दशाऽऽननो विजितः, समूलमुन्मूलितश्चेत्यहो! दुष्करं कृतमिति सर्वमेव स्तुत्यां पर्य्यवस्यतीति निन्दायाः स्तुतिरूपेण पर्य्यवसाने व्याजस्तुतिः।*

"युक्तं तवैतत् रघुवंशभूपते!
सतां हि सख्युः परिपालनं व्रतम्।
इतः स्तुतिः का जगदीश! निर्मला
भवान् यदर्थं न्यवधीन्निरागसम्?॥" (६८)

* यथा वा,—
"कः स्वर्धुनि! विवेकस्ते पापिनो नयसे दिवम्?" (ख)
[चन्द्रालोकः]

मवाध्याहार्य्यम्; स्त्रीवशात्—स्त्रैणत्वात्, मूढ़बुद्धेः,—दुर्मतेरित्यर्थः, राज्ञः,—दशरथस्येत्यर्थः, गिरं—"त्वं वनं गच्छ" इति वाचम्, अनुसरन्—प्रतिपालयन्, राज्यं त्यक्त्वा गहनविपिने—निविड़ारण्ये, भ्रान्त्वा—परिभ्रम्य, मुग्धकान्तां—सुन्दरीं रमणीं, हारयन्, राक्षसेनेति शेषः, कपिभिः,—वानरैः, असमम्—अतुल्यं, सख्यं बद्धा—कृत्वा, वः,—युष्माकं, पूर्वेषां—पूर्वपुरुषाणां, सगरसुतानामित्यर्थः, अग्र्यां—महतीं, कीर्त्तिं—सागरमित्यर्थः, लङ्घयन्—सेतुबन्धनेन तरन्नित्यर्थः, हेमलङ्कां—स्वर्णलङ्कापुरीं, विलयं—विध्वंसम्, अनयः,—प्रापितवानसि, इति यत्, एतत् किम्? मन्दाक्रान्ता वृत्तम्।

(६८) युक्तमिति।—रामं प्रति बालिराजस्योक्तिः। हे रघुवंशभूपते! तव

(ख) उदाहृते पद्ये मूढ़बुद्धेरित्यादिना दशरथस्यैव निन्दा, तया च न तस्य स्तुतिरवगम्यते, इत्युदाहरणासङ्गतिं मन्वानानां तुष्टये प्राह, यथा वेति।—स्वर्धुनि!—गङ्गे! विवेकः,—वैदुष्यम्। स्पष्टमन्यत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अत्र प्रियबन्धोः संरक्षणमुचितमिति तव सुग्रीवसहायत्वं युक्तमेवेत्यापाततः स्तुतिरपि, मित्रकार्य्यार्थं निरपराधस्य जीर्णकलेवरस्य शाखामृगस्य मे हननं सर्वथा गर्हितमेवेति चरमे निन्दायां पर्य्यवस्यतीति स्तुतेर्निन्दायां पर्य्यवसाने व्याजस्तुतिः।

प्रतीपम्,—

"प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्।
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते॥" (६९)

[विश्वनाथः]

क्रमेण यथा,—

"यत् त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये! तव मुखच्छायाऽनुकारी शशी।
येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते॥" (७०) [महाना०]

एतत्—सुग्रीवप्रीतिकरणमिति भावः, युक्तम्—उचितं, हि—यतः, सतां—साधूनां, सख्युः परिपालनं—परिरक्षणं, व्रतम्—अवश्यकर्तव्यमित्यर्थः; हे जगदीश! इतः,—अस्मात्परं, निर्मला—विशुद्धा, स्तुतिः का? यदर्थं—यस्य मित्रस्य निमित्तम् इत्यर्थः, भवान् निरागसं—निरपराधं, मामिति शेषः, न्यवधीत्—निहतवान्। वंशस्थविलेन्द्रवंशयोः उपजातिः छन्दः।

(६९) प्रसिद्धस्येति।—प्रसिद्धस्य—अधिकगुणतया विख्यातस्य, उपमानस्य, उपमेयत्वप्रकल्पनम्—उपमेयत्वेन—न्यूनगुणत्वेन, प्रकल्पनं—कथनं, वा—यद्वा, निष्फलत्वाभिधानं—निष्फलत्वेन अभिधानं—कथनं, प्रतीप—प्रतिगता आपो यस्मिन् इति व्युत्पत्त्या आनतोन्नतस्थलमित्यर्थः, तत्सादृश्यात् लक्षणया अलङ्कारोऽपि तन्नामकः, इति कथ्यते।

(७०) यदिति।—माल्यवत्पर्वते वर्षासु विरहिणो रामस्योक्तिरियम्। हे प्रिये! तव नेत्रयोः समाना कान्तिर्यस्य तादृशं, यत् इन्दीवरं—नीलोत्पलम्, ("इन्दीवरञ्च नीलेऽस्मिन्" इत्यमरः) तत् सलिले—जले, मग्नं—विनष्टं, वर्षाप्रभावादिति भावः; तव मुखच्छायाऽनुकारी—मुखस्य छायां—कान्तिम्, अनुकरोतीति तथाभूतः, त्वन्मुखसदृशकान्तिरित्यर्थः, शशी—चन्द्रः, मेघैरन्तरितः,—तिरोहितः, ये तव गमनानुसारिणी गतिर्येषां तादृशाः, राजहंसाः, तेऽपि गताः, मानसमिति शेषः, वर्षासु

का—१०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"मुखं यदि किमिन्दुना ? यदि चलाचले लोचने
किमुत्पलकदम्बकैः ? यदि तरङ्गभङ्गी भ्रुवौ।
किमात्मभवधन्वना ? यदि सुसंयताः कुन्तलाः
किमम्बुवहडम्बरैः ? यदि तनूरियं किं श्रिया ? ॥"(७१)[चौरप०]

प्रथमे प्रसिद्धानामुपमावस्तूनामिन्दीवराऽऽदीनामुपमेयत्व-प्रकल्पनं, द्वितीये इन्दुप्रभृतीनां निष्फलत्वकथनम्।

अथ श्लेषः,—

"शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्।"(७२)

[विश्वनाथः]

हंसानां मानसगमनस्य कविसमयसिद्धत्वादिति भावः; (अतः) दैवेन—प्रतिकूलविधि-नेत्यर्थः, तव सादृश्येन—सादृश्यदर्शनेनेत्यर्थः, यः विनोदः,—कथमपि चित्तसन्तोषः, तन्मात्रमपि, मे—मम, न चक्षते—न सह्यते; प्रियासादृश्यदर्शनं हि विरहिणां विनोदः,तदपि मम नास्तीति भावः। साहित्यदर्पणकृता तु इदमेव पद्यं काव्यलिङ्गोदा-हरणत्वेन प्रदर्शितम्। शार्दूलविक्रीडितं छन्दः।

(७१) मुखमिति।—सीतां विभाव्य रावणस्योक्तिरियम्। यदि मुखम्, अस्तीति शेषः, [सीतायाः इति सर्वत्र अध्याहार्य्यम्] तदा इन्दुना—चन्द्रेण, किम् ? —न किमपि प्रयोजनमित्यर्थः, तन्मुखेनैव इन्दुकार्य्यस्य समाधानादिति भावः; यदि चलाचले—चले—चञ्चले, अञ्चले—प्रान्तभागौ, अपाङ्गावित्यर्थः, ययोः तादृशे, लोचने, विद्येते इति शेषः, तदा उत्पलानां—नीलोत्पलानां, कदम्बकैः,—सङ्घैः, किम् ?—न किञ्चिदपि तेषामुपयोगितेत्यर्थः; तत्कार्य्यस्य लोचनाभ्यामेव संविधाना-दिति भावः; यदि तरङ्गस्येव भङ्गिः,—कौटिल्यं ययोः तादृशौ, भ्रुवौ, विद्येते इति शेषः, तदा आत्मभवस्य—कामस्य, धन्वना—धनुषा, किम् ?—नैव तस्य आव-श्यकत्वमस्तीत्यर्थः; कामकार्मुककार्य्यस्य तद्भ्रूयुगलाभ्यामेव निष्पादनादिति भावः; यदि सुसंयताः,—सुष्ठु निबद्धाः, कुन्तलाः,—केशाः, विद्यन्ते इति शेषः, तदा अम्बु-वहानां—मेघानां, डम्बरैः,—निचयैः,किम् ?—नैव किमपि कार्य्यमस्तीत्यर्थः,अत्रापि पूर्ववदेव हेतुर्द्रष्टव्यः; यदि इयं तनुः,—शरीरं, विद्यते इति शेषः, तदा श्रिया—लक्ष्म्या, किम् ?—नैव तस्याः प्रयोजनमस्तीत्यर्थः; अत्रापि पूर्ववत् हेतुर्बोध्यः। अत्र उपमानानां निष्फलत्वप्रतिपादनात् प्रतीपालङ्कारः। वृत्तं पृथ्वी।

(७२) शब्दैरिति।—स्वभावात्—स्वरूपत एव, न तु "संयोगो विप्रयोगश्च" इत्यनेनेति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वभावादेकार्थैरिति शब्दश्लेषात्, वाचनमिति च ध्वनेर्व्यवच्छेदः। यथा,—

"खलस्य कण्टकस्येव द्विविधैव प्रतिक्रिया।
उपानहा वक्त्रभङ्गो दूरतो वा विवर्जनम्॥" (७३)

सहोक्तिः,—

"सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्।" (७४)

यथा,—"पुरोपनीतं नृप! रामणीयकं
द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः॥" (७५)

अत्र वपुर्यशश्चोभयमपि क्षीयते इति सहार्थबलाद्बोध्यते।

भावः, एकार्थैः,—प्रकृतैकार्थप्रतिपादकैः,शब्दैः,—पदैः, अनेकार्थानां वाचनं—कथनं, श्लेषः; यद्यपि शब्दा एकं प्रस्तुतमेवार्थं प्रतिपादयितुं कृतसङ्केताः, तथाऽपि तैः सम्बन्धिविशेषोद्भावनयाऽनेकेषामर्थानामभिधया प्रतिपादनं श्लेष इति फलितम्।

(७३) खलस्येति।—खलस्य—दुर्जनस्य, कण्टकस्य इव द्विविधा एव प्रतिक्रिया—प्रतीकारः; उपानहा—चर्मपादुकया,वक्त्रभङ्गः,—मुखभङ्गः,वा दूरतः विवर्जनं—परिहारः, संसर्गपरित्याग इत्यर्थः, कर्त्तव्यमिति शेषः। वक्त्रशब्दः स्वभावादेकार्थः एव, अत्र तु खलस्य वक्त्रं—वदनं, कण्टकस्य वक्त्रम—अग्रभाग इति अनेकार्थयोः प्रतिपादनं ज्ञेयम्। इह यद्यपि उपमाया एव प्राधान्यमिति श्लेषमूलोपमेति वक्तुं युक्तं, तथाऽपि अलङ्काराणां चमत्कारप्राणतया श्लेषस्य उपमानिर्वाहकतया च अत्रापि उदाहरणं युक्तमेवेति बोध्यम्। वृत्तं पथ्यावक्त्रम्।

(७४) सेति।—सहार्थस्य—सहार्थकस्य, प्रातिपदिकस्येति भावः, बलात्—प्रयोगसामर्थ्यात्, एकं, क्रियापदमिति शेषः, द्विवाचकं—द्वयोरर्थयोः वाचकं, यत्र स्यादिति शेषः, सा सहोक्तिः; यथोदाहरिष्यमाणे पद्ये परैतीति क्रियापदं समनिति पदस्य सामर्थ्यात् यशसा वपुषा च सम्बध्यते, तथाऽनुगमकमिति भावः।

(७५) पुरोपनीतमिति।—द्वैतवनवासिनं युधिष्ठिरं प्रति द्रौपद्या उक्तिः। नृप!—हे राजन्! यदेतत्—पुरोवर्त्ति, वपुः,—तव शरीरं, पुरा—पूर्वं, द्विजातिशेषेण—ब्राह्मणभुक्तावशिष्टेनेत्यर्थः, [द्वे जाती येषां ते द्विजातयः; तदुक्तं,—"मातुरग्रे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काव्यलिङ्गम्.—

"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ॥" (७६)

[विश्वनाथ:]

वाक्यस्य पदार्थस्य वा हेतुरूपेणोक्तौ काव्यलिङ्गम्।

यथा,—

"रे हस्त! दक्षिण! मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम्।
रामस्य गात्रमसि दुर्भरगर्भखिन्न-
सीताप्रवासनपटोः करुणा कुतस्ते? ॥" (७७) [उत्तरच०]

ऽधिजननं द्वितीयं मौञ्जीबन्धने" इति। "दन्तविप्राण्डजा द्विजाः" इत्यमरः] अन्धसा—अन्नेन, ("भिस्सा स्त्री भक्तमन्धोऽन्नम्" इत्यमरः) रामणीयकं—रमणीयत्वम्, उपनीतं—गमितं, [नयतेर्द्विकर्मकत्वात् प्रधाने कर्मणि क्तः, "प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्" इति वचनात्] अद्य वन्यफलाशिनः,—वनफलभोजिनः, ते—तव, तत्—वपुः, यशसा समं—सह, परम्—अत्यर्थं, कार्श्यं—क्षयमित्यर्थः, परैति—प्राप्नोति, उभयमपि क्षीयते इत्यर्थः। वृत्तं वंशस्थम्।

(७६) हेतोरिति।—हेतोः,—कारणस्य, वाक्यपदार्थत्वे—वाक्यार्थत्वे, पदार्थत्वे च सतीत्यर्थः, काव्यलिङ्गम् उदाहृतं—कथितम्; हेतोर्वाक्यार्थरूपेण, पदार्थरूपेण चाभिधानात् काव्यलिङ्गं द्विविधमिति फलितम्।

(७७) रे हस्तेति।—रे—इत्यवज्ञासूचकमव्ययं, हे इत्यर्थः, हस्त! दक्षिण!—दक्षिणहस्त! [रामावयवत्वेन श्रेष्ठत्वेऽपि तपस्विहननापराधे प्रवृत्तत्वेन अतीवनिष्करुणत्वख्यापनाय "रे" इति नीचसम्बोधनमुपात्तम्। अत्र प्रायेण सर्वकार्य्यस्य दक्षिणहस्तेनैव क्रियमाणत्वात् सीतानिर्वासनस्यापि दक्षिणहस्तेनैव कृतत्वोक्तिरुपचारात् सङ्गच्छते] मृतस्य—अकाले कालेन वैवस्वतक्षयं (यमगृहं) नीतस्य, द्विजस्य शिशोः,—ब्राह्मणबालकस्य, जीवातवे—प्रत्युज्जीवनाय, ("जीवातुरस्त्रियां भक्ष्ये जीविते जीवनौषधे" इति मेदिनी) शूद्रमुनौ—शूद्र एव मुनिस्तस्मिन्, कृपाणं—खड्गं, विसृज—निक्षिप, वृषलतपस्विनं प्रहरेत्यर्थः, ब्राह्मणशिशूज्जीवनमेव प्रहारस्य मुख्यमुद्देश्यं, न तु शम्बूकहत्या इति भावः। अनपराधस्य तपस्विनः विशसने कथं हि जगति करुणामयेति ख्यातस्यापि उपलोपमहृदः इव ते करुणा नोदेति? इत्याशङ्क्य, तव अकरणीयं नास्तीति प्रबोध्याऽऽह, रामस्येति।—दुर्भरेण—वोढुमशक्येन, गर्भेण खिन्ना—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अत्र करुणाया अभावे "रामस्य गात्रमसि" इति वाक्यं, "दुर्भरगर्भखिन्नसीताप्रवासनपटोः" इति पदार्थश्च हेतुः।

विभावना,—

"विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते।" (७८)

[विश्वनाथः]

यथा,—

"अपमेघोदयं वर्षमदृष्टकुसुमं फलम्।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे॥" (७९) [कुमारस०]

अत्र मेघोदय-कुसुमरूपकारणयोरभावेऽपि वर्ष-फलरूप-कार्य्ययोरभिधानम्। *

---

* यथा वा,—

"अनायासकृशं मध्यमशङ्कतरले दृशौ।
अभूषणमनोहारि वपुस्तस्या मृगीदृशः॥" (ग)

क्रान्ता, या सीता तस्याः प्रवासने—निर्वासने, पटोः,—दक्षस्य, रामस्य—निष्करुणस्य इति भावः, गात्रम्—अङ्गम्, असि—भवसि, ते—तव, करुणा—दया, कुतः? यः पूर्णगर्भभरक्रान्तायाः प्राणप्रियतमायाः सीतायाः निर्वासनं कृतवान्, तस्य तव निःसम्पर्कसापराधजनप्रहारे दया न सम्भवत्येव इति भावः। छन्दः वसन्ततिलकम्।

(७८) विभावनेति।—हेतुं विना—कारणाभावे, [हेतुमिति षष्ठ्यर्थे विनेत्युपपदसामर्थ्येन द्वितीया] यत्—यत्र, [इदमव्ययम्] कार्य्यस्य उत्पत्तिः,—जन्म, उच्यते—वर्ण्यते, [अत्र "सा" इति अध्याहार्य्यम्] विभावना—विभाव्यते कारणं विना कार्य्यमुत्पन्नरूपेण यया सा, तदभिधेयोऽलङ्कार इति यावत्।

(७९) अपमेघोदयमिति।—वः,—युष्माकम्, अतर्कितोपपन्नम्—अभावितोपस्थितं, सहसा सञ्जातमित्यर्थः, अत्यन्तासम्भावितमिति यावत्, दर्शनं—साक्षात्कारः, अपमेघोदयम्—अपगतो मेघानामुदयो यत्र तादृशं, वर्षं—वर्षणम्, अनभ्रा वृष्टिरित्यर्थः, तथा अदृष्टकुसुमं—न दृष्टं कुसुमं यस्य तथाभूतं, फलं यथा, तथा मे—मम, प्रतिभाति; मेघं विना वृष्टिरिव, कुसुमोद्गमं विना फलमिव, सङ्केतं विना यत् तवाद्य दर्शनं जातं, तेन अतिदुर्लभलाभः अद्य मे संवृत्त इति भावः। वृत्तं पथ्यावक्त्रम्।

(ग) यदि तु उक्तोदाहरणे मेघोदयादिकं विना वर्षाऽऽदेः सम्भावनमात्रं, न तु वस्तुतस्तथा समुद्भावनं सङ्गच्छते, इति सचेतसां चेतश्चेदुदाहरणान्तरमाह,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशेषोक्तिः,—

"सति हेतौ फलाभावे विशेषोक्तिः" त्रिधा च सा ।
उक्त्यनुक्त्योर्निमित्तस्याप्यचिन्त्यत्वे च कुत्रचित् ॥(८०)

उक्तनिमित्ता, अनुक्तनिमित्ता, अचिन्त्यनिमित्ता चेति सा त्रिधा । क्रमेण यथा,—

"धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः ।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः ॥" (८१)

अत्र धनाऽऽदिरूपहेतुसत्त्वेऽपि उन्मादाऽऽदिरूपफलाभावः, महामहिमशालित्वञ्चात्र निमित्तमुक्तम् । अत्रैव चतुर्थपादे "कियन्तः सन्ति भूतले" इति पाठे—निमित्तमनुक्तं भवति ।

"स एकस्त्रीणि जयति जगन्ति कुसुमाऽऽयुधः ।
हरताऽपि तनुं यस्य शम्भुना न बलं हृतम् ॥" (८२)

अत्र तनुहरणेऽपि बलाहरणे निमित्तमचिन्त्यम् ।

---

(८०) सतीति ।—हेतौ सति—कारणसत्त्वे, फलाभावे—कार्य्यानुत्पत्तौ, विशेषोक्तिः । सा—विशेषोक्तिः, च—पुनः, निमित्तस्य—कारणस्य, कुत्रचित् उक्तौ, कुत्रचित् अनुक्तौ, कुत्रचिच्च अचिन्त्यत्वे अपि फलाभावरूपा सम्भवतीति त्रिधा—त्रिरूपा, भवतीति शेषः ।

(८१) धनिन इति ।—ते—जनाः, धनिनोऽपि—धनवन्तोऽपि, निरुन्मादाः,—उन्मादरहिताः, अप्रचण्डा इत्यर्थः, युवानोऽपि—तरुणा अपि, न चञ्चलाः,—चापल्यरहिता इत्यर्थः, प्रभवः,—निग्रहानुग्रहसमर्था अपि, अप्रमत्ताः,—अवहिताः, सावधाना इत्यर्थः ; उक्तेऽर्थे निमित्तं दर्शयति—यतः महामहिमशालिनः,—महाप्रभाववन्तः इत्यर्थः । वृत्तं पूर्वोक्तम् ।

(८२) स इति ।—सः,—प्रसिद्धः, कुसुमाऽऽयुधः,—कामः, एकः,—एकाकी

यथा वेति ।—तस्याः मृगीदृशः,—मृगनयनायाः, कान्तायाः इति शेषः, मध्यं—कटिदेश इत्यर्थः, अनायासकृशं—परिश्रमं विना क्षीणं, दृशौ—नेत्रे, अतरले—मद्यं विना चञ्चले, तथा वपुः,—शरीरम्, अभूषणमनोहारि—भूषणधारणाभावेऽपि सुन्दरम् । अत्र कृशत्वाऽऽदिरूपस्य कार्य्यस्याऽऽयासादिरूपं कारणं विनोत्पत्तिः ।

Dr. Urmila Sharma Collection; Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरोधः,—

"विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः ।"(८३)

[मम्मटः]

वस्तुतोऽविरोधेऽपि विरुद्धयोरिव धर्मयोर्यदभिधानं, स विरोधः, अयमेव विरोधाऽऽभास इत्यप्युच्यते । व्यधिकरणयोरिव धर्मयोः सामानाधिकरण्येन निर्देशो विरोधः । धर्मश्चात्र जातिगुणक्रियाद्रव्यरूपः । उदाहरणम्,—

"अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ? ॥" (८४) [रघु०]

"जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥"(८५) [कुमारसं०]

एव, त्रीणि जगन्ति—त्रिलोकीं, जयति—पराजयते, स्ववशं नयतीति यावत्, शम्भुना—हरेण, तनुम्—अङ्गं, हरताऽपि—दहताऽपि, यस्य—कुसुमाऽऽयुधस्य, बलं—सामर्थ्यं, न हृतं—न विनाशितम् । वृत्तं पूर्ववत् ।

(८३) विरोध इति ।—अविरोधे—विरोधाभावे, पर्य्यवसाने विरुद्धतापरिहारे इति यावत्, अपि विरुद्धत्वेन—विरोधितया, विरोधवत्तयेति यावत्, यत् वचः,—कथनं, स विरोधः । अयमेव विरोधाऽऽभास इत्यन्यैरभिधीयते । तथोक्तं वृत्तिवार्त्तिके,—"आपाततो विरोधस्य प्रतीतिर्यत्र दृश्यते । विरोधाऽऽभास इत्युक्तः" इति ।

(८४) अजस्येति ।—देवानां विष्णुं प्रति स्तुतिः । हे देव ! इत्यध्याहार्य्यम् ; अजस्य—न जायते इति अजः, ["अन्येष्वपि दृश्यते" (३।२।१०१ पा०) इति ड-प्रत्ययः] तस्य, जन्मरहितस्य इत्यर्थः, अथ च जन्म गृह्णतः,—मत्स्यादिरूपेण जायमानस्येत्यर्थः, निरीहस्य—निश्चेष्टस्य, अथ च हता द्विषः,—शत्रवो येन तथोक्तस्य, स्वपतः,—निद्राणस्य, अथ च जागरूकस्य—नित्यजागरणशीलस्य, सर्वसाक्षितया नित्यप्रबुद्धस्यापि योगनिद्राम् अनुभवतः इति भावः, इत्थं विरुद्धचेष्टस्य, तव याथार्थ्यं—तत्त्वं, कः—को जनः, वेद ?—जानाति ? न कोऽपीत्यर्थः । ["विदो लटो वा" (३।४।८३ पा०) इति णलादेशः] ।

(८५) जगदिति ।—ब्रह्माणं प्रति देवानां स्तुतिरियम् । हे देव ! इत्यूहनीयम् ; त्वं जगतां योनिः,—प्रभवः, किन्तु स्वयम् अयोनिः,—न योनिः, पर्य्यवसाने तु नास्ति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रथमे भगवतः प्रभावस्यातिशयित्वादापाततः प्रतीयमानस्य विरोधस्य समाधानम्। द्वितीये नञ्तत्पुरुषसमासे विरोधः, बहुब्रीहिणा परिहारः।

विषमम्,—

"गुणक्रिये वा यत् स्यातां विरुद्धे हेतुकार्य्ययोः।
यद्वाऽऽरब्धस्य वैफल्यमनर्थस्य च सम्भवः।
विरूपयोः सङ्घटना या च तद्विषमं मतम् *॥"(८६)

[विश्वनाथः]

यत्र कारणगुण एकः, कार्य्यगुणस्तद्विपरीतः, क्रिया वा द्वयोर्विरुद्धा, यत्र न केवलमारब्धस्य वैफल्यम्, अनर्थाऽऽपत्तिश्च, यत् विषमयोर्मेलनञ्च भवेत्, तदेवं चतुर्द्धा विषमम्। क्रमेण यथा,—

"सद्यः करस्पर्शमवाप्य चित्रं
रणे रणे यस्य कृपाणलेखा।
तमालनीला शरदिन्दुपाण्डु
यशस्त्रिलोक्याभरणं प्रसूते॥" (८७)

* यत्र गुणाऽऽदेरेकाऽऽश्रयवृत्तित्वेन परस्परविरोधः, तत्रैव

योनिः,—प्रभवः, कारणमित्यर्थः, यस्य तथाभूतः; जगताम् अन्तयति इति अन्तः,—नाशक इत्यर्थः, अथ च स्वयं निरन्तकः,—अन्तकात् भिन्नः, पर्य्यवसाने तु नास्ति अन्तकी यस्य तादृशः, स्वयं नाशरहित इत्यर्थः; त्वं जगताम् आदिः,—मूलकारणं, परन्तु स्वयम् अनादिः,—न आदिः, पर्य्यवसाने तु नास्ति आदिर्यस्य तथोक्तः; जगताम् ईशः,—स्वामी, स्वयन्तु निरीश्वरः,—ईश्वराद्भिन्नः, पर्य्यवसाने तु निरस्त ईश्वरो यदिति तथोक्तः, स्वामिरहित इत्यर्थः। श्लोकद्वये वृत्तं पूर्वोक्तम्।

(८६) गुणेति।—यत्—यदि, गुणक्रिये—गुणः क्रिया वा, हेतुकार्य्ययोः,—कारणस्य कार्य्यस्य वा, विरुद्धे स्यातां, यद्वा—किं वा, आरब्धस्य—कृताऽऽरम्भस्य कार्य्यस्य, वैफल्यं—निष्फलत्वम्, अनर्थस्य च—प्रत्युत अनिष्टस्य, सम्भवः, या च—या वा, विरूपयोः,—विसदृशयोः, प्रतिकूलयोरिति यावत्, सङ्घटना—सम्मेलनं, तत् विषमं मतं—कथितम्।

(८७) सद्य इति।—तमालनीला कृपाणलेखा—असिधारा, रणे रणे—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र कारणरूपासितताया: "कारणगुणा: कार्य्यगुणानारभन्ते" इति स्थितेविरुद्धा शुक्लयशस उत्पत्ति: ।

"आनन्दममन्दमिमं कुवलयदललोचने ! ददासि त्वम् ।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥" (८८)

अत्र त्वमानन्दं ददासि, त्वज्जनितो विरहस्तु तापयतितरामिति हेतुकार्य्ययोर्विरुद्धा क्रिया ।

"अयं रत्नाऽऽकरोऽम्भोधिरित्यसेवि धनाऽऽशया ।
धनं दूरेऽस्तु वदनमपूरि क्षारवारिभि: ॥" (८९)

अत्र न केवलं काङ्क्षितधनलाभो मा भूत्, प्रत्युत क्षारवारिभिर्वदनपूरणरूपानर्थपात: ।

"अनृतां गिरं न गदसीति जगति पटहैर्विघुष्यसे ।
निन्द्यमथ च हरिमर्चयतस्तव कर्मणैव विकसत्यसत्यता ॥"(९०)

[माघ:]

अत्र सत्यप्रख्यापनासत्यसमाचरणयोर्विरूपयो: सङ्घटना ।

विरोधालङ्कारो भवितुमर्हति । यत्र पुन: कार्य्यकारणयोर्भिन्नाऽऽश्रयवृत्तित्वेन परस्परविरुद्धत्वं, तत्र विषमस्यावसर इत्यनयोर्भेद: ।

प्रतिरणं, यस्य करस्पर्शमवाप्य—प्राप्य, करे स्थित्वेत्यर्थ:, शरदिन्दु:,—शरच्चन्द्र:, तद्वत् पाण्डु—शुभ्रं, त्रिलोक्याभरणं—त्रिभुवनस्य अलङ्कारभूतं, यश: सद्य: प्रसूते—तनोतीत्यर्थ:, इत्येतत् चित्रम्—आश्चर्य्यम् । वृत्तमुपजाति: ।

(८८) आनन्दमिति ।—कुवलयदललोचने !—हे नीलोत्पलदलाक्षि ! त्वम् इमम् अमन्दं—महान्तमित्यर्थ:, आनन्दं ददासि, किन्तु त्वयैव जनित:,—उत्पादित:, विरहस्तु मे—मम, शरीरं तापयतितराम्—अतिशयेन तापयतीत्यर्थ: । यद्यप्यानन्दतापौ गुणौ, तथाऽप्यत्र द्वयोर्धात्वर्थघटकत्वेन क्रियात्वेनैव व्यवहार: । आर्य्या छन्द: ।

(८९) अयमिति ।—अयम् अम्भोधि:,—समुद्र:, रत्नानाम् आकर:,—उत्पत्तिस्थानम्, इति, बुद्ध्वेति शेष:, धनाऽऽशया—धनप्राप्तिलालसया, असेवि—सेवित:, मयेति शेष: ; किन्तु, धनं दूरे अस्तु—तिष्ठतु, (प्रत्युत) क्षारवारिभि:,—लवणजलै:, वदनं—मुखम्, अपूरि—परिपूरितम् । पथ्यावक्त्रं वृत्तम् ।

(९०) अनृतामिति ।—युधिष्ठिरं प्रति शिशुपालस्योक्ति: । हे धर्मराज !

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असङ्गतिः,—

"कार्य्यकारणयोर्भिन्न-देशतायामसङ्गतिः।" (९१)

[विश्वनाथः]

यथा,—"अहो! खलभुजङ्गस्य विचित्रोऽयं बधक्रमः।
अन्यस्य दशति श्रोत्रमन्यः प्राणैर्विमुच्यते॥" (९२)

कारणमाला,—

"परं परं प्रति यदा पूर्वपूर्वस्य हेतुता।
तदा कारणमाला स्यात्" दर्पणे समुदीरिता॥(९३)

इत्यध्याहार्य्यम्; अनृताम्—असत्यां, गिरं—वाचं, न गदसि—न कथयसि, इति जगति—लोके, पटहैः,—वाद्यभेदैः, [कर्तृभिः] विघुष्यसे—कीर्त्यसे, अथ च—किन्तु, निन्द्यं हरिं—कृष्णम्, अर्चयतस्तव कर्मणा—निन्दनीयार्चनरूपेणेत्यर्थः, एव असत्यता—अनृतवादिता, विकसति—प्रकाशते। यः दिग्दिगन्तसमागतविप्रराजन्या-ऽऽदिसमाजे प्रकटरूपेण निन्द्यव्यवहारात् न बिभेति, तस्य असत्यकथनेऽपि भीतिः नास्त्येव इति स्पष्टं प्रतिभासते इति भावः। उद्गता वृत्तम्।

(९१) कार्य्येति।—कार्य्यकारणयोः,—कार्य्यस्य कारणस्य चेत्यर्थः, भिन्नदेश-तायां—भिन्नाधिकरणतायाम्, एकाधिकरणकत्वाभावे सतीति यावत्, असङ्गतिः।

(९२) अहो इति।—खलभुजङ्गस्य—दुष्टस्य सर्पस्य, अथ च दुर्जनरूपस्य सर्पस्येत्यर्थः; अयं बधक्रमः,—हननप्रकारः, अहो! आश्चर्य्यं, विचित्रः,—विलक्षणः। वैचित्र्यमेव दर्शयति, अन्यस्य—यः प्राणैर्विमुच्यते तद्भिन्नस्य, श्रोत्रं—कर्णं, दशति, अन्यः प्राणैः विमुच्यते—म्रियते। अत्र यद्यपि मूलकृता,—"जस्सेअ वणो तस्सेअ वेअणा भणइ जणो तं अलिअं। दंतक्खअं कवोले वहूए वेअणा सवत्तीणम्॥" ["यस्यैव व्रणस्तस्यैव वेदना भणति जनस्तदलीकम्। दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम्॥" इति सं] इत्युदाहृतं, तथाऽपि इदमादिमरससम्भृततया बालानामनुपयुक्तत्वा-दुपेक्षितमित्यवसेयम्। अस्यार्थः,—एकस्याः कपोले दशनक्षतम्, अपरस्या वेदनेति कार्य्यकारणयोर्भिन्नाऽऽश्रयत्वम् इति।

(९३) परमिति।—यदा परं परं प्रति—उत्तरोत्तरवर्त्तमानं प्रति, पूर्वपूर्वस्य हेतुता—कारणरूपत्वं, स्यादिति शेषः, तदा कारणमाला स्यात् इति दर्पणे—साहित्यदर्पणे, समुदीरिता—कथिता।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा,—"जितेन्द्रियत्वं विनयस्य कारणं
गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः॥" (९४)

सारः,—

"उत्तरोत्तरमुत्कर्षो भवेत् सारः परावधिः।" (९५)

[मम्मटः]

यथा,—

"राज्ये सारं वसुधा, वसुधायां पुरं, पुरे सौधम्।
सौधे तल्पं, तल्पे वराङ्गनाऽनङ्गसर्वस्वम्॥" (९६)

एकावली,—

"पूर्वं पूर्वं प्रति विशे-षणत्वेन परं परम्।
स्थाप्यतेऽपोह्यते वा चेत् स्यात्तदैकावली द्विधा॥" (९७)

[विश्वनाथः]

---

(९४) जितेन्द्रियत्वमिति।—जितेन्द्रियत्वम्—इन्द्रियदमनं, विनयस्य—शिष्टाऽऽचारस्य, कारणं—हेतुः; विनयात् गुणप्रकर्षः,—गुणानामुत्कर्षः, अवाप्यते—लभ्यते; गुणप्रकर्षेण जनः,—लोकः, अनुरज्यते; सम्पदः जनानाम् अनुरागः प्रभवो यासां तथाविधा हि, लोकानुरागेणैव श्रीविभवाः लभ्यन्ते इति भावः। अत्र विनयं प्रति जितेन्द्रियत्वस्य, गुणप्रकर्षं प्रति विनयस्य, जनानुरागं प्रति गुणप्रकर्षस्य, सम्पदं प्रति च जनानुरागस्य कारणत्वाभिधानात् पूर्वपूर्वस्य परं परं प्रति कारणत्वमवधेयम्। वंशस्थं वृत्तम्।

(९५) उत्तरोत्तरमिति।—उत्तरोत्तरम् उत्कर्षः, परः,—श्रेष्ठः, अवधिः यस्य तथाभूतः, सारः,—तदाख्यालङ्कारः, भवेत्। अयमलङ्कारस्सर्वस्वकृतोदारनाम्ना व्यवहृतः।

(९६) राज्ये इति।—राज्ये—राज्यमध्ये, वसुधा—लोकाऽऽवासभूता महीत्यर्थः, ("—वसुधोर्वी वसुन्धरा।—मेदिनी मही॥" इत्यमरः) सारं—श्रेष्ठेत्यर्थः, वसुधायां पुरं—नगरं, पुरे—नगरे, सौधं—हर्म्यं, सौधे—हर्म्ये, तल्पं—शय्या, तल्पे अनङ्गसर्वस्वं वराङ्गना—उत्तमा कान्ता, सारमित्यनेन सर्वत्र सम्बन्धः। आर्या वृत्तम्।

(९७) पूर्वमिति।—चेत्—यदि, पूर्वं पूर्वं प्रति परं परं—यद्विशेष्यमित्यर्थः;

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वं पूर्वं प्रति यथोत्तरस्य वस्तुनो विशेषणत्वेन यत् स्थापनं निषेधो वा सम्भवति, सा द्विधा बुधैरेकावली कथ्यते। क्रमेणोदाहरणम्,—

"सरो विकसिताम्भोजमम्भोजं भृङ्गसङ्गतम्।
भृङ्गा यत्रससङ्गीताः सङ्गीतं मधुवर्षि च॥" (९८)

अत्र सरसोऽम्भोजं, तस्य भृङ्गम्, इत्यादिक्रमेण विशेषणं विधीयते।

"न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तत् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः॥" (९९) [भट्टिः]

अत्र क्रमेण पूर्वपूर्वस्य निषेधः।

अर्थापत्तिः,—

"दण्डापूपिकयाऽन्यार्थाऽऽगमोऽर्थापत्तिरिष्यते।"

मूषिकेण दण्डो भक्षित इत्यनेन तत्सहचरितमपूपभक्षणम् अर्थादायातं भवतीत्येष न्यायो दण्डापूपिका, तयाऽर्थान्तरबोधनम् अर्थापत्तिः। यथा,—

विशेषणत्वेन स्थाप्यते वा अपोह्यते—निराक्रियते, निषिध्यते इत्यर्थः, तदा द्विधा—स्थापनापोहनभेदात् द्विप्रकारा, एकावली स्यात्।

(९८) सर इति।—यत्र—शरदि इत्यर्थः, सरः,—सरोवरः, विकसितानि—प्रस्फुटानि, अम्भोजानि—पद्मानि यस्मिन् तथोक्तम, अम्भोजं भृङ्गैः,—भ्रमरैः, सङ्गतं—युक्तं, भृङ्गाः,—भ्रमराः, ससङ्गीताः,—गुञ्जनकारिणः, सङ्गीतं—गुञ्जनञ्च, मधुवर्षि—अतिमधुरमित्यर्थः। अत्राम्भोजभृङ्गसङ्गीतानि उत्तरोत्तरव विशेष्याणि पूर्वपूर्वेषु सरोऽम्भोजभृङ्गेषु विशेषणत्वेनोपन्यस्तानि। पथ्यावक्त्रं छन्दः।

(९९) नेति।—तत् जलं न, आसीदिति शेषः, यत्—जलं, सुचारूणि—सुललितानि, पङ्कजानि यस्मिन् तथोक्तं, न; तत् पङ्कजं—पद्मं, न, यत् अलीनाः,—न लीनाः, सौरभमुग्धतया अनुड्डीयमानाः स्थिताः इति यावत्, षट्पदाः,—भ्रमराः यत्र तादृशम्; असौ षट्पदः,—भ्रमरः, न, यः कलं—मधुरास्फुटं, न जुगुञ्ज;

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ? ॥"(१००),

[रघु०]

अतिकठिनं लौहमपि तापेन गलितं भवतीति तदपेक्षया अतिसुकुमारस्य मनुष्यहृदयस्य गलनं सुतरामायातीत्यर्थापत्तिः ।

इति अलङ्कारविवेको नाम अष्टमशिखा ।

यत् गुञ्जितं—गुञ्जनं, न, यत—गुञ्जितं, मनः न जहार, श्रोतॄणामिति शेषः । अत्र पङ्कजषट्पदगुञ्जितानि उत्तरोत्तरविशेष्याणि पूर्वपूर्वेषु जलपङ्कजषट्पदेषु विशेषणत्वेनापोहितानि । वंशस्थं वृत्तम् ।

(१००) विललापेति ।—इन्दुमतीविरहे अजस्य विलापोऽयम् । सः,—अजः, सहजामपि—स्वाभाविकीमपि, धीरतां—धैर्य्यम, अपहाय—विसृज्य, बाष्पगद्गदं—बाष्पेण—शोकजनितनेत्रगतजलेन, कण्ठगतेन इति भावः, गद्गदं—विशीर्णाक्षरं यथा तथा, ध्वनिमात्रानुकारिगद्गदशब्दैरित्यर्थः, विललाप—परिदेवितवान् । तथा हि, अभितप्तम्—अग्निना सन्तप्तम, अयोऽपि—लौहमपि, अचेतनमपीति भावः, मार्दवं—मृदुतां, द्रवत्वमित्यर्थः, भजते—प्राप्नोति, शरीरिषु—देहिषु, अभिसन्तप्तेषु इति शेषः, विषये, का एव कथा ?—वार्त्ता ? न कापीत्यर्थः । सुन्दरी वृत्तम् । मल्लिनाथेन कुमारे द्वितीय सर्गे अस्य "वियोगिनी" इति नाम तथा रघोरष्टमसर्गे च "वैतालीयम्" इति नाम उक्तम् ।

इत्यशिवशास्त्राटवीसञ्चरणपञ्चानन-पण्डितकुलपतिना बि, ए, उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण विरचितायां, तदात्मजाभ्यां पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-विद्यारत्नाभ्यां परिवर्त्तित-परिवर्द्धितायां काव्यदीपिकाव्याख्यायाम् अष्टमशिखा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टमशिखाऽऽलोकः।

स्मरणम्,—

"सदृशानुभवात् वस्तु-स्मृतिः स्मरणमुच्यते।" (१)

[विश्वनाथः]

अनुरूपस्य वस्तुनो दर्शनाऽऽदिना यस्य कस्यापि अन्यस्य वस्तुनः स्मरणं स्मरणं नाम अलङ्कारः।

यथा,—"दिव्यानामपि कृतविस्मयां पुरस्तात्
अम्भस्तः स्फुरदरविन्दचारुहस्ताम्।
उद्वीक्ष्य श्रियमिव काञ्चिदुत्तरन्तीम्
अस्मार्षीज्जलनिधिमन्थनस्य शौरिः॥" * (२) [माघः]

---

* यथा वा—"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम्।
स्मरामि वदनं तस्याश्चारु चञ्चललोचनम्॥" (क)

---

(१) स्मरणालङ्कारमाह, सदृशेति।—सदृशस्य—गुणेन आकारेण चेष्टाऽऽदिना वा अनुरूपस्य, अनुभवात्—दर्शनाऽऽदिजन्यज्ञानात्, वस्तुनः,—दृष्टश्रुतसदृशस्य पदार्थस्य, स्मृतिः,—अनुध्यानं, स्मरणं—तन्नामालङ्कारः, उच्यते।

(२) उदाहरति, दिव्यानामिति।—जलकेलिवर्णनमिदम्। शौरिः,—श्रीकृष्णः, ("विष्णुर्नारायणः कृष्णः···। देवकीनन्दनः शौरिः" इत्यमरः) दिव्यानामपि—स्वर्गवासिनामपि, किं पुनः मर्त्यानाम्? इत्यपिशब्दार्थः, कृतः,—उत्पादितः, विस्मयः,—सौन्दर्यातिरेकेण लोकोत्तरवैलक्षण्यं यया तथाविधां, तथा स्फुरद्भ्याम् अरविन्दाभ्यां चारू—मनोरमौ, हस्तौ यस्याः तथाविधां, पद्महस्तामित्यर्थः, पुरस्तात्—अग्रतः, अम्भसः,—जलात्, [अत्र पञ्चम्यास्तसिल्। "—सलिलं कमलं जलम्।···। अम्भोऽर्णस्तोयपानीय—" इत्यमरः] उत्तरन्तीं—निष्क्रामन्तीं, काञ्चित्—कामपि स्त्रियं, श्रियमिव—मथ्यमानात् समुद्रात् सद्यः प्रादुर्भवन्तीं लक्ष्मीमिव, उद्वीक्ष्य—दृष्ट्वा, जलनिधेः,—

(क) प्राचां मतेन स्मरणालङ्कारस्योदाहरणं प्राक् प्रदर्शितम्, इदानीन्तु शिष्यबुद्धिवैशद्यार्थमलङ्कारान्तरैरपरामृष्टं स्मरणालङ्कारस्योदाहरणं प्रदर्श्यते—यथा वेति। अरविन्दमिति।—खेलता—क्रीडता, अरविन्दस्योपरि इति भावः, खञ्जनेन—तदाख्यपक्षिविशेषेण, मञ्जुलं—मनोहरम्, इदं—पुरोवर्त्ति, अरविन्दं—कमलं, वीक्ष्य—दृष्ट्वा, तस्याः,—स्त्रियाः, स्वकान्ताया: इत्यर्थः, चञ्चले—विलोले, लोचने—नेत्रे यस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिकरः,—

"विशेषणैर्यत् साकूतैरुक्तिः परिकरस्तु सः ।"(३)

[मम्मटः]

साकूतैः,—साभिप्रायैः, विशेषणैः यत् विशेष्यस्याभिधानं, सः परिकरो नाम अलङ्कारः । यथा,—

"तव प्रसादात् कुसुमाऽऽयुधोऽपि
सहायमेकं मधुमेव लब्ध्वा ।

समुद्रस्य, मन्थनं—विलोडनं तस्य, ["अधीगर्थ—" (२।३।५२ पा०) इति कर्मणीयं षष्ठी] समुद्रमन्थनमित्यर्थः, अस्मार्षीत—स्मृतवान् । अत्र कस्याश्चित् कमलहस्तायाः कान्तायाः जलादुत्तरणमवलोक्य तां समुद्रस्य मन्थनावसरे ततः प्रादुर्भवन्तीं लक्ष्मीमिव मत्वा समुद्रमन्थनस्मरणात स्मरणालङ्कारः इति अलङ्कारकौस्तुभकारः । अन्ये तु—इवशब्दस्यैव साक्षात् सत्त्वेनावैधर्म्यसाम्यबोधात् उपमालङ्कार एवायमित्युक्त्वा, स्मृतेस्तु प्रतीतिमात्रगम्यतया उपमाऽलङ्कारेण स्मरणालङ्कारध्वनिमेवाऽऽमनन्ति ; तथा हि माघव्याख्याने मल्लिनाथः,—"अत्र समुद्रमन्थनस्मारिकया श्रियमिवेत्युपमया सादृश्यात् श्रीः स्मृतेति स्मरणालङ्कारप्रतीतेरलङ्कारध्वनिः" इति । वयन्त्वत्र इत्थमेव ब्रूमः,—यतः पुरा देवदानवैर्मिलित्वा क्षीरोदधिममृतं ममन्थे, पश्चाच्च लक्ष्मीः कमलहस्ता तस्मात् प्रादुरासीत् इति पौराणिकी वार्त्ता ; अत एव उद्बोधकीभूतानां कमला-सदृशीनां कामिनीनां दर्शनात् तत्सहकारिण्येव लक्ष्मीरूपस्य लोकप्रसिद्धवस्तुनः स्मरणं स्फुट एव, तत् कथमलङ्कारध्वनिरित्युक्तं तन्न जानीमहे ; प्रत्युत एतेन तासामलौकिकं लावण्यं व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः समुचित एवेति । प्रहर्षिणी वृत्तं—"म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्" इति लक्षणात् ।

(३) परिकरमाह, विशेषणैरिति ।—साकूतैः,—आकूतेन—अभिप्रायेण सह वर्त्तन्ते इति साकूतानि तैः, साभिप्रायैः,विशेषणैः,—तद्द्वारेत्यर्थः, यत् उक्तिः,—कथनं, विशेष्यस्य वर्णनमिति यावत्, स तु परिकरः ; यानि विशेषणानि विशेष्यगतमर्थ-मुत्कर्षयन्ति, तैर्विशिष्य वर्णनं परिकरो नाम अलङ्कार इति भावः ।

(४) उदाहरति, तवेति ।—देवराजं प्रति कामस्येयमुक्तिः । हे देवेन्द्र !

तादृशं, चारु—सुन्दरं, वदनं—मुखं स्मरामि—स्मृतिविषयतामापादयामि । अत्र स्वकान्तामुखानुरूपखञ्जनवदरविन्ददर्शनेन तस्याः सुन्दरवदनरूपवस्तुनः स्मरणात् स्मरणालङ्कारः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुर्य्यां हरस्यापि पिनाकपाणेः
धैर्य्यच्युतिं के मम धन्विनोऽन्ये ? ॥" (४) [कुमारसं०]

अत्र कुसुमाऽऽयुध इति विशेषणं वक्तुर्निःसाराऽऽयुधत्वं द्योतयति, पिनाकपाणेरिति च रुद्रस्य महासाराऽऽयुधत्वम्, इत्युभयं साभिप्रायं विशेषणम्।

अधिकम्,—

"अधिकं पृथुलाऽऽधारादाधेयाऽऽधिक्यवर्णनम्।
पृथ्वाधेयात् यदाधाराऽऽधिक्यं तदपि तन्मतम्॥" (५)

[चन्द्रालोकः]

अतिविपुलस्य आधारस्य अपेक्षया आधेयस्य, अथवा अतिविपुलस्य आधेयस्य अपेक्षया आधारस्य आधिक्यं कविना

(इत्यध्याहार्य्यं) तव प्रसादात्—अनुग्रहात्, ("प्रसादोऽनुग्रहे काव्य-गुणस्वास्थ्य-प्रसन्निषु" इति मेदिनी) कुसुमाऽऽयुधः,—कुसुमानि—पुष्पाणि एव, आयुधानि—अस्त्राणि यस्य तादृशः सन्नपि, अतिकोमलास्त्रोऽपि इति भावः, अहमिति शेषः, एकम्—अद्वितीयं, मधुं—वसन्तम् एव, सहायं—सहचरं, लब्ध्वा—प्राप्य, पिनाकपाणेरपि—पिनाकः,—तदाख्यं धनुः, ("पिनाकोऽजगवं धनुः" इत्यमरः) पाणौ—हस्ते यस्य तथाभूतस्यापि, किं पुनरिदानीं पिनाकमपहाय शान्तभावेन स्थितवत इत्यपेरर्थः, हरस्य—हरति—संहरति, त्रिलोकीमिति तस्य, त्रैलोक्यसंहारकारिणो रुद्रस्येत्यर्थः, धैर्य्यस्य—समाधेः, च्युतिं—स्खलनं, भङ्गमिति यावत्, कुर्य्यां—कर्त्तुं शक्नुयामित्यर्थः, ["शकि लिङ् च" (३।३।१७२ पा०) इति शक्यार्थे लिङ्] अतः, अन्ये—तद्भिन्नाः, धन्विनः,—धनुर्द्धराः, मम के ? न प्रतियोद्धारः इति भावः। अत्र कुसुमाऽऽयुधः इति पदमित्यस्य, पिनाकपाणेरिति हरस्य च विशेषणं साभिप्रायम्। उपजातिः छन्दः।

(५) द्विविधमधिकालङ्कारमाह, अधिकमिति।—पृथुलः,—महान्, विपुल इति यावत्, असौ आधारः,—अधिकरणं तस्मात्, [ल्यब्लोपे पञ्चमी] विपुलमाधारमपेक्ष्येत्यर्थः, यत् आधेयस्य आधिक्यम्—अतिशयः, तस्य वर्णनं—कविप्रतिभया समर्थनं, तत् अधिकं—तदाख्योऽलङ्कारः ; यदा—पृथ्वाधेयात्—पृथुलाऽऽधेयापेक्षया, यत् आधारस्य आधिक्यं, वर्णनमिति शेषः, तत् अपि, तत्—अधिकम्, अधिकालङ्कार एवेत्यर्थः, मतं—कथितम् ; एवञ्चायमलङ्कारो द्विविधः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वप्रतिभाद्वारा यदि आविष्क्रियते, तदा अधिकं नाम अलङ्कारः। क्रमेण यथा,—

"युगान्तकालप्रतिसंहृताऽऽत्मनः
जगन्ति यस्यां सविकाशमासत।
तनौ ममुस्तत्र न कैटभद्विषः
तपोधनाभ्यागमसम्भवा मुदः॥" (६) [शिशुपालवध॰]

"किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र।
अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि॥" (७) [विश्वनाथः]

---

(६) पृथुलाऽऽधारापेक्षया आधेयाऽऽधिक्यवर्णनरूपं तावत् अधिकमुदाहरति, युगान्तकालेति।—नारदमुनेः आगमनेन हर्षं प्रकटयतो भगवतः श्रीकृष्णस्य वर्णनमिदम्। युगान्तकाले—प्रलयावसरे, प्रतिसंहृताः,—स्वस्वरूपे स्थापिताः, आत्मानः,—जीवाः येन तथाविधस्य, कैटभद्विषः,—श्रीकृष्णस्य, यस्यां—तनौ, जगन्ति—लोकाः, सविकाशं—सावकाशम्, असङ्कीर्णमिति यावत्, यथा तथा आसत—स्थितानि आसन्, ["आस उपवेशने" इत्यस्य लङि आत्मनेपदप्रथमपुरुषस्य बहुवचनमिदम्] तत्र—तस्यां, तनौ—भगवतो देहे, तपोधनस्य—महर्षेर्नारदस्य, अभ्यागमः,—आगमनं, तस्मात् सम्भवः,—उत्पत्तिः यासां तथाभूताः, मुदः,—प्रमोदाः, न ममुः,—नावकाशं प्राप्य तस्थुः ; स्थातुमक्षमाः सत्यो बहिर्निःसेरुरिति भावः। अत्र समस्तजगदाधाररूपाया भगवत्तन्वाः अपेक्षया नारदमुनिसमागमजन्याऽऽमोदरूपस्य आधेयस्य "न ममुः" इत्यनेन आधिक्योक्तेरधिकं नामालङ्कारः। दर्पणकार इममेव श्लोकमधिकालङ्कारस्य उदाहरणत्वेन प्रदर्शितवान्। मल्लिनाथस्तु,—"चतुर्दशभुवनभरणपर्याप्ते वपुषि अन्तर्न मान्तीति कविप्रौढोक्तिसिद्धातिशयेन स्वतःसिद्धस्याभेदेनाध्यवसितत्वादतिशयोक्तिः, सा च मुदामन्तःसम्बन्धेऽप्यसम्बन्धोक्त्या सम्बन्धासम्बन्धरूपा" इति अतिशयोक्त्यलङ्कारं समर्थितवान् ; वस्तुतस्तु—कविप्रौढोक्तिसिद्धातिशयेनाध्यवसितत्वेन आमोदरूपस्याऽऽधेयस्य आधिक्यसिद्धिरिति अतिशयोक्तिमूलोऽयमधिकालङ्कारः इति एवं समञ्जसम्। शिशुपालवधस्य प्रथमसर्गे त्रयोविंशपद्यमिदम्। वंशस्थविलं छन्दः।

(७) विपुलाऽऽधेयापेक्षया आधारस्याऽऽधिक्यवर्णनरूपमधिकालङ्कारमुदाहरति, किमिति।—"अहो! महानयं समुद्रः" इति कस्यादि समुद्रस्तुतिं समर्थयमानस्योक्तिरियम्। यत्र—यस्मिन्, यस्य वारिधेरेकदेशे इति यावत्, हरिः,—श्रीविष्णुः, कुक्षौ—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशेषः,—

"विशेषः ख्यातमाधारं विनाऽप्याधेयवर्णनम्।
विशेषः सोऽपि यद्येकं वस्त्वनेकत्र वर्ण्यते।
किञ्चिदारम्भतोऽशक्य-वस्त्वन्तरकृतिश्च सः॥"(८)

[चन्द्रालोकः]

आधारमवर्णयित्वैव यदि आधेयं वर्ण्यते, यद्वा—यदि एकं यत् किमपि वस्तु अनेकत्र वर्ण्यते, अथवा—यस्य कस्यापि वस्तुनः आरम्भेण अन्यस्य अशक्यस्य वस्तुनः कृतिः,—वर्णनया निर्माणमपि विशेषनामालङ्कारः। क्रमेणोदाहरणम्,—

"दिवमप्युपयातानाम्
आकल्पमनल्पगुणगणा येषाम्।
रमयन्ति जगन्ति गिरः
कथमिव कवयो न ते वन्द्याः?॥"(९) [अलङ्कारसर्वस्वम्]

उदरे,उदरैकदेशे इति यावत्,भुवनानि—सर्वान् लोकान्, निक्षिप्य—निधाय,अज्ञात एव—अविज्ञात एव, कुत्रेति केनाप्यलक्ष्यमाण एव इत्यर्थः, शेते,अस्य—तस्यैतस्येत्यर्थः, वारिधेः,—समुद्रस्य, क्षीरसागरस्येति यावत्, माहात्म्यं—महत्त्वम्, अधिकम्—अतिरिक्तं, किं ब्रूमः?—वर्णयामः? अत्र सकलभुवनानां महाऽऽधारस्यापि भगवतः क्षीरोदशायित्वेनाऽऽधेयत्वं, क्षीरोदस्य चाऽऽधारत्वं,तत्रापि अविर्भावनभावेन स्थितत्वात् आधेयस्य, आधाराऽऽधिक्यवर्णनमिति सङ्क्षेपसमन्वयः। आर्या वृत्तम्।

(८) विशेषमाह, विशेष इति।—ख्यातं—प्रसिद्धम्, आधारं विना अपि—एव, आधेयस्य वर्णनं विशेषः,—तदाख्योऽलङ्कारः; अथवा—यदि एकं वस्तु अनेकत्र—अनेकेषु वस्तुषु, वर्ण्यते—कथ्यते, सोऽपि विशेषः; यद्वा—किञ्चित् आरम्भतः,—विधानोद्योगात्, प्राथमिकात् यत्नादिति यावत्, अशक्यस्य—दुःसाध्यस्य, वस्त्वन्तरस्य—अन्यस्य पदार्थस्य, कृतिः,—सम्पादनञ्च, सः,—विशेषनामालङ्कारः।

(९) आधारमन्तरा आधेयवर्णनात्मकं विशेषमुदाहरति, दिवमिति।—दिवं—सुरलोकं ("सुरलोको द्योदिवौ द्वे स्त्रियौ—"इत्यमरः) उपयातानां—प्राप्तानामपि, मृतानामपीति यावत्, येषां—कवीनाम्, अनल्पाः,—बहवः, गुणानां—माधुर्यादि,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्राऽऽधारभूतकविजनानां स्वर्गंगतत्वेन तद्वर्णनं विनैव आधेयभूतानां तद्गिरां वर्णनम्।

"कानने सरिदुद्देशे गिरीणामपि कन्दरे।
पश्यन्त्यन्तकसङ्काशं त्वामेकं रिपवः पुरः॥" (१०)

"गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ।
करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतम्?" (११) [रघु०]

परिवृत्तिः,—

"अर्थानां यो विनिमयः परिवृत्तिस्तु सा स्मृता।"(१२)

[दण्डी]

प्रभृतीनां, गणाः,—समूहाः यासां तादृश्यः, गिरः,—वचांसि, काव्यानीति यावत्, आकल्पं—प्रलयावधि, जगन्ति—लोकान्, रमयन्ति—आमोदयन्ति, ते कवयः कथमिव—कथं,न वन्द्याः?—न वन्दनीयाः? येषां मृतानामपि वचनानि लोकस्य आमोदं वर्द्धयन्ति, ते कवयः सर्वेषामेव वन्दनीया इति भावः। यानि येषां वाक्यानि, तानि तेषामसत्त्वेऽपि लोकान् आमोदयन्तीत्याधारभूतकवीनामभावे तद्वचनरूपाऽऽधेयस्थित्युक्तो विशेषः। आर्य्या छन्दः।

(१०) एकस्य वस्तुनोऽनेकगोचरतावर्णनाऽऽत्मकं विशेषमुदाहरति, कानने इति।—कस्यचित् नृपतेः प्रतापवर्णनमिदम्। हे नरेन्द्र! (इत्यध्याहार्य्यं) रिपवः,—शत्रवः, एकं त्वां कानने—वने, ("गहनं काननं वनम्" इत्यमरः) सरितां—नदीनाम्, उद्देशे—अवकाशे, प्रदेशे इति भावः, गिरीणां—पर्वतानां, कन्दरेऽपि—गुहायामपि, अन्तकः,—कालः, तस्य सङ्काशं,—सदृशं, पुरः,—अग्रतः, पश्यन्ति। अत्र एकस्य नृपतिरूपस्य वस्तुनः काननाऽऽदिरूपानेकवस्तुगोचरत्वेन वर्णनमिति लक्षणसमन्वयो बोध्यः।

(११) किञ्चित् कार्य्यं कुर्वतः अशक्यस्य कार्य्यान्तरस्य विधानरूपं विशेषमुदाहरति, गृहिणीति।—७७ पृष्ठे व्याख्यातमिदं प्राक्। अत्र गृहिणीहरणरूपमेकं कार्य्यं आरभ्य सचिवाऽऽदिरूपवस्त्वन्तरहरणरूपस्याशक्यस्य कार्य्यान्तरस्य विधानात् विशेषः।

(१२) परिवृत्तिमाह, अर्थानामिति।—अर्थानां—पदार्थानां, यः विनिमयः,—एकस्य दानेन अपरस्योपादानं, सा परिवृत्तिः स्मृता। इयञ्च त्रिधा सम्भवति,—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समस्य न्यूनस्य अधिकस्य वा पदार्थस्य समेन अधिकेन न्यूनेन वा पदार्थान्तरेण परिवर्त्तनं परिवृत्तिः। क्रमेण यथा,—

"तदा भगवता तेन दृष्टिं दत्त्वा रणाङ्गणे।
गृहीतं जीवितं तेषामचिरात् परिपन्थिनाम्॥" (१३)

[सरस्वतीकण्ठाभरणम्]

"किमित्यपास्याऽऽभरणानि यौवने
धृतं त्वया वार्द्धकशोभि वल्कलम्?।
वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते?॥" (१४) [कुमारसं०]

समेन समस्य, अधिकेन (उत्कृष्टेन) न्यूनस्य, न्यूनेनाधिकस्य च वस्तुनः परिवर्त्तनोपपत्तः।

(१३) समेन समस्य विनिमयाऽऽत्मकं परिवृत्त्यलङ्कारमुदाहरति, तदेति।—जरासन्धेन सह श्रीकृष्णस्य सङ्ग्रामवृत्तवर्णनमिदम्। तेन भगवता—श्रीकृष्णचन्द्रेण, तदा—जरासन्धेन सह युद्धावसरे, रणाङ्गणे—सङ्ग्रामभूमौ, दृष्टिं दत्त्वा—शत्रून् प्रति दृष्टिं प्रदाय, शत्रुषु दृष्टिपातमात्रं कृत्वेति भावः, तेषां—जरासन्धानुयायिनां, परिपन्थिनां—शत्रूणाम्, ("अभिघाति-परारातिप्रत्यर्थि-परिपन्थिनः" इत्यमरः) जीवितं—प्राणान्, अचिरात्—झटिति, तत्क्षणादिति भावः, गृहीतं—संहृतमिति यावत्। अत्र दृष्टेर्जीवितस्य च समानतया जीविताऽऽदानेन दृष्टेर्दानं, समेन समस्येति बोध्यम्।

(१४) अधिकेन (उत्कृष्टेन) न्यूनस्य विनिमयाऽऽत्मकं परिवृत्त्यलङ्कारमुदाहरति, किमितीति।—पार्वतीं प्रति वटुरूपिणः महादेवस्योक्तिः। हे गौरि! (इत्यध्याहार्य्यम्) यौवने—युवावस्थासद्भावे, धार्य्याणीति शेषः, आभरणानि—आभूषणानि, अपास्य—त्यक्त्वा, किमिति—कथं, केन हेतुनेति यावत्, त्वया—सुकुमार्य्या इति भावः, वार्द्धकशोभि—वार्द्धकं—वृद्धावस्था, ("द्वन्द्वमनोज्ञादिभ्यश्च" (५।१।१३३ पा०) इति मनोज्ञादित्वाद्वुञ्। "वार्द्धकं वृद्धसङ्घाते वृद्धत्वे वृद्धकर्मणि" इति विश्वः) तत्र शोभते इति तथोक्तं, वृद्धावस्थायामेव धार्य्यमिति भावः, वल्कलं—वृक्षत्वक्, धृतम्? स्फुटाः,—सुप्रकाशाः, चन्द्रस्य तारकाश्च यत्र तादृशी, विभावरी—रात्रिः, प्रदोषे—रात्रिप्रारम्भे, ("प्रदोषो रजनीमुखम्" इत्यमरः) अरुणाय—सूर्य्यसूताय, ["क्रियाऽर्थोपपदस्य च कर्मणि स्थानिनः" (२।३।१४ पा०) इति चतुर्थी) कल्पते यदि?—समर्थ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"तस्य च प्रवयसो जटायुषः
स्वर्गिणः किमिव शोच्यतेऽधुना।
येन जर्जरकलेवरव्ययात्
क्रीतमिन्दुकिरणोज्ज्वलं यशः॥"(१५) [अलङ्कारसर्वस्वम्]

एषु उदाहरणेषु क्रमेण दृष्टिजीवितयोः समत्वेन, आभरण-वल्कलयोरधिकन्यूनत्वेन, जर्जरकलेवरयशसोर्न्यूनाधिकत्वेन च विनिमयः।

पर्य्यायः,—

"एकं क्रमेणानेकस्मिन् पर्य्यायोऽन्यस्ततोऽन्यथा।"(१६)

[मम्मटः]

वल्कं कल्पते किम ? वद—ब्रूहि; दीप्यमानशशाङ्कतारके प्रदोषे यथारुण उदेति, तदा विभूषणापहारेण तव वल्कलधारणं सङ्गच्छते इति भावः। यथा प्रदोषे प्रभातासम्भवः, तथा यौवने वार्द्धकासम्भव इति यौवनोचितानामाभरणानां त्यागः, वार्द्धकोचितस्य वल्कलस्य च धारणमनुचितमिति वक्तव्यम्। अत्राधिकेन आभरणरूपेण वस्तुना वल्कलरूपस्य न्यूनस्य वस्तुनो विनिमयः। वंशस्थविलं वृत्तम्।

(१५) अधिकस्य न्यूनेन विनिमयाऽऽत्मकं परिवृत्त्यलङ्कारमुदाहरति, तस्य चेति। —येन—जटायुषा, जर्जरस्य—जरागस्तस्य, कलेवरस्य—शरीरस्य, व्ययात—दानात, इन्दोः,—चन्द्रमसः, किरणवत उज्ज्वलं—निर्मलं, यशः,—कीर्त्तिः, क्रीतं—गृहीतं, तस्य (अस्येति पाठान्तरम) च प्रवयसः,—वृद्धस्य, अधुना—सम्प्रति, स्वर्गिणः,—स्वर्गं प्राप्तस्य, जटायुषः,—जटायोः सम्बन्धे, [अत्र सम्बन्धविवक्षया षष्ठीति वक्तव्यम] किमिव—कथमित्यर्थः, शोच्यते—शोकः क्रियते ? यः स्वयं जीर्णं शरीरं विसृज्य दिव्यं यशो लब्धवान, तस्यास्य जटायुषः शोको न करणीय इति भावः। अत्र जीर्णशरीर-रूपेण न्यूनेन वस्तुना निर्मलयश स्वरूपस्याधिकस्य वस्तुनो विनिमयः। रथोद्धता वृत्तम्।

(१६) पर्य्यायनामानमलङ्कारमाह, एकमिति।—एकं, वस्तु इति शेषः, अनेकस्मिन्—अनेकविधे वस्तुनि, अनेकेषु वस्तुषु इति यावत्, क्रमेण, भवति क्रियते वा यत्र सः इति शेषः, पर्य्यायः,—तन्नामालङ्कारः, ततः,—तस्मात, एवंविधात् पर्य्यायादिति यावत, अन्यः,—भिन्नप्रकारः पर्य्यायनामालङ्कारः, अन्यथा—प्रकारान्तरेण, यत्र अनेकं वस्तु एकस्मिन् वस्तुनि क्रमेण भवति क्रियते वा तादृश इति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्र एकं वस्तु अनेकविधे वस्तुनि, अनेकविधं वा वस्तु एकस्मिन् वस्तुनि भवति क्रियते वा, स पर्य्यायः। तथा च,— एकस्य वस्तुनः अनेकगोचरभवनाऽऽत्मा, अनेकगोचरकरणाऽऽत्मा चेति द्विविधः पर्य्यायः, तथा अनेकस्य वस्तुनः एकगोचरभवनाऽऽत्मा, एकगोचरकरणाऽऽत्मा चेति द्विविधः, साकल्येन चतुर्विधः पर्य्याय इति हृदयम्। क्रमेण यथा,—

"स्थिताः क्षणं पक्ष्मसु ताड़िताधराः
पयोधरोत्सेधनिपातचूर्णिताः।
बलीषु तस्याः स्खलिताः प्रपेदिरे
क्रमेण नाभिं प्रथमोदबिन्दवः॥" (१७) [कुमारस०]

यावत्, ज्ञेय इति शेषः; अयं भावः,—एकं वस्तु अनेकत्र भवतीत्येकः, एकं वस्तु अनेकत्र क्रियते इति द्वितीयः, अनेकं वस्तु एकत्र भवतीति तृतीयः, अनेकं वस्तु एकत्र क्रियते इति चतुर्थः पर्य्यायः, एवञ्च पर्य्यायस्य चत्वारो भेदा वेदितव्याः।

(१७) एकस्य वस्तुनोऽनेकत्र भवनरूपं प्रथमं पर्य्यायमुदाहरति, स्थिता इति। —समाध्यवस्थायां पार्वत्याः शरीरोपरि पतितस्य वृष्टिसलिलस्य स्वभाववर्णनमिदम्। प्रथमोदबिन्दवः,—प्रथमे—प्रथमं पतिताः, उदबिन्दवः,—उदकस्य बिन्दवः,—जल-पृषताः, वृष्टिजलकणा इति यावत्, ["मन्थोदन—" (६।३।६० पा०) इत्यादिना उदकशब्दस्य उदादेशः] तस्याः,—समाधिस्थायाः पार्वत्या इत्यर्थः, पक्ष्मसु—नेत्राऽऽवरकाणां लोम्नामुपरिभागे, क्षणं—न तु ततोऽधिककालपर्य्यन्तमिति भावः, स्थिताः,—स्थितिं गताः, ["स्थिताः" इत्यनेन पक्ष्मणां सान्द्रत्वं, "क्षणम्" इति स्निग्धत्वञ्च गम्यते] (ततः) ताडिताः,—पतनाऽऽघातेन क्षोभिताः, अधरः,—ओष्ठः यैः तथाभूताः, [एतेन अधरस्य मार्दवं गम्यते] (अथ) पयोधरयोः,—स्तनयोः, उत्सेधे—उच्छ्राये, उन्नतपयोधरे इति यावत्, निपातेन—निपतनेन, प्रपाताऽऽघातेनेति यावत्, चूर्णिताः,—विशीर्णाः, काठिन्यादिति भावः, (तदनु) बलीषु—त्रिबल्यां, स्खलिताः,—निपतिताः सन्तः, निम्नोन्नतत्वादिति भावः, क्रमेण—आनुपूर्व्येण, [अत्र "चिरेण" इति पाठे—विलम्बेन, न तु शीघ्रं, प्रतिबन्धबाहुल्यादिति भावः] नाभिं प्रपेदिरे—प्रापुः, न तु निर्जग्मुः इति भावः, [एतेन नाभेः गाम्भीर्य्यं गम्यते]। अत्र प्रथमोदबिन्दुरूपस्य एकस्य वस्तुनः पक्ष्माधरपयोधरबलीनाभिरूपानेकवस्तुगोचरभवनाऽऽत्मना वर्णनम्। यत्तु मल्लिनाथेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"विसृष्टरागादधरान्निवर्त्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुराऽऽदानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः ॥" (१८) [कुमारस०]

"मधुरिमरुचिरं वचः खलानाम्
अमृतमहो ! प्रथमं पृथु व्यनक्ति ।
अथ कथयति मोहहेतुमन्त-
र्गतमिव हालहलं विषं तदेव ॥" (१९) [मङ्खकः]

"अत्र प्रतिपदमर्थवत्त्वात् परिकरालङ्कारः" इत्युक्तं, तदयुक्तम् ;—"उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः" इत्याद्युक्त्या विशेष्यपदानां साभिप्रायविशेषणानुगततया उक्तावेव परिकरस्याङ्गीकारात्, अत्र च "विन्दवः" इति विशेष्यपदस्य "ताडिताधराः" इत्यादिविशेषणानां "प्रपेदिरे" इत्यत्राभिप्रायशून्यत्वात् । वंशस्थाऽलं छन्दः ।

(१८) एकस्य वस्तुनः अनेकत्र करणाऽऽत्मकं पर्यायमुदाहरति, विसृष्टेति ।—तया—पार्वत्या, विसृष्टरागात्—त्यक्तलाक्षारसरञ्जनात्, ["निसृष्टरागात्" इति पाठे तु—नितरां त्यक्तलाक्षारसरागादित्यर्थः] अधरात्—अधरोष्ठात्, निवर्त्तितः,—परावर्त्तितः, रागत्यागेन निष्प्रयोजनत्वादिति भावः, तथा स्तनाङ्गरागेण अरुणितात्—अरुणीकृतात्, पतनसमये तस्य स्तनयोः उपरोधादिति भावः, कन्दुकात् च, निवर्त्तित इति पूर्वेणान्वयः, कुशाङ्कुराणाम् आदानेन—उत्पाटनकर्मणा, परिक्षताः,—व्रणिताः, अङ्गुलयो यस्य स तथोक्तः, करः,—हस्तः, अक्षसूत्रस्य—रुद्राक्षमालायाः, प्रणयी—सहचरः, कृतः । अत्र कररूपस्यैकस्य वस्तुनः अधरकन्दुककुशाङ्कुराक्षसूत्ररूपानेकवस्तुगतकरणम् । वंशस्थविलं वृत्तम् ।

(१९) अनेकस्य वस्तुन एकत्र भवनाऽऽत्मकं पर्यायमुदाहरति, मधुरिमेति ।—अहो !—आश्चर्यं, खलानां—दुष्टानां, वचः,—वचनं, प्रथमं मधुरिम्णा—माधुर्येण, रुचिरं—चित्ताऽऽकर्षकं सत्, पृथु—विपुलम्, अत्यन्तमिति यावत्, अमृतं व्यनक्ति—प्रकटयति, अथ—परिणामे, तदेव—खलानां वचः एव, अन्तर्गतं—पीतमित्यर्थः, हालहलं—विषमिव, ("हालाहलं हालहलं विषम्" इति विश्वाख्यकोशः) मोहहेतुं—मोहस्य—वैचित्त्यस्य, हेतुं—कारणताम्, [इह भावप्रधानो निर्देशो बोध्यः] कथयति । अत्र खलवचनरूपस्य एकस्य वस्तुनः अमृत-हालाहलरूपेण परिणमनम् । पुष्पिताग्रा वृत्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"तन्नेदं नतभित्ति, मन्दिरमिदं लब्धावकाशं दिवः
सा धेनुर्जरती, नदन्ति करिणामेता घनाऽऽभा घटाः ।
स क्षुद्रो मुषलध्वनिः, कलमिदं सङ्गीतकं योषिताम्
आश्चर्यं दिवसैर्द्विजोऽयमियतीं भूमिं समारोपितः !!" ॥ (२०)
[मम्मटः]

परिसङ्ख्या,—

"प्रश्नादप्रश्नतो वाऽपि कथिताद्वस्तुनो भवेत् ।
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा ॥
परिसङ्ख्या" चतुर्भेदा दर्पणे समुदीरिता ॥ (२१)

---

(२०) अनेकस्य वस्तुनः एकत्र क्रमरूपं पर्य्यायमुदाहरति, तन्नेदमिति।—दरिद्रदामोदरनाम्नो ब्राह्मणस्य सम्पत्तिं दृष्ट्वा कस्यचिदुक्तिरियम्।—तत्—यत्तदा दृष्टपूर्वं तदित्यर्थः, गेहं—गृहं, ("गृहं गेहोदवसितम्" इत्यमरः) नतभित्ति—नता—अवनता, पतनोन्मुखीभूता इत्यर्थः, भित्तिः यस्य तादृशम्, आसीदिति शेषः, इदं—प्रत्यक्षभूतं, मन्दिरं—भवनं, ("भवनाऽऽगारमन्दिरम्" इत्यमरः) दिवः—स्वर्गस्य, लब्धावकाशं—लब्धस्पर्शमिति भावः; सा—दृष्टपूर्वा, जरती—वृद्धा, धेनुः—गौः, आसीदिति पूर्ववदध्याहार्य्यं; एताः,—प्रत्यक्षभूताः, घनाऽऽभाः,—मेघाऽऽकारतुल्याः, करिणां—हस्तिनां, घटाः,—समूहाः, नदन्ति—गर्जन्ति । सः,—श्रुतपूर्वः, क्षुद्रः,—तुच्छः, मुषलध्वनिः,—धान्यतुषोत्क्षेपणार्थम् उलूखले निक्षिप्तस्य मुषलस्य शब्दः, आसीदिति शेषः, इदं—श्रूयमाणं, पुनरिति शेषः, योषितां—प्रमदानां, कलं—मधुरं, सङ्गीतकं—गानं, श्रूयते इति शेषः। आश्चर्य्यं, दिवसैः, कतिपयैरेवेति शेषः, अयं द्विजः,—दामोदराख्यः ब्राह्मणः, इयतीम्—एतावतीं, भूमिं—कक्षाम्, उन्नतदशामिति यावत्, समारोपितः,—प्रापितः विधात्रेति शेषः। अत्र दारिद्र्यकालीनानां नतभित्तिगेहाऽऽदीनां स्मरणं, तत्स्थाने मन्दिराऽऽदीनामनुभूयमानत्वं समर्थितम्; तस्य नतभित्तिमन्दिराऽऽदीनाम् अनेकेषाम् एकस्मिन्नेव द्विजे स्वामित्वसम्बन्धेन क्रमः। शार्दूलविक्रीडितं वृत्तम्।

(२१) चतुर्विधां परिसङ्ख्यामाह, प्रश्नादिति।—चेत्—यदि, प्रश्नात्—प्रश्नं कृत्वा, [ल्यब्लोपे पञ्चमी] वा—यद्वा, अप्रश्नतः,—अप्रश्नात्, प्रश्नमकृत्वेति यावत्, अपि कथितात्—उत्तररूपेण पृष्टादिति भावः, वस्तुनः,—पदार्थात्, तादृशः,—तादृशस्य, प्रष्टव्यतुल्यस्येति यावत्, अन्यस्य व्यपोहः,—व्यवच्छेदः, शाब्दः,—शब्दप्रतिपाद्यः, अथवा आर्थः,—अर्थबलादुपलब्धः, भवेत्, तदा परिसङ्ख्या—तन्नामा अलङ्कारः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रश्नं कृत्वा प्रश्नमकृत्वा वा शब्दसाहाय्येन अर्थसामर्थ्याद्वा कस्माच्चित् वस्तुनः कस्यचिद्वस्तुनः व्यवच्छेदः यदा प्रदर्श्यते, तदा परिसङ्ख्या नाम अलङ्कारः ; अयञ्च प्रश्नपूर्वकं कस्माच्चित् वस्तुनः कस्यचिद्वस्तुनः शाब्दः व्यवच्छेदरूप इत्येकः, आर्थः पुनः द्वितीयः ; एवं प्रश्नमन्तरा कस्माच्चित् वस्तुनः कस्यचित् वस्तुनः शाब्दः व्यवच्छेदरूप इति तृतीयः, आर्थः पुनश्चतुर्थः, साकल्येन चतुर्भेदः। क्रमेण यथा,—

"किं भूषणं सुदृढमत्र ? यशः, न रत्नं,
किं कार्य्यम् ? आर्य्यचरितं सुकृतं, न दुष्टम्।
किं चक्षुरप्रतिहतम् ? धिषणा, न नेत्रं,
जानाति कस्त्वदपरः सदसद्विवेकम् ? ॥" (२२)

(२२) किं भूषणमिति।—उक्तिप्रत्युक्ती। अत्र—अस्मिन् लोके, सुदृढं—चिरस्थायि, भूषणम्—आभरणं, किम् ?—किमस्ति ? (अयं प्रश्नः); यशः,—सुख्यातिः, भूषणमिति शेषः, न—न तु, रत्नं, भूषणमिति पूर्ववत् शेषो बोध्यः, (इदमुत्तरम) ; एवं परत्र। कार्य्यं—कर्त्तव्यं, किम् ? (इति प्रश्नः); आर्य्यैः,—साधुभिः, चरितम—आचरितं, सुकृतं—पुण्यं कर्म, कार्य्यमिति शेषः, न, दुष्टं—दुष्कृतम, आचरणं कार्य्यम् इति शेषः। (इदमुत्तरम)। "किं कार्य्यमार्य्यचरितम् ?" इत्येवं पठिते—किं—किंस्वरूपम, आर्य्यचरितम—आर्य्याणाम्—आर्य्यवंशोत्पन्नानां चरितं, कार्य्यम् ?—अनुकरणीयम ? (अयं प्रश्नः); सुकृतम्—उत्तमम, आर्य्यचरितं कार्य्यमिति शेषः, दुष्टं—निन्दितमार्य्यचरितं, न, कार्य्यमिति शेषः (इदमुत्तरम्)। ["दुष्टम्" इत्यत्र "दोषः" इति पाठान्तरम् ; "पापम्" इति पाठः साधीयान्। आर्य्यचरितं दुष्टमपि भवति, किन्तु तन्न अनुकरणीयम् ; यत्तु—"धर्मव्यतिक्रमो दृष्ट ईश्वराणाञ्च साहसम्। तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥" (भाग० १०·३३।२९) इति धर्मव्यतिक्रमस्य दोषाभावत्वमुक्तं, तत्तु कादाचित्कं बोध्यं, न तु सार्वदिकमिति] अप्रतिहतं—दिव्यं, सर्वतः प्रसारीति यावत्, चक्षुः,—नेत्रं, किम् ? (अयं प्रश्नः); धिषणा—बुद्धिः, ("बुद्धिर्मनीषा धिषणा" इत्यमरः) अप्रतिहतं चक्षुरिति शेषः ; नेत्रं—बहिर्भावदर्शि चक्षुरिन्द्रियं, न, अप्रतिहतं चक्षुरिति शेषः, तस्यान्तर्दर्शनाशक्तेरिति भावः ; (इदमुत्तरम्)। इत्येवमुत्तरं श्रुत्वा प्रसन्नः सन् उत्तरदातारं प्रशंसति, त्वदपरः,—त्वद्भिन्नः, कः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र किमिति प्रश्नपूर्वकं यश आदेः रत्नाऽऽदेः व्यवच्छेदः शाब्दः, नञा साक्षात् तस्याभिधानात् ।

"किमासेव्यं पुंसाम् ? सविधमनवद्यं द्युसरितः,
किमेकान्ते ध्येयम् ? चरणयुगलं कौस्तुभभृतः ।
किमाराध्यम् ? पुण्यं. किमभिलषणीयञ्च ? करुणा,
यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवति ॥" (२३)

[अलङ्कारसर्वस्वम्]

अत्र प्रतिषेधकस्य नञः व्यवच्छेद्यस्य पानगोष्ठ्यादेश्च शब्देनानुपात्तत्वात् किम्पदेन प्रश्नपूर्वकम् आर्थो व्यपोहः ।

"भक्तिर्भवे, न विभवे, व्यसनं शास्त्रे, न युवतिकामास्त्रे ।
चिन्ता यशसि, न वपुषि, प्रायः परिदृश्यते महताम् ॥" (२४)

सदसतोः,—साध्वसाध्वोः, विवेकं—पार्थक्यं, जानाति ? न कोऽपि त्वां विना एवं सदुत्तरं दातुं समर्थ इति भावः । वसन्ततिलकं वृत्तम् ।

(२३) किमासेव्यमिति ।—पुंसां—मनुष्याणां, किम् आसेव्यम् ?—सेवनीयम् ? (इति प्रश्ने उत्तरयति) द्युसरितः,—स्वर्धुन्याः, गङ्गाया इति यावत्, अनवद्यं—निरवद्यं, पवित्रमिति भावः, सविधं—समीपस्थलं, तीरमित्यर्थः, आसेव्यमिति शेषः, न तु पानगोष्ठ्यादेः सान्निध्यमासेव्यमिति अर्थतो बोध्यम् ; एवं परत्र । एकान्ते—रहसि, किं ध्येयम् ?—चिन्तनीयम् ? (अयं प्रश्नः) ; कौस्तुभभृतः,—श्रीविष्णोः, चरणयुगलं—पादद्वन्द्वं, ध्येयमिति शेषः, (इदमुत्तरम्), न तु कान्ताया मुखकमलाऽऽदि ध्येयमिति तात्पर्यतो लभ्यम् । किम् आराध्यम् ?—सेव्यम् ? (अयं प्रश्नः) ; पुण्यम्, आराध्यमिति शेषः, (इदमुत्तरम्), न तु पापमित्यर्थतो लभ्यम् । किञ्च अभिलषणीयम् ?—काम्यम् ? (अयं प्रश्नः); करुणा—दया, "आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः" इत्याद्युक्त्या सर्वत्राऽऽत्मप्रत्ययेन निरतिशयाऽऽमोदाऽऽधानरूपा बुद्धिरिति यावत्, (इदमुत्तरम्), न तु नैष्ठुर्यमभिलषणीयमित्यर्थतो बोध्यम् ; निरवधि—निरन्तरं, यदासक्त्या—येषां गङ्गातीराऽऽदीनां सेवनात्, चेतः,—चित्तं, विमुक्त्यै—मोक्षाय, मोक्षं प्राप्तुमित्यर्थः, प्रभवति, तानि पुंसां सेव्याऽऽदीनि इति पूर्वत्र योज्यानि । शार्दूलविक्रीडितं वृत्तम् ।

(२४) भक्तिरिति ।—महतां—महात्मनां, प्रायः,—बाहुल्येन, भवे—महादेवे,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र किमादेरभावात् प्रश्नाभावः, अथापि विभवाऽऽदेर्व्यवच्छेदो यः, स शाब्दः, नञा तदभिधानात् ।

"सोऽर्थो यो निजहस्ते, तन्मित्रं यन्निरन्तरं व्यसने ।
तद्रूपं यत्र गुणाः, तद्विज्ञानञ्च यत्र धर्मः स्यात् ॥" (२५)

अत्र व्यवच्छेद्यस्य व्यवच्छेदकस्य च अनुपादानात् आर्थः ।

तद्गुणः,—

"स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् ।
वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः ॥"(२६)

[मम्मटः]

कस्यचित् सम्बन्धेन आत्मगुणं परित्यज्य स्वापेक्षया उत्कृष्टस्य गुणं गृहीत्वा तथाभवनं तद्गुणः । यथा,—

"जगाद वदनच्छद्म-पद्मपर्य्यन्तपातिनः ।
नयन् मधुलिहः श्वैत्यमुदग्रदशनांशुभिः ॥" (२७)

[शिशुपालवधम्]

भक्तिः,—प्रेम, परिदृश्यते—प्रतीयते, विभवे—सम्पत्तौ, न, भक्तिः परिदृश्यते इत्यन्वयः, एवं परत्रापि । शास्त्रे—शास्त्राभ्यासे, व्यसनम्—आसक्तिः, युवतिः,—प्रमदा एव, कामास्त्रं तव; यद्वा—युवतीनां कामास्त्रं—मधुरवचनश्रवणाऽऽदि तदेत्यर्थः, न, व्यसनमिति शेषः, यशसि—सुख्यातौ, चिन्ता, वपुषि—शरीरे, शरीररक्षायामिति यावत्, न, चिन्तेति शेषः । आर्य्या छन्दः ।

(२५) सोऽर्थ इति ।—अर्थः,—धनम् । विज्ञानं—विशिष्टं ज्ञानम् । स्पष्टमन्यत् ।

(२६) स्वमुत्सृज्येति ।—यत् वस्तु अत्युज्ज्वलगुणस्य—अत्युत्कृष्टवस्तुसम्बन्धिनः गुणस्येत्यर्थः, योगात्—सम्बन्धात्, स्वं—स्वकीयं, गुणम् उत्सृज्य—परित्यज्य, तस्य—अत्युज्ज्वलवस्तुनः, गुण इव गुणो यस्य तस्य भावः तत्तां, गुणेन तत्साद्दश्यमित्यर्थः, एति—प्राप्नोति, स तु—स एव, तद्गुणः,—तद्गुणो नाम अलङ्कारः, भण्यते—उच्यते ।

(२७) उदाहरति, जगादेति ।—सम्भाषणावसरे श्रीबलदेवस्य मुखशोभावर्णनमिदम् । वदनं—मुखम् एव, छद्म—कपटं यस्य तत्, पद्मं—कमलं, वदनमेव कमलमिति भावः, तस्य पर्य्यन्ते—प्रान्ते, पतन्ति—सञ्चरन्ति इति तथाविधान्, मधुलिहः,—भ्रमरान्, उदग्राः,—उच्छ्रिताः, ये दशनांशवः,—दन्तप्रभाः तैः, श्वैत्यं—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उदात्तम्,—

"लोकातिशयसम्पत्ति-वर्णनोदात्तमुच्यते ।
यद्वाऽपि प्रस्तुतस्याङ्गं महतां चरितं भवेत् ॥" (२८)

[विश्व०]

यत् अलौकिकायाः सम्पत्तेः वर्णनं, यदि वा प्रस्तुतस्याङ्गं महात्मनां चरित्रं स्यात्, तदुभयविधम् उदात्तम् । क्रमेण यथा,—

"मुक्ताः केलिविसूत्रहारगलिताः सम्मार्जनीभिर्हृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाऽङ्घ्रिलाक्षाऽरुणाः ।
दूरात् दाड़िमबीजशङ्कितधियः कर्षन्ति केलीशुकाः
यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम् ॥" (२९)

धावल्यं, नयन्—प्रापयन्, जगाद—उवाच; श्रीवल्लभद्र इति पूर्वतोऽन्वेति । अत्र दन्तप्रभायोगात् भ्रमराणां कृष्णवर्णरूपस्वगुणमुत्सृज्य अत्युज्ज्वलस्य श्वैत्यगुणस्य ग्रहणम् ।

(२८) उदात्तमाह, लोकेति ।—लोकातिशया—अलौकिकी, या सम्पत्तिः,—वैभवं, तस्या वर्णना, यद्वा—यदि वा, प्रस्तुतस्य—प्रकृतस्य, प्रतिपाद्यस्य इत्यर्थः, अङ्गम्—उपकारकं, महतां—महीयसां, चरितं भवेत्, तदेति शेषः, अपि, उदात्तं—तदाख्योऽलङ्कारः, उच्यते ।

(२९) मुक्ता इति ।—विद्वद्भवनेषु—विदुषां—कवीनां, भवनेषु—आगारेषु, केलौ—क्रीड़ायां, विसूत्राः,—विगलितसूत्राः, ये हाराः,—मुक्तावल्यः, तेभ्यः गलिताः,—पतिताः, तथा सम्मार्जनीभिः हृताः,—आहृताः, एकत्रीकृता इति यावत्, (अथ) प्रातः,—प्रभाते, प्राङ्गणसीम्नि—अङ्गनप्रान्ते, मन्थरं—शनैः शनैः, चलन्त्यः,—भ्रमन्त्यः, या बालाः,—योषितः, तासाम् अङ्घ्रिलाक्षया—चरणस्थितलाक्षारागेण, अरुणाः,—रक्ताः, मुक्ताः,—मौक्तिकानि, दूरात् दाड़िमबीजैः शङ्किता धीः,—बुद्धिः येषां तथाभूताः सन्तः, केलीशुकाः,—क्रीड़ार्थं पोषिताः कीराः, यत् कर्षन्ति, तत् भोजनृपतेः त्यागस्य—दानस्य, लीलायितं—क्रीड़ितम् । अत्र भोजराजस्य दानम् अलौकिकमिति प्रदर्शितम् । शार्दूलविक्रीड़ितं वृत्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"नाभिप्ररूढाम्बुरुहाऽऽसनेन
संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः
संहृत्य लोकान् पुरुषोऽधिशेते ॥" (३०) [रघु०]

सूक्ष्मम्,—

"संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा ।
कयाऽपि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते ॥"(३१)
[विश्व०]

यत्र आकारेण, कयाचित् वा अन्यया चेष्टया, सूक्ष्मरूपेण प्रतीतः अर्थः कयाऽपि भङ्ग्या पुनः आविष्क्रियते, तत् सूक्ष्मम् ।

यथा,—"पिदधानमन्वगुपगम्य दृशौ
व्रुवते जनाय वद कोऽयमिति ।
अभिधातुमध्यवससौ न गिरा
पुलकैः प्रियं नववधूर्न्यगदत् ॥" (३२) [माघः]

---

(३०) नाभीति ।—समुद्रवर्णनमिदम् । युगान्ते—प्रलये, उचिता—अभ्यस्ता, योगनिद्रा यस्य तादृशः, पुरुषः,—परमात्मा, नाभ्यां प्ररूढं—उत्पातं, यत् अम्बुरुहं—कमलं, तदेव आसनं यस्य तादृशेन, नाभिकमलस्थितेनेत्यर्थः, प्रथमेन—आद्येन, धात्रा—विधात्रा, दक्षाऽऽदीनामपि स्रष्ट्रा पितामहेनेत्यर्थः, संस्तूयमानः सन्, लोकान्—जगन्ति, संहृत्य—कुक्षौ निक्षिप्य, अमुं—समुद्रम्, अधिशेते—अमुष्मिन् शेते इत्यर्थः, अस्यान्तेऽप्यस्तीति भावः । अत्र श्रीमन्नारायणस्य चरितं प्रकृतस्य समुद्रमाहात्म्यवर्णनस्याङ्गम् । उपजातिः छन्दः ।

(३१) सूक्ष्ममाह, संलक्षित इति ।—आकारेण—धर्मेण, मुखभावाऽऽदिना इत्यर्थः, वा इङ्गितेन—क्रियाभङ्ग्या, विदग्धचेष्टयेति यावत्, संलक्षितः,—सम्यक् अनुभूतः, सूक्ष्मः,—तीक्ष्णबुद्ध्या बोध्यः, अर्थः कयाऽपि—अनिर्वाच्यया, भङ्ग्या—प्रकारेण, यत्र सूच्यते—प्रकाश्यते, तत् सूक्ष्मम् उच्यते ।

(३२) पिदधानमिति ।—नववधूः,—नवोढा, अन्वक्—पश्चात्, उपगम्य दृशौ पिदधानं—छादयन्तं, प्रियं—भर्त्तारम्, "अयं कः ? वद"—दृष्टिच्छादकोऽहं कः ? कथय, इति व्रुवते—पृच्छते, जनाय गिरा—वाचा, अभिधातुं नाध्यवससौ—नोत्सेहे,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाविकम्,—

"अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः।
यत् प्रत्यक्षायमाणत्वं तत् भाविकमुदाहृतम्॥"

[विश्व०]

भूतस्य भविष्यतो वा अद्भुतस्य वस्तुनः प्रत्यक्षवत्त्वेन वर्णनं, भाविकं नामालङ्कारः। यथा,—

"मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः।
येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ॥" (३३)

विनोक्तिः,—

"विनोक्तिश्चेद्विना किञ्चित् प्रस्तुतं हीनमुच्यते।" (३४)

[चन्द्रालोकः]

यदि विनाऽर्थकेन पदेन किमपि प्रस्तुतं विहीनत्वेन वर्ण्यते, तर्हि विनोक्तिः। यथा,—

"विनयेन विना का श्रीः? का निशा शशिना विना?।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता?॥" (३५)

लज्जयेति भावः, [अभ्यवपूर्वात् स्यतेः कर्त्तरि लिट्] किन्तु पुलकैः,—रोमोद्गमैः, न्यगदत्—कथयामास। अत्र प्रियज्ञानस्यार्थस्य लज्जया अकथितस्य पुलकैः प्रकाशनात् सूक्ष्मालङ्कारः। प्रमिताक्षरा वृत्तम्।

(३३) मुनिरिति।—येन—अगस्त्यमुनिना, एकचुलुके—एकस्मिन् गण्डूषे, तौ—प्रसिद्धौ, दिव्यौ—असाधारणौ, मत्स्यकच्छपौ दृष्टौ, सः योगीन्द्रः,—ऋषिश्रेष्ठः, महात्मा—महनीयस्वरूपः, कुम्भात् सम्भवः,—उत्पत्तिः यस्य तादृशः, मुनिः,—अगस्त्यः, जयति—सर्वोत्कर्षेण वर्त्ततामित्यर्थः। अत्र पातालनिलययोरपि मत्स्यकूर्मयोः समुद्रेण समं गण्डूषे उत्पतनरूपस्य भूतस्य प्रत्यक्षवत्त्वम्।

(३४) विनोक्तिरिति।—चेत्—यदि, विना—विनाऽर्थकेन पदेन, प्रस्तुतं—प्रकृतं, किञ्चित् हीनं—विहीनम्, उच्यते, तदा विनोक्तिर्नामालङ्कारः।

(३५) उदाहरति, विनयेनेति।—विनयेन—नम्रतया, विना श्रीः,—शोभा, का? न काऽपीति भावः। शशिना—चन्द्रमसा, विना निशा—रजनी, का?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पर्य्यायोक्तम्,—

"पर्य्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते।"

[विश्व०]

भङ्ग्या—प्रकारान्तरेण, गम्यमेव—व्यञ्जनाबोध्यमेव।

यथा,—

"स्पृष्टास्ता नन्दने शच्याः केशसम्भोगलालिताः।
सावज्ञं पारिजातस्य मञ्जर्य्यो यस्य सैनिकैः॥" (३६)

[हयग्रीववध०]

व्याजोक्तिः,—

"व्याजोक्तिर्गोपनं व्याजादुद्भिन्नस्यापि वस्तुनः।" (३७)

[विश्व०]

परेण ज्ञायमानस्याप्यर्थस्य केनापि कपटेन गोपनं व्याजोक्तिः। यथा,—

सत्त्वावत्वेन रहिता—विना, वाग्विदग्धता—वाक्पाण्डित्यं, कीदृशी—का? अत्र लक्षणसमन्वयः स्फुटः।

(३६) पर्य्यायोक्तमुदाहरति, स्पृष्टा इति।—यस्य—हयग्रीवस्य दैत्येन्द्रस्य, सैनिकैः नन्दने—इन्द्रवने, ताः,—प्रसिद्धाः, शच्याः,—इन्द्राण्याः, केशानां सम्भोगाय—भूषणाय, लालिताः,—सयत्नं पालिताः, पारिजातस्य—स्वनामप्रसिद्धदेवतरुविशेषस्य, मञ्जर्य्यः,—नवोद्गताः पल्लवाङ्कुररूपा वल्लर्य्यः, सावज्ञम्—अनादरपूर्वकं, बलादिति यावत्, स्पृष्टाः,—स्पर्शं नीताः, उपचारात् त्रोटिता इति यावत्, स हयग्रीव आसीदिति पूर्वतोऽन्वेति। अत्र हयग्रीवकर्तृकस्वर्गविजयरूपस्य गम्यस्य वस्तुनः "सावज्ञं पारिजातस्य मञ्जर्य्यो यस्य सैनिकैः" इत्यात्मकभङ्ग्या वर्णनम्।

(३७) व्याजोक्तिमाह, व्याजोक्तिरिति।—उद्भिन्नस्यापि—प्रकटितस्यापि, केनापि कारणेनात शेषः, चातुर्य्यादिना व्यक्तीभूतस्यापि वा, वस्तुनः,—अर्थस्य, व्याजात्—कारणान्तरोद्भावनच्छलात्, गोपनं व्याजोक्तिः,—तन्नामा अलङ्कारः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"आयान्तमालोक्य हरिं प्रतोल्याम्
आल्याः पुरस्तादनुरागमेका।
रोमाञ्चकम्पाऽऽदिभिरुच्यमानं
वामा जुगूह प्रणमन्त्यथैनम्॥" (३८) [कुवलया०]

वक्रोक्तिः—

"वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्रकल्पनम्।"(३९)

[कुवलया०]

श्लेषेण काक्वा वा अभिहितस्य वाक्यस्य अभिप्रायान्तरपरतया योजनं वक्रोक्तिः। तथा चेयं श्लेषमूला, काकूक्तिमूला चेति द्विविधा। क्रमेण यथा—

"अहो! केनेदृशी बुद्धिर्दारुणा तव निर्मिता?।
त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्॥" (४०)

[कुवलया०]

---

(३८) उदाहरति, आयान्तमिति।—श्रीकृष्णमालोक्य उद्भूतभावायाः कस्याश्चित् सुन्दर्याः, सख्याः समक्षं तन्निगूहनवर्णनमिदम्। एका—काचित्, वामा—सुन्दरी, प्रतोल्यां—रथ्यायां, ('रथ्या प्रतोली विशिखा' इत्यमरः) सङ्कीर्णमार्गे इति यावत्, आयान्तम्—आगच्छन्तं, हरिं—श्रीकृष्णम्, आलोक्य—दृष्ट्वा, अथ एनं—हरिं, प्रणमन्ती—वन्दमाना सतीति यावत्, आल्याः,—सख्याः, पुरस्तात्—समक्षं, रोमाञ्चकम्पाऽऽदिभिः,—रोमाञ्चोद्गमवेपथ्वादिभिरङ्गविकारैः, उच्यमानं—स्पष्टं बोध्यमानं, सर्वथा स्पष्टं भासमानमिति यावत्, अनुरागम्—आत्मनि तद्विषयकं प्रेम, जुगूह—गोपायितवती। अत्र रोमोद्गमादिनोद्भूतस्य श्रीकृष्णविषयस्यानुरागस्य भक्तिरूपहेत्वन्तर-प्रत्यायकेन प्रणमनव्याजेन निगूहनात् व्याजोक्तिः। इन्द्रवज्रा वृत्तम्।

(३९) वक्रोक्तिमाह, वक्रोक्तिरिति।—श्लेषकाकुभ्यां—श्लेषेण—नानार्थशब्दाव-लम्बनेन, काक्वा—शोकादिहेतुकस्वरस्य विकारविशेषेण च, अपरस्य—येनाभिप्रायेण वाक्यमुक्तं तद्भिन्नस्य, अर्थस्य—अभिप्रायस्य, प्रकल्पनं—सङ्घटनं, वक्रोक्तिः,—तन्नामा अलङ्कारः। इदं तु बोध्यं,—श्लेषेण अन्यथाकल्पनमित्येका, काक्वा अन्यथाकल्पन-मित्यन्या च वक्रोक्तिरित्यस्या भेदद्वयम्।

(४०) श्लेषमूलामुदाहरति, अहो इति।—केन तव बुद्धिः ईदृशी—एवंविधा, दारुणा—घोरा, निर्मिता?—कृता? अहो!—चित्रम्। एतदेव वाक्यमन्यथा योज-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"गुरुपरतन्त्रतया बत! दूरतरं देशमुद्यतो गन्तुम्।
अलिकुलकोकिलललिते नैष्यति सखि! सुरभिसमयेऽसौ ?॥"(४१)

[अलङ्कारसर्वस्वम्]

आक्षेपः—

"आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्।"(४२)

[मम्मटः]

स्वाऽऽत्मनैव कर्त्तव्यत्वेन उक्तस्य अर्थस्य विचारदशायां किञ्चित् प्रयोजनान्तरमनुसन्धाय प्रतिषेधः आक्षेपः। यथा,—

"साहित्यपाथोनिधिमन्थनोत्थं
कर्णामृतं रक्षत हे कवीन्द्राः!।
यत् तस्य दैत्या इव लुण्ठनाय
काव्यार्थचोराः प्रगुणीभवन्ति॥

यन्नुत्तरयति, त्रिगुणा—रजःसत्त्वतमोगुणात्मिका: बुद्धिः श्रूयते, न तु—न पुनः, क्वचित्—कस्मिंश्चित् शास्त्रे, दारुमयी—काष्ठमयी, काष्ठनिर्मितेति यावत्, श्रूयते इति पूर्वतोऽन्वेति। अयं भावः,—"अहो! केन (विधात्रा) दारुणा (भयङ्करी) तव बुद्धिः निर्मिता" इत्युक्तं वाक्यमेव "अहो! केन (कीदृशेन) दारुणा (काष्ठेन) तव बुद्धिः निर्मिता" इत्येवं योजयित्वोत्तरमिदमिति।

(४१) काकुमूलामुदाहरति, गुर्विति।—हे सखि! असौ—मम नाथः, गुरूणां—पित्रादीनां, परतन्त्रतया,—वशंवदतया, बत—खेदे, दूरतरं देशं—सुदूरदेशं, गन्तुं—प्रयातुम, उद्यतः,—प्रवृत्तः, किन्तु अलिकुलेन—भ्रमरपुञ्जेन, कोकिलैः,—पिकैश्च, ललिते—सुन्दरे, सुरभिसमये—वसन्तर्त्तौ, न एष्यति ?—न आगमिष्यति ? (अत्र काकुः), अपि तु अवश्यमेष्यतीत्यर्थः। अत्र काक्वा नैष्यतीत्यस्य अवश्यमेष्यतीत्यस्य अपरस्यार्थस्य प्रकल्पनात् वक्रोक्तिरलङ्कारः। आर्य्या वृत्तम्।

(४२) आक्षेपमाह, आक्षेप इति।—स्वयम् उक्तस्य—उपदिष्टस्य, कर्त्तव्यत्वेन बोधितस्यार्थस्येति यावत्, विचारणात्—विचारात्, तात्पर्य्यान्तरानुसन्धानादिति भावः, प्रतिषेधः,—निषेधनम्, आक्षेपः,—तन्नामा अलङ्कारः।

(४३) उदाहरति, साहित्येत्यादिद्वाभ्याम्।—हे कवीन्द्राः!—कवीश्वराः! साहित्यं—काव्यशास्त्रम् एव, पाथोनिधिः,—समुद्रः, तस्य मन्थनात्—विलोड़नात्, समुद्र-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गृह्णन्तु सर्वे यदि वा यथेच्छं
नास्ति क्षतिः क्वापि कवीश्वराणाम् ।
रत्नेषु लुप्तेषु बहुष्वमर्त्यै-
रद्यापि रत्नाऽऽकर एव सिन्धुः ॥" (४३) [युग्मकम्]

[कुवलया०]

इति अष्टमशिखाऽऽलोकः ।

मन्थनादिव भारताऽऽदिकाव्यशास्त्रानुशीलनादित्यर्थः, उत्तिष्ठतीति तथाभूतं, कर्णामृतं —श्रवणसन्तर्पणत्वात् कर्णयोरमृतमिव अमृतमित्यर्थः, रक्षत । ननु का भीतिः ? इत्याशङ्कयाऽऽह, यत्—यतः, तस्य—अमृतस्य, लुण्ठनाय—बलादादानाय, दैत्या इव काव्यार्थस्य—काव्यरूपधनस्य, चोराः प्रगुणीभवन्ति—बहुलीभवन्ति । प्रतिभामाहात्म्यं विचार्य्य उक्तमेवार्थमाक्षिपति, गृह्णन्त्विति ।—यदि वा—अथवा, सर्वे—बहुलीभूता अपि काव्यार्थस्य चोराः, यथेच्छं—तृप्तिपर्य्यन्तं, गृह्णन्तु—लुण्ठन्तु, काव्यामृतमिति शेषः, कवीश्वराणां—प्रतिभाशालिनां कवीनां, क्वापि—कुत्रापि, न क्षतिः,—न हानिः, अस्ति । ननु कथमित्याह—अमर्त्यैः,—देवैः, बहुषु रत्नेषु लुप्तेषु—अपहृतेषु सत्सु, अपीति शेषः, अद्यापि—साम्प्रतमपि, सिन्धुः,—समुद्रः, रत्नानाम् आकरः एव । अत्र पूर्वं काव्यरक्षणार्थमुपदिष्टं, पश्चात् तस्यैव प्रतिषेधः कृतः, इति स्फुटं लक्षण-समन्वयः । इन्द्रवज्रा वृत्तम् ।

इति श्रीजीवानन्दविद्यासागरपौत्र "एम्, ए" "बि, एल" इत्युपाधिधारि-
श्रीपञ्चाननभट्टाचार्य्य-सङ्कलित-व्याख्यासहिताष्टमशिखाऽऽलोकः ।

समाप्तोऽयं ग्रन्थः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशक— { पण्डित-श्री-आशुतोष-विद्याभूषण
तथा
पण्डित-श्री-नित्यबोध-विद्यारत्न।

प्राप्तिस्थान— { २न०, रमान[illegible] मजुमदार [illegible] आमहार्ष्ट-
ष्ट्रीट्-पोष्ट-अफिस। कलिकाता।

प्रिण्टर—ब्रि, वि, मुखर्जी।
२ नं०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता।

Dr. Urmila Sharma Collection, Varanasi